पूर्वाद्यृक्षत्रितयादेकमपीन्दोः सुतोऽभिमृद्नीयात् । क्षुच्छस्त्रतस्करामयभयप्रदायी चरन् जगतः ॥ ७ ॥ प्राकृतविमिश्रसंक्षिप्ततीक्ष्णयोगान्तघोरपापाख्याः । सप्त पराश तन्त्रे नक्षत्रैः कीर्तितागतयः ॥ ८ ॥ प्राकृतसंज्ञा वायव्ययाम्यपैतामहानि बहुलाश्च । मिश्रा गतिः प्रतिष्ठा शशिशिवपितृभुजगदैवानि ॥ ९ ॥ संक्षिप्तायां पुष्यः पुनर्वसुः फल्गुनीद्वयं चेति । तीक्ष्णायां भाद्रपदाद्वयं सशाक्राश्वयुक् पौष्णम् ॥ १० ॥ योगान्तिकेति मूलं द्वे चाषाढे गतिः तस्येन्दोः । घोरा श्रवणस्त्वाष्ट्रं वसुदेवं वारुणं चैव ॥ १ ॥ पापाख्यं सावित्रं मैत्र शक्राग्निदैवतं चेति । उदयप्रवासदिवसैः स एव गतिलक्षणंप्राह ॥ १२ ॥ चत्वारिंशत्त्रिंशद् द्विसमेता विंशतिर्द्विनवकं च । नव मासार्द्धं दश चैकसंयुताः प्राकृताद्यानाम् ॥ १३ ॥ प्राकृतगत्यामारोग्यवृष्टिसस्यप्रवृद्धयःक्षेमम् । संक्षिप्तमिश्रयोर्मिश्रमे-तदन्यासु विपरीतम् ॥ १४ ॥ ऋज्व्यतिवक्रा वक्रा विकला च मतेन देवलस्यैताः । पञ्चचतुद्वर्यकाहा ऋज्व्यादीनां षडभ्यस्ताः ॥ १५ ॥ ऋज्वी हिता प्रजानामतिवक्राथं गतिर्विनाशयति । शस्त्रभयदा च वक्रा विकला भयरोगसञ्जननी ॥ १६ ॥ पौषाषाढश्रावणवैशाखेष्विन्दुजः समाघेषु । दृष्टो भयाय जगतः शुभफलकृत् प्रोषितस्तेषु ॥ १७ ॥ कार्त्तिकेऽश्वयुजि वा यदि मासे दृश्यते तनुभवः शिशिरांशोः । शस्त्रचौरहुतभुग्गदतोयक्षुद्भयानि च दा विदधाति ॥१८॥ रुद्धानि सौम्येऽस्तमिते र्राणि यान्युद्गते तान्युपयांति मोक्षम् अन्ये तु पश्चादुदिते वदन्ति लाभः पुराणां भवतीति तज्ज्ञाः ॥ १९ ॥ हेमकान्तिरथवा शुकवर्णः सस्यकेन मणिना सदृशो वा । स्निग्धमूर्तिरलघुश्च हिताय व्यत्यये न शुभकृच्छशिपुत्रः ॥२०॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां बुधचारः सप्तमोऽध्यायः ॥७॥

चंद्रकुमार बुध उत्पातरहित होकर उदित नहीं होता है. बुधका उदय होनेके समय धान्यादिका मोल कमती या बढती करनेके लियेही बहुधा जल, अग्नि या आंधी आती है ॥१॥ श्रवण, धनिष्ठा, रोहिणी, मृगशिरा वा उत्तराषाढा नक्षत्रोंको मर्दित करके बुधके विचरनेसे रोग भय और अनावृष्टि होती है ॥२॥ आद्रासे लेकर मघातक जिस किसी नक्षत्रमें बुध होगा; उसमेंही शस्त्रपात, भूख, भय, रोग, अनावृष्टि और संतापसे पुरुषोंको पीडा होगी ॥३॥ हस्तसे लेकर ज्येष्ठातक छः नक्षत्रमें जो चंद्रका पुत्र बुध विचरण करे तो ढोरोंको पीडा. तैलादिकोंका मूल्य बढ़ता है और अनेक प्रकारके द्रव्योंसे पृथ्वी पूर्ण होती है ॥४॥ उत्तराफाल्गुनी, कृतिका, उत्तराभाद्रपदा और भरणी नक्षत्र बुधद्वारा निहत हो तो प्राणियोंकी धातुका क्षय होता है ॥५॥ यदि चंद्रमाका पुत्र बुध अश्विनी. शतभिषा मूल और रेवती नक्षत्रको भेदे तो बाजारू पदार्थ, वैद्य, नौकाजीवी, जलजपदार्थ और, घोड़ोंके लिये उपद्रव होता है ॥६॥ पूर्वाफाल्गुनी, पूर्वाषाढा और पूर्वाभाद्रपदा इन तीन नक्षत्रोंमेंसे किसी नक्षत्रको भेद कर जो बुधग्रह विचरण करे तो संसारमें क्षुधा, शस्त्र तस्कर रोग और भय होता है ॥७॥ पराशर मुनिके रचे हुए ज्योतिषीय तंत्रशास्त्रमें

नक्षत्रके द्वारा बुधकी सात प्रकारकी गति कही है यथा–१ प्राकृत, २ विमिश्र, ३ संक्षिप्त, ४ तीक्ष्ण, ५ योगान्त, ६ घोर. ७ पाप ॥८॥ स्वाती, भरणी, रोहिणी और कृतिका नक्षत्रमें बुध हो तो इस गतिको प्राकृत कहते हैं, मृगशिरा, आर्द्रा, मघा और अश्लेषा नक्षत्रीय बुधकी गतिको मिश्रा कहते हैं ॥९॥ पुष्य, पुनर्वसु, पूर्वाफाल्गुनी और उत्तराफाल्गुनीमें संक्षिप्ता और पूर्वाभाद्रपदा, उत्तराभाद्रपदा, ज्येष्ठा, अश्विनी और रेवतीमें बुधकी गतिको तीक्ष्णा कहते हैं ॥१०॥ मूल, पूर्वाषाढा व उत्तराषाढा नक्षत्रमें जो बुधकी गति होती है. उसको योगान्तिका कहते हैं और श्रवण, चित्रा, धनिष्ठा और शताभिषामें जो गति होती है उसको घोरा कहते हैं ॥११॥ जब बुध हस्त, अनुराधा या ज्येष्ठा नक्षत्रमें रहता है तब उसकी गतिका नाम पापा है, इस प्रकार पराशर मुनिने उदय के अस्तदिवसके द्वारा बुधकी गति व लक्षणोंका निरूपण किया है ॥१२॥ प्राकृतगति ४० दिन, मिश्रा ३० दिन, संक्षिप्ता २२ दिन, तीक्ष्णा १८ दिन, योगान्ता ९ दिन, घोरा १५ दिन और पापा गति ११ दिन तक रहती है ॥१३॥ बुधकी प्राकृत गतिमें आरोग्य, वृष्टि धान्यकी वृद्धि और मंगल होता है, संक्षिप्ता और मिश्रा गतिमें मिश्रफल अर्थात् न बहुत अच्छा न बहुत बुरा फल होता है और दूसरी गतियोंमें विपरीत फल होता है ॥१४॥ देवलके मतसे बुधकी गति चार प्रकारकी है, यथा–ऋज्वी, अतिवक्रा, वक्रा और विकला इन सब गतियोंका यथाक्रमसे विद्यमान काल ३० दिन, २४ दिन, १२ दिन और केवल ६ दिनतक है ॥१५॥ ऋज्वीगति प्रजाओंको हितकारी है, अतिवक्रा गति धनका नाश, करनेवाली है, वक्रगतिमें शस्त्रभय और विकलामें भय व रोग होता है ॥१६॥ पौष आषाढ, श्रावण, वैशाख वा माघमासमें जो बुध ग्रह दिखाई दे तो संसारको भय हो यदि इस समय में अस्त होवे तो शुभ होता है ॥१७॥ जो चंद्रमाका पुत्र बुध कार्तिक या आश्विन मासमें दिखाई दे तो शस्त्र, चोर, अग्नि, रोग जल और क्षुधाका भय होता है ॥१८॥ बुधके चारमें भलीभांति सब कुछ जाने हुए पंडित लोग कहते हैं कि, बुधके अस्तकालमें जो नगर रुक जाते हैं, फिर बुधके उदय होनेके समयमें वह सब नगर छूट जाते हैं, कोई कोई कहते हैं कि, पश्चिम दिशामें बुध उदय हो तो उस ओरके सब पुर लाभवाले होते हैं ॥१९॥ जब कि चंद्रमाके पुत्र बुधका रंग सुवर्णके समान या तोते पक्षीके समान अथवा सस्यकमणिके समान हो और जब बुध निर्मल मूर्ति और बडा हो तब सबकाही मंगल होता है, ऐसा न होनेपर अशुभही होता है ॥२०॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां सप्तमोऽध्यायः ॥७॥

अथाष्टमोऽध्यायः

बृहस्पतिचारः

नक्षत्रेण सहोदयमुपगच्छति येन देवपतिमंत्री । तत्संज्ञं वक्तव्यं वर्षं मासक्रमेणैव ॥१॥ वर्षाणि कार्तिकादीन्याग्नेयाद्भद्वयानुयोगीनि । क्रमशस्त्रिभं तु पञ्चममुपान्त्यमन्त्यं च यद्वर्षम् ॥२॥ शकटानलोपजीवकगोपीडा व्याधिशस्त्रकोपश्च । वृद्धिस्तु रक्तपीतककुसुमानां कार्त्तिके वर्षे ॥३॥ सौम्येऽब्देऽनावृष्टिमृंगा-

खुशल्भाण्डजेश्च सस्यवधः। व्याधिभयं मित्रैरपि भूपानां जायते वैरम् ॥ ४ ॥ शुभकृज्जगतः पौषो निवृत्तवैराः परस्परं क्षितिपाः। द्वित्रिगुणो धान्यार्घः पौष्टिककर्मप्रसिद्धिश्च ॥ ५ ॥ पितृपूजापरिवृद्धिर्माघे हार्दिश्च सर्वभूतानाम्। आरोग्यवृष्टिधान्यार्घसम्पदो मित्रलाभश्च ॥ ६ ॥ फाल्गुनवर्षे विद्यात् क्वचित् क्वचित् क्षेमवृद्धिसस्यानि। दौर्भाग्यं प्रमदानां प्रबलाश्चोग्राः ॥७॥ चैत्रे मन्दा वृष्टिः प्रियमन्नं क्षेममवनिपा मृदवः। वृद्धिस्तु कोशधान्यस्य भवति पीडा च रूपवतान् ॥८॥ शाखे धर्मपरा विगतभयाः प्रमुदिताः प्रजाः सनृपाः। यज्ञ क्रिया प्रवृत्तिर्निष्पत्तिः सर्वसस्यानाम् ॥ ९ ॥ ज्येष्ठे जातिकुलाधनश्रेणीश्रेष्ठा नृपाः सधर्मज्ञाः। पीडयन्ते धान्यानि च हित्वा कंगुं शमीजातिम् ॥१०॥ आषाढे जायन्ते सस्यानि क्वचिदवृष्टिरन्यत्र। योगक्षेमं मध्यं व्यग्राश्च भवन्ति भूपालाः ॥ ११ ॥ श्रावणवर्षे क्षेमं सम्यक् सस्यानि पाकमुपयान्ति। क्षुद्रा ये पाषण्डाः पीडयन्ते ये च तद्भक्ताः ॥१२॥ भाद्रपदे वल्लीजं निष्पत्तिं याति पूर्वसस्यं च। न भवत्यपरं सस्यं क्वचित् सुभिक्षं क्वचिच्च भयम् ॥१३॥ आश्वयुजेऽब्देऽजस्रं पतति जलं प्रमुदिताः प्रजाः क्षेमम्। प्राणचयः प्राणभृतां सर्वेषामन्नबाहुल्यम् ॥१४॥ उदगारोग्यसुभिक्षक्षेमकरो वाक्पतिश्चरन् भानम्। याम्ये तद्विपरीतो मध्येन तु मध्यफलदायी ॥१५॥ विचरन् भद्वयमिष्टस्तस्तत्सार्धवत्सरेण मध्यफलः। सस्यानां विध्वंसी विचरेदधिकं यदि कदाचित् ॥१६॥ अनलभयमनलवर्णे व्याधिः पीते रणागमः श्यामे। हरिते च तस्करेभ्यः पीडा रक्ते तु शस्त्रभयम् ॥ १७ ॥ धूमाभेऽनावृष्टिस्त्रिदशगुरौ नृपवधो दिवा दृष्टे। विपुलेऽमले सुतारे रात्रौ दृष्टे प्रजाःस्वस्थाः ॥१८॥ रोहिण्योऽनलभं च वत्सरतनुर्नाभिस्त्वषाढद्वयं सार्पं हृत्पितृदैवतं च कुसुमं शुद्धैः शुभं तैः फलम्। देहे क्रूरनिपीडितेऽग्न्यनिलजं नाभ्यां भयं क्षुत्कृतं पुष्ये फमूलफलक्षयोऽथ हृदये सस्यस्य नाशो ध्रुवम् ॥ १९ ॥ ह्वतानि वर्षाणि शकेन्द्रकालाद्धतानि रुद्रैर्गुणयेच्चतुर्भिः। नवाष्टपञ्चाष्टयुतानि कृत्वा विभाजयेच्छून्यशरागरामैः ॥२०॥ फलेन युक्तं शकभूपकालं संशोध्य षष्ट्या विषयैर्विभज्य। युगानि नारायण पूर्वकाणि लब्धानि शेषाः क्रमशः समाः स्युः ॥२१॥ एकैकमब्देषु नवाहतेषु दत्त्वा पृथग्द्वादशकं क्रमेण। हृत्वा चतुर्भिर्वसुदेवताद्यान्युडूनि शेषांशकपूर्वमब्दम् ॥२ ॥ विष्णुः सुरेज्यो बलभिद्धुताशस्त्वष्टोत्तरप्रोष्ठपदाधिपश्च। क्रमाद्युगेशाः पितृविश्वसोमाः शक्रानलाख्याश्विभगाः प्रतिष्टाः ॥ २३ ॥ संवत्सरोऽग्निः परिवत्सरोऽर्क इदादिकः शीतमयूखमाली। प्रजापतिश्चाप्यनुवत्सरः शैलसुतापतिश्च ॥ २४ ॥ वृष्टिः समाद्ये प्रमुखे द्वितीये प्रभूततोया कथिता तृतीये। पश्चाज्जलं मुञ्चति यच्चतुर्थं स्वल्पोतदकं पञ्चममब्दमुक्तम् ॥ २५ ॥ चत्वारि मुख्यानि युगान्यथैवांविष्णिवन्द्रजीवानलदै-

वतानि। चत्वारि मध्यानि च मध्यमा नि चत्वारि चान्त्यान्यधमानि विद्यात् ॥२६॥ आद्यं धनिष्ठांशमभिप्रपन्नो माघे यदायात्युदयं सुरेज्यः। षष्ठ्यब्द-पूर्वः प्रभवः स नाम्ना प्रवर्त्तते भूतहितस्तदाब्दः ॥ २७ ॥ क्वचित्त्ववृष्टिः पवनाग्निकोपः सन्तीतयः श्लेष्मकृताश्च रोगाः। संवत्सरेऽस्मिन् प्रभवे प्रवृत्ते न दुःखमाप्नोति जनस्तथापि ॥२८॥ तस्माद् द्वितीयो विभवः प्रदिष्टःशुक्रस्तृतीयः-परतः प्रमोदः। प्रजापतिश्चेति यथोत्तराणि शस्तानि वर्षाणि फलानि चैषाम् ॥२९॥ निष्पन्नशालीक्षुयवादिसस्यां भयैर्विमुक्तामुपशान्तवैराम्। संहृष्टलोकां-कलिदोषमुक्तां क्षत्रं तदा शास्ति च भूतधात्रीम् ॥३०॥ आद्योऽङ्गिराः श्रीमुख-भावसाह्वौ युवाथ धातेति युगे द्वितीये। वर्षाणि पञ्चैव यथाक्रमेण त्रीण्यत्र शस्तानि समे परे द्वे ॥३१॥ त्रिष्वङ्गिराद्येषु निकामवर्षी देवो निरातंकभयाश्च लोकाः। अब्दद्वयेऽन्त्येऽपि समा सुवृष्टिः किन्त्वत्र रोगाः समरागमश्च ॥ ३२ ॥ शाक्रे युगे पूर्वमथेश्वराख्यं वर्षं द्वितीयं बहुधान्यमाहुः। प्रमाथिनं विक्रममप्यतोऽन्य दृषं च विद्याद्गुरुचारयोगात् ॥ ३३ ॥ आद्यं द्वितीयं च शुभे तु वर्षे कृतानुकारं कुरुतःप्रजानाम्। पापः प्रमाथी वृषविक्रमौ तु सुभिक्षदौ रोगभयप्रदौ च ॥३४॥ श्रेष्ठं चतुर्थस युगस्य पूर्वं यच्चित्रभानु कथयन्ति वर्षम्। मध्यं द्वितीयं तु सुभानुसंज्ञं रोगप्रदं मृत्युकरं न तच्च ॥३५॥ तारणं तदनुभूरिवारिदं सस्यवृद्धि-मुदितं च पार्थिवम्। पञ्चमं व्ययमुशन्ति शोभनं मन्मथप्रबलमुत्सवाकुलम् ॥३६॥ त्वाष्ट्रे युगे सर्वजिदाद्य उक्तः संवत्सरोऽन्यः खलु सर्वधारी। त माद्विरोधी विकृतः स्वरश्च शस्तो द्वितीयाऽत्र भयाय शेषाः ॥ ७ ॥ नंदनोऽथ विजयो ज स्तथा मन्मथोऽस्य परतश्च र्मुखः। कान्तमत्र युग आदितस्त्रयं मन्मथः समफलोऽधमोऽपरः ॥३८॥ हेमलम्ब इति सप्तमे युगे स्याद्विलम्बिपरप्रो विकारि च। शर्वरीति तदनु प्लवः वत्सरो गुरुवशेन पञ्चमः ॥ ३९ ॥ ईतिप्रायः प्रचुर-पवनाः वृष्टिरब्दे पूर्वे मन्दं सस्यं न बहुसलिलं वत्सरेऽतो द्वितीये। अत्युद्वेगः प्रचुरसलिलः स्यात्तृतीयश्चतुर्थो दुर्भिक्षाय प्लव इति ततः शोभनो भूरितोयः ॥४०॥ वैश्वे युगे क्षोभकृदित्यथाद्यः संवत्सरोऽतः शुभकृद्वितीयः। क्रोधी तृतीयः परतः क्रमेण विश्वावसुश्चेतिपराभवश्च ॥४१॥ पूर्वापरौ प्रीतिकरौ प्रजानामेषां तृतीयो बहुदोषऽब्दः। अन्त्यौ समौ किन्तु पाराभवेऽग्निः शस्त्रामयार्त्तिर्द्विजगोभयञ्च ॥४२॥ आद्यः प्लवङ्गो नवमे युगेऽब्दः स्यात्लोकीलकोऽन्यः परतश्च सौम्यः। साधारणो रोधकृदित्यथाब्दः शुभप्रदौ कीलकसौम्यसंज्ञौ ॥४३॥ कष्टः प्लवङ्गौ बहुशः प्रजानां साधारणेऽल्पं जलमीतयश्च। यः पञ्चमो रोध दित्यथाब्दश्चित्रं जलं तत्र च सस्यसम्पत् ॥४४॥ इन्द्राग्निदैवं दशमं युगं यत् तत्राद्यमब्दं परिधा-विसंज्ञम्। प्रमाद्यथानन्दमतः परं यत् स्याद्राक्षसंचानलसंज्ञितं च ॥ ४५ ॥

परिधाविनि मध्यदेशनाशो नृपहानिर्जलमल्पमग्निकोपः । अलसस्तु जनः प्रमादिसंज्ञे डमरं रक्तकपुष्पबीजनाशः ॥४६॥ त्यरः सकललोकनन्दन राक्षसः क्षयकरोऽनलस्तथा । ग्रीष्मधान्यजननोऽत्रराक्षसो वह्निकोपनरकप्रदोऽनलः ॥४७॥ एकादशे पिङ्गलकालयुक्तसिद्धर्थरौद्राः खलु दुर्मतिश्च ॥ आद्ये तु वृष्टिर्महती सचौराश्वासो हनूकम्पयुतश्च कासः ॥४८॥ यत्कालयुक्तं तदनेकदोषं तद सिद्धाश्वसंज्ञे बहवो गुणाश्च । रौद्रोऽतिरौद्रः क्षयकृत्प्रदिष्ठो या दुर्मतिर्मध्यमवृष्टिकृत्सः ॥४९॥ भाग्ये युगे दुन्दुभिसंज्ञमाद्यं सस्यस्यवृद्धिमहतीं करोति । उदगारिसंज्ञं तदनु क्षयाय नरेश्वराणां विषमा च वृष्टिः ॥५०॥ रक्ताक्षमब्दं कथितं तृतीयं यस्मिन भयं दंष्ट्रिकृतं गदाश्च । क्रोधं बहुक्रोधकरं चतुर्थं राष्ट्राणि शून्यीकुरुते विरोधः ॥५१॥ क्षयमिति युगस्वान्त्यं बहुक्षयकारकं जनयति भयं तद्विप्रणां कृषीवलवृद्धिदम् । उपचयकरं विट्छूद्राणां परस्वहृतां तथा कथितमखिलं षष्टचब्दे यत्तदत्त समासतः ॥५२॥ अकलुषांशुजटिलः पृथुमूर्त्तिः कुमुदकुन्दकुसुमस्फटिकाभः । ग्रहहतो न यदि सत्पथवर्त्ती हितकरोऽमरगुरुर्मनुजानाम् ॥५३॥ इति श्रीवराहमिहिरकृतौ बृहत्संहितायां बृहस्पतिचारोऽष्टमोऽध्यायः ॥८॥

इन्द्रके मंत्री अर्थात् बृहस्पति जिस मासके जिस नक्षत्रमें उदय होवे, उस नक्षत्रके अनुसार ही महीनेके नामकी नाई वह वर्ष कहलाता है ॥१॥ बारह मास होनेसे इस प्रकार कुल बारह वर्ष होंगे, उनमें कृत्तिका नक्षत्रसे आरंभ करके दो दो नक्षत्रोंमें कार्तिकादि वर्ष होगा, परंतु इन वारह वर्षोंके मध्यमें पञ्चम, एकादश और द्वादश वर्ष तीन २ नक्षत्रोंका होगा, जैसे कृत्तिका वा रोहिणी नक्षत्रमें बृहस्पतिका उदय होनेपर कार्तिक नामक वर्ष होगा ॥२॥ (१) कार्तिक नामक वर्ष होवे तो शकटद्वारा आजीविका करनेवाले बनजारे इत्यादि, अग्निसे आजीविका करनेवाले लोगोंको और गायढोरोंको पीडा होती है, लोगोंके ऊपर व्याधि और शस्त्रका कोप होता है, लाल और पीले रंगके फूल बढते हैं ॥३॥ (२) सौम्य नामक वर्ष हो तो अनावृष्टि होती है और मृग, चूहे, शलभ (टीडी) व पक्षी आदि अंडज जंतुओंसे नाजकी हानी होती है. मनुष्योंको व्याधिभय होता है और मित्रोंके संग भी राजाओंकी शत्रुता हो जाती है ॥४॥ (३) पौष नामक वर्षमें जगत्का शुभ होता है, राजा लोग आपसका वैरभाव छोड देते हैं धान्यका मूल्य दुगुना वा तिगुना हो जाता है और पौष्टिक कार्यकी वृद्धि होती है ॥५॥ (४) माघ नामक वर्षमें पितृलोगोंकी पूजा बढ़ती है, सब प्राणियोंका मंगल होता है, आरोग्य, सुवृष्टि, धान्यका मोल नीका, श्रेष्ठ संपत्ति और मित्रलाभ होता है ॥६॥ (५) फाल्गुन नामवाले वर्षमें किसी स्थानके बीच मंगल होता है वह नाज बढता है, स्त्रियोंका कुभाग्य, चोरोंकी प्रबलता और राजा-

ओंमें उग्रता होती है ।।७।। (६) चैत्र नामक वर्षमें साधारण वृष्टि होती है, प्रिय अन्नका शुभ होता है, राजाओंमें मीठापन, कोष और धान्यकी वृद्धि व रूपवान् आदमियोंको पीडा होती है ।।८।। (७) वैशाख नामक वर्षमें राजा प्रजा दोनोंही धर्ममें तत्पर रहते हैं, भयशून्य और हर्षित रहते हैं, यज्ञ करते हैं और समस्त धान्य भलीभांतिसे होते हैं ।।९।। (८) ज्येष्ठ नामक वर्षमें राजालोग धर्मज्ञ पुरुषोंके साथ जाति, कुल, धन और श्रेणीमें श्रेष्ठ मानकर गिने जाते हैं, और कंगनी वा शमीजातिके सिवाय सब धान्य पीडित होते हैं ।।१०।। (९) आषाढ नामक वर्षमें समस्त धान्य उपजते हैं, परंतु किसी स्थानमें अनावृष्टि होती है, योगक्षेम (अलब्ध वस्तुका लाभ और लब्धकी रक्षा) मध्यम और राजालोग अत्यन्त व्यग्र होते हैं ।।११।। (१०) श्रावण नामक वर्षमें धान्य आनंदसे पक जाते हैं, परंतु साधारण पाखण्डी आदमी और उनके भक्त मनुष्य अत्यंत पीडित होते हैं ।।१२।। (११) भाद्रपद नामक वर्षमें लताजातीय समस्त पूर्व धान्य भलीभांति पक जाते हैं, और धान्य नहीं होते और कहीं सुभिक्ष होता है और कहीं भय होता है ।।१३।। (१२) आश्वयुज अर्थात् आश्विन नामक वर्षमें अत्यंत जल गिरता है, प्रजा हर्षित होती है, प्राणियोंके प्राण मुखमें रहते हैं और सबके पास बहुतसा अन्न रहता है ।।१४।। जब बृहस्पति सब नक्षत्रोंके उत्तरमें घूमता है तब सबके लिये आरोग्य, सूवृष्टि और मंगल होता है. दक्षिण दिशामें बृहस्पति हो तो कहे हुए फलसे विपरीत फल होता है, मध्यभागमें विचरण करता हो तो मध्यम फल हुआ करता है ।।१५।। यदि बृहस्पति एक वर्षमें दो नक्षत्रोंके मध्य विचरण करे तो शुभकारक हैं, ढाई नक्षत्रमें विचरण करे तो मध्यम फल होता है और यदि संवत्सरमें तिससे अधिक नक्षत्रमें कभी विचरण करे तो धान्यका नाश होता है ।।१६।। जो बृहस्पतिका रंग अग्निके समान हो तो अग्निका भय होता है, पीतवर्ण हो तो व्याधि, श्यामवर्ण हो तो युद्ध होगा, हरा होनेसे चोरोंके द्वारा पीडा होगी, लाल होनेसे शस्त्रभय और धूमका रंग होनेसे अनावृष्टि होती है, दिनमें बृहस्पति दिखाई दे तो मनुष्योंका नाश होता है, जो सुंदर तारेके समान बडा और निर्मल रात्रिकालमें दिखाई दे तो प्रजाको सुख होता है ।।१७।।१८।। कृत्तिका और रोहिणी नक्षत्र वर्षकी देह है, पूर्वाषाढा और उत्तराषाढा नक्षत्र वर्षकी नाभि है, आश्लेषा हृदय और मघा नक्षत्र वर्षका कुसुम है, यह शुद्ध होवें तो शुभ फल होता है, (बृहस्पतिके अवस्थाकालमें) संवत्सरका देहनक्षत्र यदि पापग्रहसे पीडित होवें तो अग्नि और पवनसे भय होता है. नाभि नक्षत्र पीडित हो तो क्षुधाका भय होता है, पुष्य-नक्षत्रमें मूल अर्थात् मूली आदि और फलोंका क्षय होता है, और हृदयनक्षत्र पापग्रहसे पीडित हो तो निश्चय ही धान्यका नाश होता है ।।१९।। शकादित्य (शालिवाहन) राजाके समयसे जितने वर्ष बीते हैं, उनको दो स्थानोंमें रखकर एक स्थानके अंकोंको ११ संख्यासे गुणा करे, तदुपरान्त इस गुण फलको फिर चार संख्यासे गुणा करे, फिर इस गुणफलके

साथ ८५८९ को मिलावे। इस योगज फलको ३७५० से भाग देवे + फिर दूसरे स्थानके शकवर्षीय अंकोंके साथ इस भागफलको मिलावे, इस योग फलमें ६० का भाग देय (जो शेष रहे तिनसे प्रभवादि वत्सर जाने जायँगे) जो बचे उसमें ५ का भाग देना उचित है, इस भाग करनेसे जो कुछ प्राप्त हो, उस लब्धांक संख्यामें नारायण (विष्णु) आदि युग और हूए बचे अंकोंसे उस युग नुवर्ती उतनी संख्याके वर्ष चलते हैं यह जानना ॥२०॥२१॥ उक्तवत्सरोंकी संख्याको १२ से भाग करे. भागफल इस नवगुणित अंकमें मिलाकर ४ का भाग करनेपर जो लब्ध हो, उतनी संख्याके नक्षत्रमें बृहस्पतिकी विद्यमानता जानो, परंतु गणनाके समय २४ वें नक्षत्रसे गणना करे * अर्थात् १ लब्ध होनेसे

+ इस भागके लब्ध वर्ष और जो कुछ बचेगा, उसको १२ से गुण करके ३७५० का भाग देनेसे मास प्राप्त होंगे, फिर बाकीको तीससे गुणा करे, गुणफलमें पूर्वोक्त भाजक ३७५० का भाग करनेपर दिन प्राप्त होंगे फिर अवशिष्टको ६० से गुणा करनेपर यह भाजकको ३७५० से भाग करनेपर दण्ड प्राप्त होंगे और लब्धशेषको फिर ६० से गुणा करके उसमें ३७५० का भाग देनेपर पलादि प्राप्त होंगे, इस प्रकारसे जबतक निरशेष न हो जाय तबतक ६० गुणे और ३७५० भाजकसे भाग करता जाय यह सब नियमपूर्वक स्थापन करके फिर दूसरे स्थानके अंकोके साथ मिला दे।

$$\frac{(\text{शक} \times ११ \times ४) + ८५८९}{३७५०} + \text{शकः} \div ६० \text{ बार्हस्पत्यवर्षादिफल।}$$

क्रिया यथा—शक—शक—१८१३ सौरवर्षमें—

$$\frac{(१८१३ \times ११ \times ४) \times ८५८९}{३७५०} + \text{शक} \div ६० \text{ बार्हस्पत्यवर्षादिफल।}$$

१८१३×११×४=७९७७२।७९७७२+८५८९=८८३६१। ८८३६१÷३७५० = वर्षादि २३।६।२२।२९।२१।३६।१८१३+२३।६।२२।२९।२१।३६=१८३६।६।२२।२९।२१। ३६॥ १८३६। ६। २२ २६९। २१। ३६÷६०=३० (अवशिष्ट—बार्हस्पत्यवर्ष) अवशिष्ट। ३६ ६।२२।२९। २१। ३६, इसको पांचसे ाभाग करनेपर ७ (लब्धभागफल—युग) इससे जाना गया कि, प्रभवादि ६० वत्सरके ३६ नं. वर्ष गत होकर ३७ नं. वर्षके ६ मास, २२ दिन, २९ दण्ड, २१ पल, ३६ विपल बीते हैं, और पञ्च लब्धफल ७ हैं, इसमें विष्णु-आदि युगके ७ नं. युग बीतकर ८ नं. युग वर्त्तमान और यही युगके ११।६।२२।२९। २१।३६। वर्षादि बीते हैं। यह १८१३ शाकेमें वैशाखके प्रारंभका गणित है।

* $$\frac{\text{षष्टयब्द} \times ९ \times (\text{षष्टयब्द} + १२)}{४} = \text{बृहस्पतिका भोग्यमान नक्षत्र।}$$

क्रिया यथा—३६ ।६।२२।२९।२१।३६ । बार्हस्पत्य षष्टयब्दादि।

$$\frac{३६ \times ९ + (३६ \div १२)}{४} = ३६+९=३२४।३६\div १२=३।३२४+३।३२७।३२७\div ४=८१\tfrac{३}{४}$$

२७ नक्षत्रमें भचक्र होनेसे २७+८१ अवशिष्ट ३ हैं बस जाना गया कि, इस समय—

समझना पड़ेगा कि २५वां नक्षत्र अर्थात् पूर्वाभाद्रपदा नक्षत्र है, २ होवे तो २६वां उत्तराभाद्रपदा इत्यादि ।।२२।। प्रभवादि षष्टि संवत्सरमें सब समेत ११ युग होते हैं, बस पांच-पांच वर्षका एक एक युग होता है। इस द्वादश युगोंके यथाक्रमसे अधिपति, १ विष्णु २ सुरेज्य, ३ बलभित, ४ अग्नि, ५ त्वष्टा, ६ उत्तरप्रोष्ठपद, ७ पितृगण, ८ विश्व, ९ सोम, १० शक्रानल, ११ अश्वि और १२ भग। इन युगाधिपतियोंके नामानुसारही इन युगोंका नाम होता है, यथा नारायण, बृहस्पति, इन्द्र, अग्नि इत्यादि ।।२३।। यह युग सबके अन्तर्वर्ती पांच २ वर्षमें फिर पांच संज्ञान्तर्युक्त पांच वर्ष हैं+ यह साठ संवत्सरके अंतर्गत नहीं है) उनके नामान्तर और उनके अधिपतियोंके नाम यथा;–१ संवत्सर, २ परिवत्सर, ३ इदावत्सर, ४ अववत्सर ५ इद्वत्सर । अधिपति १ अग्नि, २ सूर्य, ३ चंद्र, ४ प्रजापति, ५ महादेव ।।२४।। यह जो संवत्सरादि पांच वर्षका वर्णन किया गया इसके प्रथम वर्षमें वृष्टि होती है, दूसरे वर्षके आरंभमें वृष्टि होती है, तीसरे वर्षमें अतिवृष्टि होती है, चतुर्थके शेषमें वृष्टि होती है, पञ्चम वर्षमें साधारण वृष्टि होती है ।।२५।। पहिले जो बारह युगका वर्णन कर आये हैं, इसके मध्यमें जो प्रथम चार युग हैं जिनके पति विष्णु, इन्द्र, बृहस्पति और अग्नि हैं यह चार युग सबसे अच्छे हैं। तिसके पीछेके अर्थात् बीचके चार युग मध्यम हैं और अंतके चार युगका मध्यम फल जानना ।।२६।। जिस, समय बृहस्पति धनिष्ठा नक्षत्रके प्रथमांशमें प्राप्त होकर माघमासमें उदित होंगे तिस कालही षष्टि संवत्सरके प्रथम प्रभवनामक वर्षका आरंभ होगा। यह वर्ष प्राणियोंका हितकारक है ।।२७।। प्रभवनामक वर्षके वर्त्तमान होनेपर यद्यपि किसी स्थानमें अनावृष्टि होती है किसी २ स्थानमें वायु वा अग्निका कोप होता है, किसी स्थानमें ईतिभय और किसी स्थानमें श्लेष्माकी पीडा होती है, तथापि इस वर्षमें प्राणियोंको विशेष दुःख नहीं होता ।।२८।। दूसरे वर्षका नाम विभव है, तीसरा शुक्ल, चौथा प्रमोद और पञ्चम वत्सरका नाम प्रजापति है। यह समस्त वर्ष उत्तरोत्तर शुभफलके देनेवाले हैं। इन वर्षोंमें राजालोग इस प्रकारसे पृथ्वीका पालन करते हैं कि, उनके शासनके गुणसे पृथ्वी धान्य, ईख और यवादि नाजकी फलनेवाली और भयशून्य शत्रुताहीन और हर्षित मनुष्योंसे युक्त हो कलियुगके दोषोंसे छूट जाती है ।।२९।।३०।। दूसरे युगमें (बृहस्पति युगमें) जो पांच वत्सर हैं उनके नाम–अंगिरा, श्रीमुख, भाव, युवा और धाता। तिनमें प्रथमके तीन वर्ष कुछ एक अच्छे हैं और दो समभाववाले हैं ।।३१।। अंगिरा आदि तीन वर्षोंमें देवतालोग भली भांति जल वर्षाते हैं और आदमी निरांतक व निर्भय होते हैं, पिछले दो वर्षमें यद्यपि कृषि समभावसे होती है परंतु रोग और समर होना है ।।३२।। बृहस्पतिके विचरणसे

–बृहस्पति २४ वें नक्षत्रमें वर्त्तमान हैं और लब्ध ८१ होकर ३ बचे थे इस कारण २४ वें नक्षत्रके तीसरे पादमें उत्तीर्ण होकर चौथे चरणमें वर्त्तमान हैं यह स्थूल है, कभी २ विस्तारभयसे यहां नहीं लिखा। ।

+ वराहमिहिरके मतसे युगारम्भसेही यह वत्सरारम्भ होता है. प्रसिद्ध स्मार्त रघुनन्दनभट्टाचार्यके मतसे वैशाखमासके प्रारंम्भसे ही यह वर्ष आरंभ होता है. उनके मतसे इन वर्षोंमें तिलादिका दान करना चाहिये, "सवत्सरे तथा दान" इत्यादि मलमासतत्त्व बल्लालसेन प्रणीत दानसागर ग्रंथका भी यही मत है।।

ऐन्द्रनामक जो तीसरा युग होता है उसके प्रथम वर्षका नाम १ ईश्वर २ बहुधान, ३ प्रमाथी, ४ विक्रम और पांचवेंका नाम वृष है ।।३३।। इसमें पहला और दूसरा वर्ष शुभदायी है, वरन प्रजाके लोगोंको तो मानो सतयुगही हो जाता है। प्रमाथी वर्ष अत्यन्त पापदायक है। विक्रम और वृष नामक दो वर्ष सुभिक्षदायक तो हैं परंतु रोग और भयके करनेवाले हैं ।।३४।। चतुर्थ (हुताश नामक) युगका प्रथम वर्ष जिसका नाम चित्रभानु है, अत्युत्तम फलको देनेवाला है। दूसरा वर्ष सुभानु मध्यमफली है अर्थात् रोगदायी है। परंतु मृत्युदायक नहीं है। पांचवें वर्षका नाम तारण है (किसी किसीके मतसे दारुण) इसमें अत्यंत वृष्टि होती है। चौथे वर्षका नाम पार्थिव है, इसमें धान्य बढनेसे हर्ष होता है। पांचवें वर्षका नाम व्यय है, इस वर्षमें प्राणियोंको काम उद्दीप्त होता है, वह उत्सव-युक्त होकर शोभायमान होते हैं ।।३५।। ।।३६।। त्वाष्ट्र नामक पञ्चम युगके प्रथम वर्षका नाम सर्वजित् २ सर्वधारी, ३ विरोधी, ४ विकृत, ५ खर इन पांच वर्षोंमें दूसरा वर्ष मंगलकारी है और शेष भयके कारण हैं ।।३७।। प्रोष्ठप्रद नामक छठे युगमें प्रथम वर्षका नाम नन्दन है, २ विजय, ३ जय, ४ मन्मथ और पांचवां दुर्मुख है। इन पांच वर्षोंमें प्रथमसे लेकर तीन मनोहर हैं, मन्मथ वत्सर समफली और पञ्चम वत्सर अत्यंत अधम हैं ।।३८।। बृहस्पतिकी गतिके वशसे सप्तम (पितृ) युगका प्रथम वर्ष हेमलम्ब, २ विलम्बी, ३ विकारी ४ शर्वरी, ५ प्लव है। इसके प्रथम वर्षमें ईतिभय और झंझा-वायुका भय होता है, झंझावायुके साथमें पानीभी वर्षता है तदुपरान्त दूसरे वर्षमें धान्य और वृष्टिकी अल्पता होती है। तीसरे वर्षमें अत्यन्त घबड़ाहट और अत्यन्त वर्षा होती है. चौथे वर्षमें दुर्भिक्षका भय और प्लव वर्षमें अत्यन्त सुवृष्टि व शुभ होता है ।।३९।। ।।४०।। वैश्व युगमें प्रथम वर्षका नाम क्षोभकृत् २ शुभकृत् ३ क्रोधी, ४ विश्वावसु, ५ पराभव इसका प्रथम और दूसरा वर्ष प्रजाओंको प्रसन्न करनेवाला, है,. तीसरा वर्ष बहुत दोषोंका देनेवाला है और शेष दो संवत्सर समफली है, परंतु पराभव वर्षमें अग्नि, शस्त्र, रोग पीडा और गौ ब्राह्मणोंको पीडा होती है ।।४१।।४२।। नवम (सौम्य) युगमें प्रथम वर्षका नाम प्लवंग, २ कीलक. ३ सौम्य, ४ साधारण, पञ्चम रोधकृत् है. तिसमें कीलक और सौम्य वत्सर अत्यंत शुभदाई हैं ।।४३।। प्लवंग वर्षमें प्रजाओंको अत्यन्त कष्ट होता है. साधारण वत्सरमें साधारण वृष्टि और ईतिभय होता है ! और पञ्चम वर्ष जिसका नाम रोधकृत् है, इसमें सुंदर वृष्टि और धान्यकी सम्पत्ति होती है ।।४४।। शक्राग्निदैवत जो दशम युग हैं, तिसके प्रथम वर्षका नाम परिधावी, दूसरा प्रमादी, ३ आनंद, ४ राक्षस. ५ अनल है, तिसमें परिधावी नामक वत्सरमें मध्यदेशका नाश, राजाकी हानि, साधारण वृष्टि और अग्निका भय होता है, प्रमादी वर्षमें लोग अत्यन्त आलसी होते हैं. उलट पुलट होता है. लालवर्णके फूलोंके बीजका नाश हो जाता है, आनंदवर्ष आनंदका देनेवाला और राक्षस वा अनल वत्सरमें क्षय होती है, परंतु विशेषता यह है कि राक्षस वर्षमें ग्रीष्मकालके धान्य उत्पन्न होते हैं, और अनलवर्ष अग्नि कोपका दाता और नरकदाई है ।।४५।। ४६।।४७।। एकादश (अश्वि) युगमें १ पिंगल, २ कालयुक्त, ३ सिद्धार्थ, ४ रौद्र, ५ दुर्मति ये पांचवर्ष होते हैं, इनमेंसे पहिले वर्षमें अत्यन्त वर्षा, चोरभय, श्वास और ठोडीको कम्पायमान करनेवाली खांसी होती है। कालयुक्त वर्ष अत्यन्त दोषकारी है। सिद्धार्थवर्षमें अनेक गुण होते हैं। रौद्रवर्ष अत्यंत रौद्र और क्षयकारी है। और दुर्मतिवर्ष

मध्यम वृष्टिका करनेवाला है ।।४८।।४९।। भगाधिदैवत बारहवें युगमें प्रथम वर्षका नाम दुंदुभि है, यह धान्यका अत्यन्त बढानेवाला है। तदुपरान्त दूसरा उद्गारी नामक वर्ष (दूसरे मतसे रुधिरोद्गारी) राजाका क्षय और असमान वृष्टि होती है। तीसरे वर्षका नाम रक्ताक्ष है, इस वर्षमें डसनेका भय और रोग होता है। चौथे अब्दका नाम क्रोध है। यह क्रोधकारी है और झगडे कराकर जनपदोंको शून्य कर देता है। इस बारहवें युगके पिछले वर्षका नाम क्षय है, यह क्षयकारक है, ब्राह्मणोंको भयदायी, खेतीके बलको बढानेवाले, पराये धनके हरनेवाले, वैश्य और शूद्रोंकी वृद्धि करता है. इस प्रकार संक्षेपसे साठ संवत्सर का समस्त फल कहा गया ।।५०।।५१।।५२।। देवताओंके गुरु बृहस्पतिजी जो निर्मल किरणवाले हों, स्थूलमूर्ति, कुमुद, कुन्दपुष्प, वा बिल्लौरे पत्थरके समान कांतिवाले हों किसी ग्रहसे भेदित न होकर श्रेष्ठ मार्गमें चलते हों तो मनुष्योंको हितकारी होते हैं ।।५३।।

इति श्रीवराहमिहिराचार्यविरचितायां वृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायामष्टोऽध्यायः ।।८।।

अथ नवमोऽध्यायः

शुक्रचारः

नागगजैरावतवृषगोजरद्गवमृगाजदहनाख्याः । अश्विन्याद्याः कैश्चित् त्रभाःक्रमाद्वियः कथिताः ।। १ ।। नागा तु पवनयाम्यानलानि पैतामहात्त्रिभात्तिस्रः । गोवीथ्यामश्विन्यः पौष्णं द्वे चापि भद्रपदे ।। २ ।। जारद्गव्यां श्रवणात्त्रिभं च मैत्राद्यम् । हस्तविशाखात्वाष्ट्राण्येजेत्यषाढाद्वयं दहना ।। ३ ।। तिस्रस्तिस्रस्तासां क्रमादुदङमध्ययाम्यमार्गस्थाः । तासामप्युत्तरमध्यदक्षिणावस्थितैकैका ।।४।। वीथीमार्गानपरे कथयन्ति यथा स्थिता भमार्गस्य । नक्षत्राणां तारा यम्योत्तरमध्यमास्तद्वत् ।।५।। उत्तरमार्गो याम्यादि निगदितो मध्यमस्तु भाग्याद्यः । दक्षिणमार्गोऽषाढादि कैश्चिदेवं कृता मार्गाः ।। ६ ।। ज्योतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यस्माकम् । स्वयमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये ।।७।। उत्त (उत्तरवीथिषु शुक्रः सुभक्षशिवकृद्गतोऽस्तमुदयं वा मध्यासु मध्यफलदः कष्ट दक्षिणस्थासु ।।८।। अत्युत्तमोत्तमोनं सममध्यन्यूनमधमकष्टफलम् । कष्टतमं सौम्याद्यासु वीथिषु यथाक्रमं ब्रूयात् ।।९।। भरणी पूर्वं मण्डलमृक्षचतुष्कं सुभिक्षकरमाद्यम् । वङ्गाङ्गहिषबाह्लिककलिङ्गदेशेषु भयजननम् ।।१०।। अत्रोदतमारोहेद्ग्रहोऽपरो यदि सितं ततो हन्यात् । भद्राश्वशूरसेनकयौधेयककोटिवर्षनृपान् ।।११।। भचतुष्टयमार्द्राद्यं द्वितीयममिताम्बुसस्यसम्पत्त्यै । विप्राणामशुभकरं विशेषतः क्रूरचेष्टानाम् ।।१२।। अन्येनात्राक्रान्ते म्लेच्छाटविकाश्वजीविगोमन्तात् । गोनर्दनीचशूद्रान् वैदेहांश्चानयः स्पृशति ।।१३।। विचरन् मघादिपञ्चकमुदितः सस्यप्रणाशकृच्छुक्रः । क्षुत्तस्करभयजननो नीचोन्नतिसंकरकरश्च ।।१४।। पित्र्याद्येऽवष्टब्धो हन्त्यन्ये नाविकाञ्छब-

रशूद्रान्। पुण्ड्रापरान्त्यशूलिकवनवासिद्रविडसामुद्रान् ॥१५॥ स्वात्याद्यं भत्रितयं मण्डलमेतच्चतुर्थमभयकरम्। ब्रह्मक्षत्रसुभिक्षाभिवृद्धये मित्रभेदाय ॥१६॥ अत्राक्रान्ते मृत्युः किरातभर्तुः पिनष्टि चेक्ष्वाकून्। प्रत्यन्तावन्तिपुलिन्दतङ्गणाञ्छूरसेनांश्च ॥१७॥ ज्येष्ठाद्यं पञ्चर्क्षं क्षुतस्कररोगदं प्रबाधयते। काश्मीराश्मककत्स्यान् सचारुदेवीमवन्तींश्च ॥१८॥ आरोहेऽत्राभीरान् द्रविडाम्बष्ठत्रिगर्तसौराष्ट्रान्। नाशयति सिन्धुसौवीरकांश्च काशीश्वरस्य वधः ॥१९॥ षष्ठं षण्नक्षत्रं शुभमेतन्मण्डलं धनिष्ठाद्यम्। भूरिधनगोकुलाकुलमनल्पधान्यं क्वचित् सभयम् ॥२०॥ अत्रारोहे शूलिकगान्धारावन्तयः प्रपीडयन्ते। वैदेहवधः प्रत्यन्तयवनशकदास परिवृद्धिः ॥ २१ ॥ अपरस्यां स्वात्याद्यं ज्येष्ठाद्यं चापि मण्डलं शुभदम्। पित्र्याद्यं पूर्वस्यां शेषाणि यथोक्तफलदानि ॥२२॥ दृष्टोऽनस्तगतेऽर्के भयकृत् क्षुद्ररोगकृत् समस्तमहः। अर्धदिवसं च सेन्दुर्नृपबलपुरभेदकृच्छुक्रः ॥२३॥ भिन्दन् गतोऽनलर्क्षं कूलातिक्रान्तवारिवाहाभिः। अव्यक्ततुङ्गनिम्ना समा सरिद्भिर्भवति धात्री ॥२४॥ प्राजापत्ये शकटे भिन्नेकृत्वेव पातकं वसुधा। केशास्थिशकलबला कापालमिवव्रतं धत्ते ॥ २५ ॥ सौम्योपगतो रसस्यङ्क्षयायोशना समुद्दिष्टः। आर्द्रागतस्तु कोशलकलिङ्गहा सलिलनिकरकरः ॥२६॥ अश्मकवैदर्भाणां पुनर्वसुस्थे सिते महाननयः। पुष्ये पुष्टा वृष्टिर्विद्याधरगणविमर्दश्च ॥२७॥ आश्लेषासु भुजङ्गमदारुणपीडावहश्वरञ्छुकः। भिन्दन् मघां महामात्रदोषकृद्भूरिवृष्टिकरः ॥२८॥ भाग्ये शबरपुलिन्दप्रध्वंसकरोऽम्बुनिवहमोक्षाय। आयम्णे कुरुजाङ्गलपाञ्चालघ्नः सलिलदायी ॥२९॥ कौरवचित्रकराणां हस्ते पीडाजलस्य च निरोधः। कूपकृदण्डजपीडा चित्रास्थे शोभना वृष्टिः ॥ ३० ॥ स्वातौ प्रभूतवृष्टिर्दूतवणिगूनाविकान् स्पृशत्यनथः। ऐन्द्राग्नेऽपि सुवृष्टिर्वणिजां च भयंविजानीयात् ॥ ३१ ॥ मैत्रे क्षत्रविरोधो ज्येष्ठायां क्षत्रमुख्यसन्तापः। मौलिकभिषजां मूले त्रिष्वपि चैतेष्वनावृष्टिः ॥ ३२ ॥ आप्ये सलिलजपीडा विश्वेशे व्याधयः प्रकुप्यन्ति। श्रवणे श्रवणव्याधिः पाषण्डिभयं धनिष्ठासु ॥ ३३ ॥ शतभिषजि शौण्डिकानामजैकपे द्यूतजीविनां पीडा। कुरुपाञ्चालानामपि करोति चास्मिन् सितः सलिलम् ॥ ३४ ॥ अहिर्बुध्न्ये फलमूलतापकृद्यायिनां च रेवत्याम्। अश्विन्यां हयपानां याम्ये तु किरातयवनानाम् ॥ ३५ ॥ चतुर्दशे पञ्चदशे तथाष्टमे तमिस्रपक्षस्य तिथौ भृगोः सुतः। यदा व्रजेद्दर्शनमस्तमेति वा तदा मही वारिमयीव लक्ष्यते ॥ ३६ ॥ गुरुर्भृगुश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगौ यदा। तदा प्रजा रुग्भयशोकपीडिता न वारि पश्यन्ति पुरन्दरोज्झितम् ॥ ३७ ॥ यदास्थिता जीवबुधारसूर्यजाः सितस्य सर्वेऽग्रपथानुवर्तिनः। नृनागविद्याधरसङ्गरास्तदा भवन्ति वाताश्च समु-

च्छ्रुतान्तकाः ।। ३८ ।। न मित्रभावे सुहृदो व्यवस्थिताः क्रियासु सम्यङ् न रता द्विजातयः न चाल्पमप्यम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भूभृताम् ।। ३९ ।। शनैश्चरे म्लेच्छबिडालकुञ्जराःखरा महिष्योऽसितधान्यशूकराः । पुलिन्दशूद्राश्च सदक्षिणापथाः क्षयं व्रजन्त्यक्षिमरुद्गदोद्भवैः ।। ४० ।। निहन्ति शुक्रःक्षितिजेऽग्रतःप्रजा हुताशशस्त्रक्षुदवृष्टितस्करैः चराचरं व्यक्तमथोरापंथं दिशोऽग्निविद्युद्रजसा च पीडयेत् ।। ४१ ।। बृहस्पतौ हन्ति पुरःस्थिते सितः सितं समस्तं द्विजगोसुरालयान् । दिशं च पूर्वां करकासृजोऽम्बुदा गले गदा भूरि भवेच्च शारदम् ।। ४२ ।। सौम्योऽस्तोदययोः पुरो भृगुसुतस्यावस्थिततत्तोयकृद् रोगान् पित्तजकामलां च कुरुते पुष्णाति च ग्रैष्मिकम् । हन्यात् प्रव्रजिताग्निहोत्रिक-भिषग्रङ्गोपजीव्यान् हयान् वैश्यान् गाः सह वाहनैर्नरपतीन् पीतानि पश्चाद्दिशम् ।।४३।। शिखिभयमनलाभे शस्त्रकोपश्च रक्ते कनकनिकषगौरे व्याधयो दैत्यपूज्ये । हरितकपिलरूपे श्वासकासप्रकोपः पतति न सलिलं खाद्भस्मरूक्षामिताभे ।। ४४ ।। दधिकुमुदशशांककान्तिभृत् स्फुटविकसत्किरणो बृहत्तनुः ।। सुगतिरविकृतो जया-न्वितः कृतयुगरूपकरः सिताह्वयः ।। ४५ ।।

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां शुक्रचारो नवमोऽध्यायः ।। ९ ।।

कोई कोई पंडित कहते हैं कि अश्विनी आदि तीन तीन नक्षत्रोंमें एक एक [1]वीथि होती है. यह वीथिमें नौ भागोंमें बांटी गई है, यथा–१ नाग, २ गज, ३ ऐरावत, ४ वृषभ, ५ गौ, ६ जरद्गव, ७ मृग, ८ अज और ९ दहन है ।।१।। किसीके मतसे स्वाती, भरणी और कृतिका नक्षत्रमें नागवीथि होती है. गज, ऐरावत और वृषभ नामक जो तीन वीथि हैं, यह रोहिणीसे उत्तराफाल्गुनी तक तीन तीन नक्षत्रमें हुआ करती हैं और अश्विनी, रेवती, पूर्वाभाद्रपदा और उत्तराभाद्रपदा नक्षत्रमें गोवीथि हुआ करती है ।।२।। श्रवण, धनिष्ठा और शतभिषा नक्षत्रमें जारद्गवी वीथि होती है, अनुराधा, ज्येष्ठा और मूल नक्षत्रमें मृगवीथि होती है; हस्त, विशाखा और चित्रा नक्षत्रमें अजवीथि और पूर्वाषाढा व उत्तराषाढा नक्षत्रमें दहना वीथि हुआ करती है ।।३।। इस प्रकार सताईस [2]नक्षत्रमें नौ वीथि होनेपर प्रत्येक वीथिही तीन वार होती है; इस कारण इन सब वीथियोंमें तीन तीन वीथि सूर्यमार्गके उत्तर, मध्य और दक्षिण मार्गमें विराजमान हैं, फिर उनमें एक एक यथाक्रमसे उत्तर, मध्य और दक्षिणपथमें विराजमान हैं, जैसे तीन नागवीथि हैं, तिनमें उत्तरमार्गस्था, दूसरी मध्यस्था और तीसरी दक्षिणमार्गमें स्थित है ।।४।। कोई कोई महात्मा कहते हैं कि सब नक्षत्रोंके नक्षत्र मार्गवर्ती योग तारागण उत्तर, मध्य और दक्षिणभागमें जैसे विराजमान हैं, समस्त वीथिमार्ग भी वैसेही विराजमान हैं ।।५।। किसी किसी पंडितके मतसे भरणीसे उत्तरमार्ग, पूर्वाफाल्गुनीसे मध्यममार्ग और पूर्वाषाढासे

---

१ गतिके अनुसार पन्थविशेषका नाम वीथि है ।

२ किस नक्षत्रमें कितने योगतारे हैं सो नक्षत्रगुणाध्यायमें कहेंगे ।

दक्षिणमार्गका आरंभ होता है ॥६॥ ज्योतिष आगमशास्त्र अर्थात् संदेहपूर्वक किसी बातकी मीमांसा करना मेरी (मुझ सरीखे आदमीके) सामर्थ्यसे बाहर है, इस कारण (ऋषिलोगोंमें किसीके मतको दोष देकर या किसीके मतकी पोषकता न करके) बहुतोंके मतको प्रकट करूँगा ॥७॥ जिस समय शुक्राचार्य उत्तरवीथिमें विराजमान होकर उदय या अस्त होंगे, तबही सूभिक्ष या मंगल होगा, मध्यवीथिमें होनेसे मध्यम फल और दक्षिणवीथिमें होनेसे कष्टकारी फल होता है ॥८॥ आर्द्रा नक्षत्रसे आरंभ करके मृगशिरातक जो नौ वीथियें हैं तिनमें शुक्रका उदय या अस्त होनेसे यथा क्रमसे अत्युतम, उत्तम, ऊन. सम, मध्य, न्यून, अधम, कष्ट और कष्टतम फल उत्पन्न होता है ॥९॥ भरणीसे लेकर चार नक्षत्रमें जो मंडल अर्थात् वीथि हो उसकी प्रथम वीथिमें शुक्रका उदय या अस्त होनेसे सुभिक्ष होता है, परंतु अंग, वंग, महिष बाह्लिक और कलिंग देशमें भय होता है ॥१०॥ इस प्रथम मण्डलमें उदित शुक्राचार्यके ऊपर जो कोई ग्रह हो तो भद्राश्च, शूरसेनक, यौधेयक और कोटिवर्ष देशके राजाका नाश होता है ॥११॥ आर्द्रासे लेकर जो चार नक्षत्र हैं उनको दूसरा मंडल कहते हैं. (इनमें शुक्रका उदय या अस्त होनेसे) इससे बहुतसा जल वर्षता है और यह धान्य संपत्तिका निमित्त है. परंतु ब्राह्मणोंको अशुभ होता है, विशेष करके जो लोग क्रूर चेष्टावाले हैं उनकी विशेष हानि है ॥१२॥ दूसरे मंडलवाले शुक्र को यदि कोई आक्रमण करे तो म्लेच्छ, आटविका, अश्वजीवी अर्थात् बनजारे इत्यादि, गोमन्त (कुत्तोंसे आजीविका रखनेवाले), बहुतसी गायें रखनेवाले नीच शूद्र और विदेह-देशके रहनेवालोंको अनीति स्पर्श करती है ॥१३॥ मघासे लेकर चित्रातक पांच नक्षत्रमें घूमते २ यदि शुक्राचार्य उदय होवें तो समस्त धान्यका नाश होता है. क्षुधाभय और चोर भय होता है. नीचोंकी उन्नति और वर्णसंकरजातिकी उत्पत्ति होती है ॥१४॥ इन मघादि तीसरे मंडलके दैत्यगुरु यदि और किसी ग्रहसे रुक जाय तो पेडोंके समूह शबर, शूद्र, पुण्ड्र, पश्चिमकी सीमाका अन्न, शूलिक, वनवासी, द्रविड, समुद्रके पुरुषोंका नाश हो जाता है ॥१५॥ स्वाती, विशाखा और अनुराधा नक्षत्रमें चौथा मण्डल होता है. इसमें शुक्राचार्यके प्रयाण करनेसे अभय होता है, ब्राह्मण और क्षत्री जातिके लिये सुभिक्ष होता है, परंतु मित्रोंमें परस्पर भेद हो जाता है ॥१६॥ यह चौथा मंडल आक्रांत हो जाय तो किरातराजाकी मृत्यु होती है और इक्ष्वाकुवंशवाले और प्रत्यन्त वा अवन्तिदेशके रहने वाले, पुलिन्द, तंगण और शूरसेनवासी लोग पोषित होते हैं ॥१७॥ ज्येष्ठासे लेकर श्रवणतक जो पांच नक्षत्र हैं तिनमें पांचवां मण्डल है, इसमें क्षुधा, चोर, और रोगकी बाधा होती है, जो भृगुके पुत्र इसमें आरोहण करें तो काश्मीर, अश्मक, मत्स्य, चारुदेवी और अवन्तीदेशके रहनेवाले मनुष्य, आभीरजाति, द्रविड, अम्बष्ठ, त्रिगर्त्त, सौराष्ट्र, सिन्धु और सौवीर देशके पुरुष और काश्मीरके राजाका विनाश होता है ॥१८॥१९॥ धनिष्ठासे लेकर अश्विनीतक जो छः नक्षत्र हैं उनको छठा मंडल कहते हैं, ये शुभकारक हैं. इसमें समस्त लोग बहुतसे धन धान्य और गायढोरोंसे युक्त होकर अत्यंत सुखी होते हैं परंतु कोई स्थान सभय होता है, इसमें शुक्रका आरोहण होनेपर शूलिक, गांधार और अवन्तीके रहनेवाले लोग पीडित होते हैं; विदेह नरपतिका नाश और प्रत्यन्तदेशके यवन, शक और दासलोगोंकी वृद्धि होती है ॥२०॥२१॥ जिन छः मण्डलोंका वर्णन किया गया उनमें स्वाती नक्षत्रादि और ज्येष्ठानक्षत्रादि जो दो मण्डल होते हैं, यह दोनों मण्डल

पश्चिमदिशामें होनेसे शुभकारक हैं और मघानक्षत्रादि जो एक मण्डल है वह पूर्व दिशाम होनेपर अत्यंत शुभदायी हैं। शेष मण्डल यथोक्त फलके देनेवाले हैं ॥२२॥ सूर्य अस्त होनेके पहिले शुक्रके दृष्टि आनेसे भय होता है, सारे दिन दिखाई देनेसे क्षुधा और रोग होता है आधे दिन दिखाई देनेसे वा चंद्रमाके साथ दिखाई देनेसे राजा लोगोंका, सेनाका और नगरका भेद होता है ॥२३॥ कृत्तिकानक्षत्र भेदकरके शुक्राचार्य गमन करें तो कुलातिक्रांत जलराशिवाहिनी नदियोंके द्वारा पृथ्वीके ऊंचे नीचे स्थान अप्रकाशित होकर समान हो जाते हैं अर्थात् बडी भारी बाढ आती है ॥२४॥ शुक्रसे रोहिणी नक्षत्र वा शंकट[1] भिन्न हो (पापी लोग जिस प्रकार पापका प्रायश्चित्त करनेके लिये कापालिक व्रत धारण करते हैं तैसेही) तो पृथ्वी केश और अस्थियोंके टुकडोंसे अनेक रंगोंको धारण करके मानो पाप करनेके उपरांत कपाल व्रत धारण करती अर्थात् अत्यंत मरी पडती है ॥२५॥ उतना मृगशिरा नक्षत्रमें आवे तो जल और धान्यका नाश हो। आर्द्रा नक्षत्रमें गमन करे तो कौशल और कलिंग देशका नाश होता है। परंतु वृष्टि बहुत होती है ॥२६॥ पुनर्वसु नक्षत्रमें शुक्राचार्यके गमन करने पर अश्मक और विदर्भ देशके रहनेवाले मनुष्योंमें अत्यन्त अनीति आती है। पुष्य नक्षत्रमें गमन करनेपर अनेक वृष्टि होती है परंतु विद्याधरोंमें विमर्द हुआ करता है ॥२७॥ आश्लेषा नक्षत्रमें सूर्यके गमन करनेसे सर्पभय और अत्यन्त पीडा होती है। मघानक्षत्र भेद करनेपर हस्तिपक लोगोंसे दुष्ट करता है और अत्यन्त वृष्टि होती है ॥२८॥ पूर्वाफाल्गुनी नक्षत्र शुक्रसे भिन्न हो तो शबर पुलिन्दगण नाशको प्राप्त होते हैं। वृष्टि बहुत होती है, उत्तराफाल्गुनी भिन्न हो तो वर्षा होती है और कुरुजांगल व पांचालदेशका नाश हो जाता है ॥२९॥ यदि हस्त नक्षत्र शुक्रसे भिन्न हो तो कौरव और चित्रकारोंको पीड़ा होती है., जल नहीं वर्षता। चित्रा नक्षत्र शुक्रसे भिन्न हो तो कूपकारक और अण्डजोंको पीडा होती है; वृष्टि शोभती हुई होती है ॥३०॥ स्वाती नक्षत्रमें शुक्र आवे तो वर्षा हो और दूत, वणिक् और नाविक लोगोंको अत्यन्त अनीति स्पर्श करे। विशाखामें शुक्र हो तो सूवृष्टि और बनियोंको भय होता है ॥३१॥ अनुराधामें क्षत्रीवध, ज्येष्ठामें प्रधान क्षत्रियोंको संताप, मूलमें प्रधान वैद्योंको पीडा होती है, और जितने दिनतक इन तीन नक्षत्रोंमें शुक्र रहता है तबतक अनावृष्टि होती है ॥३२॥ जो पूर्वाषाढा नक्षत्रमें शुक्र गमन करे तो जलसे उत्पन्न हुए जीवोंको पीडा होती है, उत्तराषाढामें व्याधि, श्रवणमें कर्णपीडा और धनिष्ठामें पाखण्डियोंको भय होता है, ॥३३॥ शतभिषा नक्षत्रमें शुक्रका गमन हो तो कलवार लोगोंको पीडा होती है, पूर्वाभाद्रपदामें ज्वारियोंको, कुरुपांचालोंको पीडा और वृष्टि होती है ॥३४॥ उत्तराभाद्रपदामें फल और मूल, रेवतीमें पदातिक, अश्विनीमें अश्वपालक और भरणीमें किरात व यवन लोगोंको ताप होता है ॥३५॥ कृष्णपक्षकी चतुर्दशी पञ्चदशी वा अष्टमी तिथिमें जो शुक्रका उदय या अस्त हो तो पृथ्वीपर बहुतही जल वर्षता है ॥३६॥ यदि गुरु और शुक्र पूर्व पश्चिममें परस्परसा तवीं राशिमें गति हो तो रोग और भयसे प्रजागण अत्यन्त पीडित होती है, वृष्टि नहीं होती है ॥३७॥ बृहस्पति, बुध, मंगल और

---

१ "वृषे सप्तदशे भागे यस्य याम्योऽशकद्वयात्। विज्ञेयोऽभ्यधिको भिन्द्याद् रोहिण्याः शकटं तु सः। सूर्यसिद्धांते नक्षत्रग्रहयुत्यधिकारे ॥

शनि यह सब ग्रह यदि शुक्रके आगेके मार्गमें चलें तो मनुष्य, नाग और विद्याधरोंमें युद्ध होता है, और वायुसे विनाश होता है, बंधु लोग परस्पर मित्रभाव नहीं रखते, द्विजाति लोग अपनी क्रियाको छोड देते हैं, इंद्रसाधारण जलभी नहीं वर्षता वरन वज्र गिराकर पर्वतोंके मस्तक फोड देता है ॥३८॥३९॥ जब शनैश्चर शुक्रके आगे चले तो म्लेच्छ-जाति, बिलावजाति हाथी, गधा, भैंस, काले धान, शूकर, पुलिन्द जाति, शूद्रगण और दक्षिणदेश नेत्र और वायुसे उत्पन्न हुए रोगोंसे नाशको प्राप्त हो जाते हैं ॥४०॥ यदि शुक्रके आगे मंगल गमन करता हो तो अग्नि, शस्त्र क्षुधा, अवृष्टि और तस्करोंसे समस्त प्रजाको पीडा होती है, उत्तरदिशा नाशको प्राप्त हो जाती है, और अग्नि, बिजली और धूरिसे सब दिशा पीडित होती हैं ॥४१॥ शुक्रके आगे मार्गमें जो बृहस्पतिका गमन हो सो समस्त मधुर पदार्थ, ब्राह्मण, ढोर, देवताओंके स्थान और पूर्वदिशा नाशको प्राप्त हो जाती है, मेघ ओले बरसाते हैं, सब लोगोंके गलेमें पीडा होती है और शारदीय समस्त धान्य उत्पन्न होते हैं ॥४२॥ शुक्रके उदय या अस्तकालमें शुक्रके आगेके मार्गमें जब बुध रहता है तब वर्षा और रोग होते हैं, परंतु तिसमें पित्तसे उत्पन्न हुए रोग तथा कामला रोग अधिक होता है, ग्रीष्म ऋतुमें उत्पन्न होनेवाले सब द्रव्य अधिकाईसे उत्पन्न होते हैं, संन्यासी, अग्निहोत्री, वैद्य नृत्यसे आजिविका करनेवाले, अश्व, वैश्व, गौ वाहनोंके साथ राजा, पीले वर्णके पदार्थोंका और पश्चिम दिशाका नाश हो जाता है ॥४३॥ जिस समय अग्निके समान शुक्रका वर्ण हो तब अग्निभय, रक्तवर्ण हो तो शस्त्रकोप और कसौटीपर घिसे हुए सुवर्णकी रेखाकी नांई गौरवर्ण हो तो व्याधि होती है, यदि शुक्र हरित और कपिलवर्ण हो तो दमा और खांसीका रोग होता है, और भस्मके समान रूखा या काला रंग हो तो आकाशसे वर्षा नहीं होती है ॥४४॥ दैत्योंके गुरु शुक्राचार्य जब दही, कुमुद या चंद्रमाके समान कांतिवाले हों, कांति स्वच्छरूपसे झलकनी हो किरणें फैली हुई हों उत्तम गतिवाला, विकाररहित और जययुक्त हो तो सब प्राणियोंके लिये मानो सतयुगही आ जाता है ॥४५॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां नवमोऽध्यायः ॥९॥

अथ दशमोऽध्यायः

शनैश्चरचारः

श्रवणानिलहस्तार्द्रा भरणी भाग्योपगः सुतोऽर्कस्या । प्रचुरसलिलोपगूढां करोति धात्रीं यदि स्निग्धः ॥ १ ॥ अहिवरुणपुरन्दरदैवतेषु सुक्षेमकृन्न चतिजलम् । क्षुच्छस्त्रावृष्टिकरो मूले प्रत्येकमपिवक्ष्ये ॥ २ ॥ तुरगतुरगोपचारककविवैद्यामात्यहार्कजोऽश्विगतः । याम्ये नर्त्तकवादकगेयज्ञक्षुद्रनौकृतिकान् ॥३॥ बहुलास्थे पीडयन्त सौरेऽन्युपजीविनश्चमूपाश्चारोहिण्यां कोशलमद्रकाशिपांचाल शाकटिकाः ॥ ४ ॥ मृगशिरसि वत्सयाजकयजमानार्यजनमध्यदेशाश्च । रौद्रस्थे पारतरामठतैलिकरजकचौराश्च ॥ ५ ॥ आदित्ये पञ्चनदप्रत्यन्तसुराष्ट्रसिन्धुसौवीराः । पुष्ये घाण्टि-

कधोषिकयवनवणिक्किकतवकुसुमानि ।। ६ ।। सार्पे जलरुहसर्पाः पित्र्ये बाह्लीकचीनगान्धाराः । शूलिकपारतवैश्याः कोष्ठागाराणि वणिजश्च ।। ७ ।। भाग्ये रसविक्रयिणः पण्यास्त्री कन्यका महाराष्ट्राः । आर्यम्णे नृपगुडलवणभिक्षुकाम्बूनि तक्षाशला ।। ८ ।। हस्ते नापितचाक्रिकचौरभिषक्सूचिकद्विपग्राहाः । बन्धक्यः कौशलका मालाकाराश्च पीडचन्ते ।। ९ ।। चित्रास्थे प्रमदाजनलेखकचित्रज्ञचित्रभाण्डानि । स्वातौ मागधचरदूतसूतपोतप्लवनटाद्याः ।। १० ।। ऐंद्राग्नाख्ये त्रैगर्तचीनकौलतकुङकुमं लाक्षा । सस्यान्यथ माञ्जिष्ठं कौसुंभं च क्षयं यान्ति ।। ११ ।। मैत्रे कुलूततङ्गणखसकाश्मीराः समन्त्रिचक्रचराः । उपतापं यान्ति च घाण्टिका विभेदश्च मित्राणाम् ।। १२ ।। ज्येष्ठासु नृपपुरोहितनृपसत्कृतशूरगणकुलश्रेण्यः । मूले तु काशिकोशलपाञ्चालफलौषधीयोधाः ।। १३ ।। आप्येऽङ्गवङ्गकौशलगिरिव्रजमागधपुंड्रमिथिलाश्च । उलपापं यांति जना वसन्ति ये ताम्रलिप्त्यां च ।।१४।। विश्वेश्वरेऽर्कपुत्रश्चरन्दशार्णान्निहन्ति यवनांश्च । उज्जयनीं शवरान् पारियात्रिकान् कुन्तिभोजांश्च ।। १५ ।। श्रवणे राजाधिकृतान्विप्राग्र्यभिषक्सपुरोहितकलिङ्गान् वसुभे मगधेशजयो वृद्धिश्च धनेष्वकृतानाम् ।। १६ ।। साजे शतभिषजिभिषक्कविशौण्डिकपण्यनीतिवार्त्तानाम् । आहिर्बुध्न्ये नटचो यानकराः स्त्री हिरण्यं च ।।१७।। रेवत्यां राजभृताः क्रौञ्चद्वीपाश्रिताः शरत्सस्यम् । शबराश्च निपीडचन्ते यवनाश्च शनैश्वरे चरति ।। १८ ।। यदा विशाखासु महेन्द्रमन्त्री सुतश्च भानोर्दहनर्क्षयातः । तदा प्रजानामनयोऽतिघोरः पुरप्रभेदो गतयोर्भमेकम् ।। १९ ।। अण्डजहा रविजो यदि चित्रः क्षुद्भयकृद्यदि पीतमयूखः । शस्त्रभयाय च रक्तसवर्णो भस्मानिभो बहुवैरकरश्च ।। २० ।। वैडूर्यकान्तिरमलः शुभदः प्रजानां बाणातसीकुसुमवर्णनिभश्चय शस्तः । पञ्चापि वर्णमुपगच्छति तत्सवर्णान् सूर्यात्मजः क्षपयतीति मुनिप्रवादः ।। २१ ।।

इति श्रीवराहमिहिरःतौ बृहत्संहितायां शनैश्चरचारो दशमोऽध्यायः ।। १० ।।

जो सूर्यका पुत्र शनि श्रवण, स्वाती, हस्त, आर्द्रा, भरणी और पूर्वाफाल्गुनी नक्षत्र विराजमान होकर मनोहर वर्णवाला हो तो पृथ्वीपर बहुतही जल वर्षता है ।।१।। आश्लेषा शतभिषा वा ज्येष्ठा नक्षत्रमें शनि विचरण करे तो सुमंगल होता है, अत्यन्त वर्षा नहीं होती। मूल नक्षत्रमें विचरण करे तो क्षुधा, शस्त्रभय और अनावृष्टि होती है। यह तो साधारण फल कहा गया। अब प्रत्येक नक्षत्रमें शनिके विचरण करनेसे जो फल होता है वह कहा जाता है ।।२।। शनि अश्विनी नक्षत्रमें विचरण करे तो अश्व, अश्वसादी, कवि वैद्य और मंत्रियोंकी हानि होती है। भरणी नक्षत्रमें विचरण करे तो नाचनेवाले, बजानेवाले, गानेवाले और छोटी नावोंसे जीविका निर्वाह करनेवाले पुरुषोंकी हानि होती है ।।३।। कृत्तिका नक्षत्रमें शनि हो तो अग्निसे आजीविका करनेवालोंको और राजालोगोंको पीडा होती है। रोहिणी नक्षत्रमें शनि विराजमान हो तो कोशल, मद्र, काशी, पांचाल

देश और छकडोंसे जीविकाका निर्वाह करनेवाले पुरुषोंको पीडा होती है ॥४॥ मृगशिर नक्षत्रमें शनि हो तो वत्सदेश, याजक, यजमान, आर्यपुरुष और मध्य देशके लोगोंको पीडा होती है। आर्द्रा नक्षत्रमें शनि हो तो रामठदेश, तेली, धोबी, रंगरेज और चोर अत्यन्त पीडित होते हैं ॥५॥ पुनर्वसु नक्षत्रमें शनि हो तो पंजाब, प्रत्यन्त, सुराष्ट्र, सिन्धु और सौवीर देशको अत्यन्त पीडा होती है। षुष्य नक्षत्रमें शनिका सहवास हो तो घंटा बजाने-वाले, घोषिक (ढंढेरा फेरनेवाले) यवन, वणिक खल और सब पुष्पोंको पीडा होती है ॥६॥ आश्लेषा नक्षत्रमें शनि हो तो पद्म और सर्पोंको, मघा नक्षत्रमें हो तो बाह्लीक, चीन, गान्धार, शूलिका, पारत, वैश्य, धनागार और बनियोंके लिये विघ्न होता है ॥७॥ पूर्वा-फाल्गुनी नक्षत्रमें शनि रहता हो तो रस बेचनेवाले लोग, वेश्या, कन्या और महाराष्ट्र-देशको विघ्न होता है। उत्तराफाल्गुनी नक्षत्रमें शनि हो तो राजा, गुड, लवण भिक्षु जल और तक्षशिला नगरीको विघ्न होता है ॥८॥ हस्त नक्षत्रमें शनि हो तो नाई, चाक्रिक (चक्रशिल्पी), चोर वैद्य, दर्जी, द्विपग्राह (हाथी पकडनेवाले), बंधकी, कौशली और माला बनानेवालोंको पीडा होती है ॥९॥ यदि शनि चित्रा नक्षत्रमें हो तो स्त्री, लेखक, चित्र विद्याको जाननेवालों (मुसौविर को और अनेक प्रकारके द्रव्य पीडाको प्राप्त होता हैं। यदि स्वाती नक्षत्रमें शनि हो तो मागध, दूत, चर, सारथि, नावपर चलनेवाले और नटा-दिकोंको पीडा होती है ॥१०॥ जो विशाखा नक्षत्रमें शनि विचरण करता हो तो त्रिगर्त्त चीन और कुलूत देश, कुमकुम, लाख, धान्य, मजीठ और कुसुम्भ क्षयको प्राप्त होते हैं ॥११॥ अनुराधा नक्षत्रमें शनि हो तो कुलूत, तंगण खस, और काश्मीर देशके, घंटा बजानेवाले, मंत्री, चक्रचर अर्थात् तेली कुम्हारादि और चोरलोगोंको संताप होता है, मित्रोंमें भेद हो जाता है ॥१२॥ ज्येष्ठा नक्षत्रमें शनि हो तो राजपुरोहित, राजासे आदर पाया हुआ शूर और गणकुलश्रेणी (संन्यासीके मठ) को पीडा होती है। मूल नक्षत्रमें शनि हो तो काशी, कोशल और पांचाल देशके फल, औषधी और योद्धा लोगोंको विघ्न होता है ॥१३॥ पूर्वाषाढा नक्षत्रमें शनि हो तो अंग, वंग, कोशल, गिरि वज्र मगध, पुण्ड्र, मिथिला और ताम्रलिपी देश रहनेवाले संतापित होते हैं ॥१४॥ उत्तराषाढा नक्षत्रमें शनि विचरण करता हो तो उज्जयनी, परियात्रिक और कुन्तिभोज देशके रहनेवाले लोग वा यवन, शबरजातिके लोग सन्तापित होते हैं ॥१५॥ यदि शनि श्रवण नक्षत्रमें हो तो राजाके अधिकारी, ब्राह्मण, श्रेष्ठ वैद्य, पुरोहित और कलिङ्ग देशके लोगोंको अत्यन्त संताप होता है, धनिष्ठा नक्षत्रमें शनि हो तो मगधेश्वरकी जय और धनाधिकारीकी वृद्धि, होती है ॥१६॥ शतभिषा और पूर्वाभाद्रपदा नक्षत्रमें जो शनि विचरण करता हो तो वैद्य, कवि, कलवार (मद्य बेचनेवाला), पण्यजीवी और नीतिकुशल आदमियोंके लिये विघ्न होता है, उत्तराभाद्रपदा नक्षत्रमें शनि विचरण करता हो तो नटी सवारी बनानेवाले, स्त्री सुवर्णका नाश होता है ॥१७॥ जब शनि रेवती नक्षत्रोमें विचरण करे तो राजसेवक, क्रौंचद्वीपके रहनेवाले मनुष्य, शरदऋतुका धान्य, शबरजातिके पुरुषगण और यवनलोग पीडाको प्राप्त होते हैं ॥१८॥ जिस समय बृहस्पति विशाखा नक्षत्रमें हो उस समय शनि यदि कृत्तिकामें हो तो प्रजाओंमें अत्यन्त अनीति होती है और जो दोनोंही एक नक्षत्रमें हों तो सब नगरोंका भेद हो जाता है ॥१९॥ यदि शनिका वर्ण अनेक रंगवाला दिखाई दे तो अंडज प्राणियोंका नाश होता है। पीतवर्ण होनेसे क्षुधा और भय होता है। रक्तवर्ण

होनेपर शस्त्रभय और भस्मके समान रंग होनेसे अत्यन्त शुभता होती है ॥२०॥ मुनिलोग कह गये हैं कि, शनि यदि वैडूर्यमणिके समान कांतिमान् और निर्मल हो तो प्रजाओंको अत्यन्त शुभ होता है। बाणपुष्प या अतसीकुसुमके समान कांति हो तो अच्छा है। श्वेत, रक्त, पीत, कृष्ण और नानावर्ण हो इन पांच रंगोंमें शनि जिस रंगवाला जब ज्ञात हो तो उसके समान रंगका अर्थात् ब्राह्मण क्षत्री, वैश्य, शूद्र और वर्ण संकर जातिके समस्त पुरुषोंका नाश होगा ॥२१॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां दशमोऽध्यायः ॥१०॥

अथैकादशोऽध्यायः

केतुचारः

गार्गीयं शिखिचारं पराशरमसितदेवलकृतं च। अन्यांश्च बहून्दृष्ट्वा क्रियतेऽयमनाकलश्चारः ॥ १ ॥ दर्शनमस्तमयो वा न गणितविधिनास्य शक्यते ज्ञातुम्। दिव्यान्तरिक्षभौमास्त्रिविधाः स्युः केतवो यस्मात् ॥ २ ॥ अहुताशेऽनलरूपं यस्मितत् केतुरूपमेवोक्तम्। खद्योतपिशाचालयमणिरत्नादीन् परित्यज्य ॥ ३ ॥ ध्वजस्त्रभवनतरुतुरगकुञ्जराद्येष्वथान्तरिक्षास्ते। दिव्य नक्षत्रस्था भौमाः स्युरतोऽन्यथा शिखिनः ॥ ४ ॥ शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम्। बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम् ॥ ५ ॥ यद्येको यदि बहवः किमनेन फलं तु सर्वथा वाच्यम्। उदयास्तमयैः स्थानैः स्पर्शैराधूमनैर्वर्णैः ॥ ६ ॥ यावन्त्यहानि दृश्यो मासास्तावन्त एव फलपाकः। मासैरब्दांश्च वदेत् प्रथमात्पक्षत्रयात् परतः ॥ ७ ॥ ह्रस्वस्तनुः प्रसन्नः स्निग्धस्त्वृजुरुचिरसंथितः शुक्लः उदितो वाप्यभिदृष्टः सुभिक्षसौख्यावहः केतुः ॥ ८ ॥ उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः। इन्द्रायधानुकारी विशेषतो द्वित्रिचूलो वा ॥ ९ ॥ हारमणिहेमरूपाः किरणाख्याःपञ्चविंशतिः सशिखाः। प्रागपरदिशोर्दृश्या नृपतिविरोधावहा रविजाः ॥ १० ॥ शुकदहनबन्धुजीवकलाक्षा क्षतजोपमा हुताशसुताः। आग्नेय्यां दृश्यन्ते तावन्तस्तेऽपि शिखिभयदाः ॥ ११ ॥ वक्रशिखा मृत्युसुता रूक्षाः कृष्णाश्च तेऽपि तावन्तः। दृश्यन्ते याम्यायां जनमरकावेदिनस्तेच ॥ १२ ॥ दर्पणवृत्ताकारा विशिखाः किरणान्विताः धरातनयाः। क्षुद्भयदा द्वाविंशतिरैशान्यामम्बुतैलनिभाः ॥ १३ ॥ शशिकिरणरजतहिमकुमुदकुन्दकुसुमोपमाः सुताः शशिनः। उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः शिखिनः ॥ १४ ॥ ब्रह्मसुत एक एव त्रिशिखो वर्णैस्त्रिभिर्युगान्तकरः। अनियतदिक्सम्प्रभवो विज्ञेयो ब्रह्मदण्डाख्यः ॥ १५ ॥ शतमभिहितमेकसमेतदेकेन विरहितान्यस्मात्। कथयिष्ये केतूनां शतानि नव लक्षणैः स्पष्टैः ॥ १६ ॥ सौम्येशान्योरुदयं शुक्रसुता

यान्ति चतुरशीत्याख्याः । विपुलसिततारकास्ते स्निग्धाश्च भवन्ति तीव्रफलाः ॥ १७ ॥ स्निग्धाः प्रभासमेता द्विशिखाः षष्टिः शनैश्चराङ्गरुहाः । अतिकष्ट-फला दृश्या सर्वत्रैते कनकसंज्ञाः ॥ १८ ॥ विकचा नाम गुरुसुताः सितैकताराः शिखापरित्यक्ताः । षष्टिः पञ्चभिरधिका स्निग्धायम्याश्रिताः पापाः ॥ १९ ॥ नातिव्यक्ताः सूक्ष्मा दीर्घाः शुक्लाः यथेष्टदिक्प्रभवाः । बुधजास्तस्करसंज्ञाः पापफलास्त्वेकपञ्चाशत् ॥ २० ॥ क्षतजानलानुरूपास्त्रिचूलताराः कुजात्मजाः षष्टिः । नाम्ना च कौङकुमास्ते सौम्याशासंस्थिताः पापाः ॥ २१ ॥ त्रिंशत्र्यधिका राहोस्ते तामसकीलका इति ख्याताः । रविशशिगा दृश्यन्ते तेषां फल मर्कचारोक्तम् ॥ २२ ॥ विंशत्याधिकमन्यच्छतमग्निविश्वरूपसंज्ञानाम् । तीव्रानलभयदानां ज्वालामाला कुलतनूनाम् ॥ २३ ॥ श्यामारुणाविताराश्चामरूपा विकीर्णदीधितयः । अरुणाख्या वायोः सप्तसप्ततिः पापदाः पुरुषाः ॥ २४ ॥ तारापुञ्जनिकाशा गणका नाम प्रजापतेरष्टौ । द्वे च शते चतुरधिके चतुरस्रा ब्रह्मसन्तानाः ॥ २५ ॥ कंका नाम वरुणजा द्वोत्रिशद्वंशगुल्म संस्थानाः । शशिवत् प्रभासमेतास्तीव्रफलाः केतवः प्रोक्ताः ॥ २६ ॥ षण्णवतिः कालसुताः कबन्धसंज्ञा कबन्ध संस्थानाः । चण्डा भयप्रदाः स्यू रूपताराश्च ते शिखिनः ॥ २७ ॥ शुक्लविपुलैकतारा नव विदिशां केतवः समुत्पन्नाः । एवं केतुसहस्रं विशेषमेषामतो वक्ष्ये ॥ २८ ॥ उदगायतो महान् स्निग्धमूर्तिरपरोदयी वसाकेतुः । सद्यः करोति मरकं सुभिक्षमप्युत्तमं कुरुते ॥ २९ ॥ तल्लक्षणोऽस्थिकेतुः स तु रुक्षः क्षुद्भयावहः प्रोक्ताः । स्निग्धस्तादृक् प्राच्यां शस्त्राख्यो डमरमरकाय ॥ ३० ॥ दृश्योऽमावास्यायां कपालकेतुः सधूम्ररश्मि शिखः । प्राङ्नभसोऽर्ध्वविचारीक्षुन्मरकावृष्टिरोगकरः ॥ ३१ ॥ प्राग्वैश्वानरमार्गे शूलाग्रः श्यावरूक्ष-ताम्रार्चिः । नभसस्त्रिभागगामी रौद्र इति कपालतुल्यफलः ॥ ३२ ॥ अपरस्यां चलकेतुः शिखया याश्याग्रया गुलोच्छ्रितया । गच्छेद्यथा यथोदक् तथा तथा दैर्घ्यमायाति ॥ ३३ ॥ सप्तमुनीन् संस्पृश्य ध्रुवमभिजितमेव च प्रतिनिवृत्तः । नभसोऽर्द्धमात्रमित्वा याम्येनास्तं समुपयाति ॥ ३४ ॥ हन्यात् प्रयागकूलाद् यावदवन्तीं च पुष्कराख्याम् । उदगपि च देविकामपि भूयिष्ठं मध्यदेशाख्यम् ॥ ३५ ॥ अन्यानपि च स देशान् क्वचित् क्वचिद्धन्ति रोगदुर्भिक्षैः । दश मासान् फलपाकोऽस्य कैश्चिदष्टादश प्रोक्तः ॥ ३६ ॥ प्रागर्द्धरात्रदृश्यो याम्याग्रः श्वेतकेतुरन्यश्च । क इति युगाकृतिपरपरे युगपत्तौ सप्तदिनदृश्यौ ॥ ३७ ॥ स्निग्धौ सुभिक्षशिवदावथाधिकं दृश्यते कनामा यः । दश वर्षाण्युपतापं जनयति शस्त्रप्रकोपकृतम् ॥ ३८ ॥ श्वेत इति जटाकारो रुक्षः श्यावो वियत्त्रिभागगतः । विनिवर्ततेऽपसव्यं त्रिभागशेषाः प्रजाः कुरुते ॥ ३९ ॥ आधूम्रया तु शिखया

दर्शनमायाति कृत्तिकासंस्थः । ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते ।। ४० ।। ध्रुवकेतुरनियतगतिप्रमाणवर्णाकृतिर्भवति विष्वक् । दिव्यान्तरिक्षभौमो भवत्ययं स्निग्ध इष्टफलः ।। ४१ ।। सेनाङ्गेषु नृपाणां गृहतरुशैलेषु चापि देशानाम् । गृहिणामुपस्करेषु विनाशिनां दर्शनं याति ।। ४२ ।। कुमुद इति कुमुदकान्तिर्वारुण्यां प्राक्छिखो निशामेकाम् । दृष्टः सुभिक्षमतुलं दश किल वर्षाणि स करोति ।।४३।। सकृदेकयामदृश्यः सुसूक्ष्मतारोऽपरेण मणिकेतुः । ऋज्वी शिखास्य शुक्लास्तनोद्गता क्षीरधारेव ।। ४४ ।। उदयन्नेव सुभिक्षं चतुरो मासान् करोत्यसौ सार्द्धान् । प्रादुर्भावं प्रायः करोति च क्षुद्रजन्तूनाम् ।। ४५ ।। जलकेतुरपि च पश्चात् स्निग्धः शिखयापरेण चोन्नतया । नव मासान् स सुभिक्षं करोति शान्तिं च लोकस्य ।।४६।। भवकेतुरेकरात्र दृश्यः प्राक् सूक्ष्मतारकः स्निग्धः । हरिलाङ्गूलोपमया प्रदक्षिणावर्त्तया शिखया ।। ४७ ।। यावत एव मुहूर्त्तान् दर्शनमयाति निर्दिशेन्मासान् । तावदतुल सुभिक्षं रूक्षे प्राणान्तिकान् रोगान् ।। ४८ ।। अपरेण पद्मकेतुर्मृणालगौरो भवेन्निशामेकाम् । सप्त करोति सुभिक्षं वर्षाण्यतिहर्षयुक्तानि ।। ४९ ।। आवर्त्त इति निशार्धे सव्यशिखोऽरुणनिभोऽपरे स्निग्धः । यावत्क्षणान् स दृश्यस्तावन्मासान् सुभिक्षकरः ।। ५० ।। पश्चात् सन्ध्या काले संवर्त्तो नाम धूम्रताम्रशिखः । आक्रम्य वियत्त्र्यंशं शूलाग्रावस्थितो रौद्रः ।।५१।। यावत एव मुहूर्तान् दृश्यो वर्षाणि तावन्ति । भूपाञ्छस्त्रनिपातैरुदयर्क्षं चापि पीडयति ।। ५२ ।। ये शस्तास्तान् हित्वा केतुभिराधूमितेऽथवा स्पृष्टे । नक्षत्रे भवति वधो येषां राज्ञां प्रवक्ष्ये तान् ।। ५३ ।। अश्विन्यामश्मकपं भरणीषु किरातपार्थिवं हन्यात् । बहुलासु कलिङ्गेशं रोहिण्यां शूरसेनपतिम् ।। ५४ ।। औशीनरमपि सौम्ये जलजाजीवाधिपं तथार्द्रासु । आदित्येऽश्मकनाथं पुष्ये मगधाधिपं हन्ति ।। ५५ ।। असिकेशं भौजङ्गे पित्र्येऽङ्गं पाण्डयनाथमपि भाग्ये । औज्जयनिकसार्यम्णे सावित्रे दण्डकाधिपतिम् ।। ५६ ।। चित्रासु कुरुक्षेत्राधिपस्य मरणं समादिशेत्तज्ज्ञः । काश्मीरककाम्बोजौ नृपती प्राभञ्जने न स्तः ।। ५७ ।। इक्ष्वाकुरत्नकनाथौ हन्येते यदि भवेद्विशाखासु । मैत्रे पुण्ड्राधिपतिर्ज्येष्ठास्वथ सार्वभौमवधः ।। ५८ ।। मूलेऽन्ध्रमद्रकपती जलदेवे काशिपो मरणमेति । मौधेयकार्जुनायनशिबिचैद्यान् वैश्वदेवे च ।। ५९ ।। हन्यात् कैकयनाथं पाञ्चनदं सिहलाधिपं वाङ्गम् । नैमिषनृपं किरातं श्रवणादिषु षट्स्विमान् क्रमशः ।। ६० ।। उल्काभिताडितशिखः शिखी शिवः शिवतरोऽभिवृष्टो यः । अशुभः स एव चोलावगाणसितहूणचीनाम् ।। ६१ ।। नम्रा यतः शिखिशिखाभिसृता यतो वा ऋक्षं च यत् स्पृशति तत्कथितांश्च देशान् । दिव्यप्रभावनिहतान् स यथा गरुत्मान् भुंक्ते गतो नरपतिः परभोगिभोगान् ।। ६२ ।।

त्रिकालज्ञानी पंडितलोग जिस समयमें होनहार ग्रहयुद्धके विषयमें आज्ञा देते हैं। मैं करणग्रंथमें (पंचसिद्धान्तिका) सूर्यसिद्धांतके मतसे सो कह आया हूं सो ।।१।। एकके ऊपर एक अलग २ अपने मार्गमें स्थित ग्रहोंकी जो अतिदूरसे दर्शनके विषयमें समानता होती है, उसको पंडित लोग ग्रहयुद्ध कहते हैं ।।२।। पराशरादि मुनियोंने आसन्न क्रमयोगसे भेद, उल्लेख, अंशुमर्दन और अपसव्य यह चार प्रकारके ग्रहयुद्ध कहे हैं ।।३।। भेदयुद्धमें वर्षाका नाश सुहृद व कुलीनोंमें भेद होता है, उल्लेख युद्धमें शस्त्रभय, मंत्रिविरोध और दुर्भिक्ष होता है ।।४।। अंशुमर्दन युद्धमें राजा लोगोंमें युद्ध, शस्त्र, रोग, भूखसे पीडा और अवमर्दन होता है, अपसव्य युद्धमें राजागण युद्ध करते हैं ।।५।। सूर्य दोपहरमें आक्रन्द होता है, पूर्वाह्णमें पौरग्रह तथा अपराह्णमें पापी ग्रह आक्रन्द संज्ञक होते हैं, बुध, गुरु और शनि यह सदा पौर हैं। चंद्रमा नित्य आक्रन्द है ।।६।। केतु, मंगल, राहु और शुक्र यायी हैं। इन ग्रहोंके हत होनेसे आक्रन्दयायी और पौर क्रमानुसार नाशको प्राप्त होते हैं, जयी होनेपर स्ववर्गको जय देते हैं ।।७।। पौरग्रहसे पौरग्रहके टकरानेपर पुरवासी गण और पौर राजाओंका नाश होता है इस प्रकार यायी और आक्रन्दग्रह या पौर और यायी ग्रह परस्पर हत होनेपर अपने १ अधिकारियोंको नष्ट करते हैं ।।८।। जो ग्रह दक्षिणदिशामें रूखा, कम्पायमान अप्राप्त होकर भलीभांतिसे निवृत्त अर्थात् टेढा, क्षुद्र, और किसी ग्रहसे ढका हुआ, विकराल, प्रभाहीन और विवर्ण जान पडे वह ग्रह पराजित होगा और इसके विपरीत लक्षणवाला ग्रह जयी कहता है, परंतु बडे मंडलवाला चिकना और द्युतिमान् होकर दक्षिणदिशामें भी हो तो उसको जययुक्त कहा जाता है ।।९।।१०।। ग्रहयुद्धकालमें यदि दो ग्रह किरणयुक्त बडे मंडलवाला और चिकने हों तो इसको अन्योन्य प्रीति कहा जायगा. ऐसा हो तो पृथ्वीमें राजा लोगोंकी भी युद्धकालमें बराबरी होगी, इसके विपरीत होनेसे आत्मपक्षका नाक्ष होगा ।।११।। जो युद्ध या समागम लक्षणसे जाना जाय तो पृथ्वीमें राजा लोगोंका फलभी वैसाही जाना जायगा ।।१२।। बृहस्पतिजी मंगलको जीत ले तो बाह्लीक, यायी और अग्निसे आजीविका करनेवाले पीडा पाते हैं। बुध मंगलको जीते तो शूरसेन, कलिंग और शाल्वदेशको पीडा होती है ।।१३।। शनिके द्वारा मंगल जीता जाय तो पुरवासियोंकी जय होती है, प्रजा व्याकुल होकर नष्ट हो जाती

है। शुक्र[1] मंगलको जीत ले तो कोष्ठा गार, म्लेच्छ और क्षत्रियोंको ताप होता है ॥१४॥ मंगलके द्वारा बुध हत हो तो वृक्ष, नदी, तपस्वी, अश्मक, नरेन्द्र और उत्तरदिशाके यज्ञमें दीक्षित हुए संताप पाते हैं ॥१५॥ गुरु करके बुध जीत लिया जाय तो म्लेच्छ, शूद्र, चोर अर्थयुक्त पौरजन, त्रैगर्त्त और पहाडी आदमियोंको पीडा होती है, पृथ्वी कंपायमान होती है ॥१६॥ शनिके द्वारा बुध ध्वंस हो तो मल्लाह, योधा, जलज, धनी व गर्भिणियें और शुक्रसे बुध जीता जाय तो अग्निकोप होकर धान्य, मेघ व यायिगण विध्वंस होते हैं ॥१७॥ शुक्रसे बृहस्पतिजी आहत हों तो कुलूत, गांधार, कैकय, मद्र, शाल्व, वत्स, वंगगण और गोसमूह व धान्य नाशको प्राप्त होता है ॥१८॥ मंगलसे गुरु हत हो तो मध्यदेश, राजालोग और गाय, बैल शनि करके हत हो तो आर्जुनायन, वसाति, यौधेय, शिबि और विप्रगण और बुध करके बृहस्पति जीता जाय तो म्लेच्छ, सत्य और शस्त्रसे आजीविका करनेवाले और मध्यदेश ये सब क्षयको प्राप्त होते हैं। परंतु ग्रहभक्तके मतसे फलको निरूपण करना चाहिये ॥१९॥२०॥ बृहस्पतिसे शुक्र हत हो तो श्रेष्ठ यायी विनाशको प्राप्त हो, ब्राह्मण और मंत्रियोंसे विरोध हो और इन्द्र जल नहीं वर्षाता ॥२१॥ कोशल, कलिंग, वंग, वत्स, मत्स्य, और मध्यदेशके वासी. शूरसेनगण और नपुंसकगण महापीडाको भोग करते हैं ॥२२॥ मंगलसे शुक्र जीत लिया जाय तो सेनापतियोंका वध और राजाओंका युद्ध होता है। बुधसे शुक्र जीत लिया जाय तो सब पहाडी देशोंमें कष्ट होता है. दुग्धकी हानि और अल्प वृष्टि होती है ॥ २३ ॥ शनिसे शुक्र विजित हो जाय तो गणश्रेष्ठ शस्त्रजीवी, क्षत्रिय लोग और जलज पीडित होते हैं और अन्न साधारण होता है, यह ग्रहभक्तका फल है ॥२४॥ शुक्रसे शनि ग्रह निहत हो तो महंगी, सर्प, पक्षी और मानियोंको पीडा होती है। मंगलसे शनि निहत हो तो टंकण, अन्ध्र, ओड्र काशी और बाह्लीक देशवालोंको पीडा होती है ॥२५॥ बुधसे शनि पराजित हो तो अंगदेश, वणिक् विहंग, पशु और सर्पगण संतापित होते हैं और बृहस्पतिके द्वारा हत होनेपर स्त्रियें, महिष और शकजातिके पुरुष सन्तापित होते हैं ॥२६॥ मंगल, बुध, बृहस्पति, शुक्र और शनि इन ग्रहोंके परस्पर हननका यह विशेष फल कहा गया और स्थलोंमें अर्थात् साधारण नक्षत्रादिके साथ जो ग्रहादिका युद्ध होगा वह भक्ति नामक पूर्व अध्यायमें उसका जो फल कहा है उसके अनुसार कहना चाहिये परंतु ग्रह अनेक स्थानोंमें हत होकर अपने २ नियत पदार्थोंका नाश करते हैं ॥२७॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां सप्तदशोऽध्यायः ॥१७॥

---

१ यह लक्षण केवल शुक्रके लिये है क्योंकि युद्धप्रकरणमें लिखा है कि शुक्रके सिवाय कोई ग्रह जयी होकर दक्षिण दिशामें नहीं जाता और इसका जानना उचित है कि शुक्र उत्तरमें हो या दक्षिणमेंही बहुधा युद्धमें जयी होगा, "उदवस्थो दक्षिणास्थो वा भार्गवः ग्रायशो जयी" ॥२॥ ग्रहोंके परस्पर मिलनेको युद्ध समागम और अस्तमन कहते हैं, सूर्यसिद्धांतग्रहयुत्यधिकार. मंगलादि पंच ग्रहोंके साथ मंगलादि पंच ग्रहोंके मिलनेको युद्ध चंद्रमाके साथ योगको समागम और सूर्यके साथ साथ योग होनेको अस्तमन कहते हैं ॥

अथाष्टादशोध्यायः

चन्द्रग्रहसमागमः

भानां यथासम्भवमुत्तरेणं यातो ग्रहाणां यदि वा शशांकः। प्रदक्षिणं तच्छुभकृन्नराणां याम्येन यातो न शिवः शशांकः ॥ १ ॥ चंद्रमा यात्युदक्पार्वतीयबलशालिनां जयः। क्षत्रियाःप्रमुदिताः सयायिनो भूरिधान्यमुदिता वसुन्धरा ॥ २ ॥ उत्तरतः स्वसुतस्य शशांकः पौरजयाय सुभिक्षकरश्च। सस्यचयं कुरुते जनहार्दि कोशचयं च नराधिपतीनाम् ॥ ३ ॥ बृहस्पतेरुत्तरगे शशांके पौरद्विजक्षत्रियपण्डितानाम्। धर्मस्य देशस्य च मध्यमस्य वृद्धिः सुभिक्षं मुदिताः प्रजाश्च ॥ ४ ॥ भार्गवस्य यदि यात्युदक् शशी कोशयुक्तगजवाजिवृद्धिदः। यायिनां च विजयो धनुष्मतां सस्यसम्पदपि चोत्तमा तदा ॥ ५ ॥ रविजस्य शशी प्रदक्षिणं कुर्याच्चेत् पुरभूभृतां जयः। शकबाह्लिकसिन्धुपह्लवानामुद्भाजो यवनैः समन्विताः ॥ ६ ॥ येषामुदग्गच्छति भग्रहाणां प्रालेयरश्मिर्निरुपद्रवश्च। तद्द्रव्यपौरेतरभक्तिदेशान् पुष्णाति याम्ये न निहन्ति तानि ॥ ७ ॥ शशिनि फलमुदक्स्थे यद्ग्रहस्योपदिष्टं भवति तदपसव्ये सर्वमेव प्रतीपम्। इति शशिसमवायाः कीर्तिताभग्रहाणां न खलु भवति युद्धं साकमिन्दोर्ग्रहर्क्षैः ॥ ८ ॥

इतिश्रीवराहमिहिरकृतौ बृहत्संहि० शशिग्रहसमागमोऽष्टादशोऽध्यायः ॥१८॥

यदि चंद्रमा नक्षत्रोंके या ग्रहोंके यथासंभव उत्तरमें गमन करे तो उस चंद्रको 'प्रदक्षिण' कहते हैं यह मनुष्योंका शुभकारी है, परंतु उसका दक्षिणमें गमन करना मनुष्योंको शुभदायी नहीं है ॥१॥ जो चंद्रमा मण्डल ग्रहके उत्तरमें जाय तो बलवान् पहाडियोंकी जय होती है, पापी गणोंके साथ क्षत्री लोग हर्षित होते हैं और पृथ्वी बहुतसे धान्यसे 'युक्त होकर प्रसन्न हो जाती है ॥२॥ चंद्रमा बुधके उत्तरमें जाय तो पौर जयहेतु सुभिक्षकारी, धान्यवर्द्धक, मनुष्योंको आनंददायी और राजाओंका कोशसंचारी होता है ॥३॥ बृहस्पतिके उत्तरमें चंद्रमा जाय तो पौर, क्षत्रिय, ब्राह्मण, पंडित और मध्यदेशके धर्मकी वृद्धि होती है, सुभिक्ष होता है, प्रजा संतुष्ट होती है ॥४॥ यदि शुक्रके उत्तरमें चंद्रमा गमन करे तो कोश, गज हाथी) और घोडोंकी वृद्धि हो, यायी और धनुषधारी लोगोंकी विजय हो और उत्तम धान्य संपत्ति प्राप्त हो ॥५॥ जो चंद्रमा शनिके दक्षिणमें गमन करे तो पौर राजाओंकी जय और शक, बाह्लीक, सिन्धु, पह्लव और यवन लोग आनंदित होते हैं ॥६॥ जो शीतल किरणवाला चंद्रमा नक्षत्रोंके उत्तरमें गमन करे तो निरुपद्रव होकर निजद्रव्य पौर वा ग्रहभक्ति मत हो देशवासियोंको पोषण करे, परंतु दक्षिणमें गमन करके उनको हनन करता है। ग्रहोंके उत्तरमें चंद्रमाके होनेका फल कहा गया, दक्षिण ओर होनेसे इसका विपरीत फल होता है। ग्रह वा नक्षत्रोंके साथ चंद्रमाका मिलन कहा गया। चंद्रमाका युद्ध ग्रह वा नक्षत्रोंके साथ कभी नहीं होता ॥७॥८॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायामष्टादशोऽध्यायः ॥१८॥

अथैकोनविंशोऽध्यायः

ग्रहवर्षफलम्

सर्वत्र भूर्विरलसस्ययुता वनानि दैवाद्धिभक्षयिषुदंष्ट्रिसमावृतानि । स्यन्दन्तिनैव च प्रचुरं स्रवन्त्यो रुग्भेषजानि न तथातिबलान्वितानि ।। १ ।। तीक्ष्णं तपत्यदितिजः शिशिरेऽपि काले नात्यम्बुदा जलमुचोऽचलसन्निकाशाः । नष्टप्रभर्क्षगणशीतकरं नभश्चसीदन्ति तापसकुलानि सगोकुलानि ।। २ ।। हस्त्यश्वपत्तिमदसह्यबलैरुपेता बाणासनासिमुसलातिशयाश्चरन्ति । घ्नन्तो नृपा युधि नृपानुचरैश्च देशान् संवत्सरे दिनकरस्य दिनेऽथ मासे ।। ३ ।। व्याप्तं नभः प्रचलिताचलसन्निकाशैर्व्यालाञ्जनालिगवलच्छविभिःपयोदैः । गां पूरयद्भिरखिलाममलाभिरद्भिरुत्कण्ठकेन गुरुणाध्वनितेन चाशाः ।।४।। तोयानि पद्मकुमुदोत्पलवन्त्यतीवफुल्लद्रुमाण्युपवनान्यलिनादितानि । गावः प्रभूतपयसो नयनाभिरामा रामा रतैरविरतं रमयंति रामान् ।।५।। गोधूमशालियवधान्यवरेक्षुवाटा भूः पाल्यते नृपतिभिर्नगराकराढ्या । चित्यंकिता ऋतुपरेष्टिविघुष्टनादा संवत्सरे शिशिरगोरभिसम्प्रवृत्ते ।।६।। वातोद्धतश्चरति वह्निरतिप्रचण्डो ग्रामान् वनानि नगराणि च सन्दिधक्षुः । हाहेति दस्युगणपातहता रटन्ति निस्वीकृता विपशवो भुविमर्त्यसंघाः ।। ७ ।। अभ्युन्नता वियति संहतमूर्तयोऽपि मुञ्चन्ति न क्वचिदपः प्रचुरं पयोदाः । सीम्नि प्रजा तमपि शोषमुपैति सस्यं निष्पन्नमप्यविनयादपरे हरन्ति ।। ८ ।। भूपा न सम्यगभिपालनसक्तचित्ताः पित्तोत्थरुक्प्रचुरता भुजगप्रकोपः । एवं विधैरुपहता भवति प्रजेयं संवत्सरेऽवनिसुतस्य विपन्नसस्या ।। ९ ।। मायेन्द्रजालकुहकाकरनागराणां गांधर्वलेख्यगणितास्त्रविदां च वृद्धिः । पिप्रीषयाः नृपतयोऽद्भुतदर्शनानि दित्सन्ति तुष्टिजननानि परस्परेभ्यः ।। १० ।। वार्ता जगत्यवितथा विकला त्रयी च सम्यक् चरत्यपि मनोरिव दण्डनीतिः । अध्यक्षरं स्वभिनिविष्टधियोऽत्रकेचिदान्वीक्षिकीषु च परं पदमीहमानाः ।।११।। हास्यज्ञदूतकविबालनपुंसकानां युक्तिज्ञसेतुजलपर्वतवासिनां च । हार्दि करोत मृगलाञ्छनजः स्वकेऽब्दे मासेऽथ वा प्रचुरतां भुवि चौषधीनाम् ।। १२ ।। ध्वनिरुच्चरितोऽध्वरे द्युगामी विपुलो यज्ञमुषां मनांसि भिन्दन् । विचरत्यनिशं द्विजोत्तमानां हृदयानन्दकरोऽध्वरांशभाजाम् ।।१३।। क्षितिरुत्तमसस्यवत्यनेकद्विपपत्त्यश्वधनोरुगोकुलाढ्या । क्षितिपैरभिपालनप्रवृद्धा द्युचरस्पर्धिजना तदा विभाति ।। १४ ।। विविधैर्वियदुन्नतैः पयोदैर्वृतमुर्वी पयसाभितर्पयद्भिः । सुरराजगुरोः शुभेऽत्र वर्षे बहु सस्या क्षितिरुत्तमर्द्धियुक्ता ।। १५ ।। श्रीमत्सरोरुहशालीक्षुमत्यपि धरा धरणीधराभधाराधरोज्झितपयःपरिपूर्णवप्रा । ततताम्बुतडागकीर्णा योषेव भात्यभिनवाभरणोज्ज्वलाङ्गी ।। १६ ।। क्षत्रं क्षितौ

क्षपितभूरिबलारिपक्षमुद्घुष्टनैकजयशब्दविराविताशम् । संहृष्टशिष्टजनदुष्टविनष्टवर्गां गां पालयन्त्यवनिपा नगराकराढयाम् ।। १७ ।। पेपियते मधु मधौ सह कामिनीभिर्जेगीयते श्रवणहारि सवेणुवीणम् । बोभुज्यतेऽतिथिसुहृत्स्वजनैः सहान्नमब्दे सितस्य मदनस्य जयावघोषः ।। १८ ।। उद्वृत्तदस्युगणभूरिरणाकुलानि राष्ट्राण्यनेकपशुवित्तविनाकृतानि । रोरूयमाणहतबन्धुजनैर्जनैश्च रोगोत्तमाकुलकुलानि बुभुक्षया च ।। १९ ।। वातोद्धताम्बुधरवर्जितमन्तरिक्षमारुग्णनैकविटपं च धरातलं द्यौः । नष्टार्कचन्द्रकिरणातिरजोऽवनद्धा तोयाशायाश्च विजलाः सरितोऽपि तन्व्यः ।।२०।। जातानि कुत्रचिदतोयतया विनाशमृच्छन्ति पुष्टिमपराणि जलोक्षितानि । सस्यानि मन्दमभिवर्षति वृत्रशत्रौ वर्षे दिवाकरसुतस्य सदा प्रवृत्ते ।।२१।। अणुरपटुमयखो नीचगोऽन्यैर्जितो वा न सकलफलदाता पुष्टिदोऽतोऽन्यथा यः । यदशुभमशुभेऽब्दे मासजं तस्य वृद्धिः शुभफलमपि चैवं याप्यमन्योऽन्यतायाम्।।२२।।

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां ग्रहवर्षफलमेकोनविंशोऽध्यायः ।।१९।।

यदि सूर्य वर्षका स्वामी, मासका स्वामी, दिनका स्वामी हो तो सब जगह पृथ्वी पर धान्य थोडा हो, वनमें जगह २ वृक्षोंमें कीडे लग जायँ, नदियोंमें बहुतसा जल न रहे, मारे पीडाके औषधियोंमें अत्यन्त बल न रहे, शीतकालमें भी सूर्य तीक्ष्ण धूप करे, पर्वतके समान मेघगण अधिक जल नहीं वर्षावें, आकाशमें चंद्रमा और तारोंकी दीप्ति जाती रहे, गाय और तपस्वी कुलको शोक हो, हाथी, घोडे, पदातिकरूप सहनीय बलयुक्त राजा लोग बहुतसे बाण, धनु, असि और मुसल लेकर अपने अनुचरोंको साथ ले युद्ध करके समस्त देशोंको ध्वंस करते हुए घूमें ।।१।। ।।२।।३।। जो चंद्रमा वर्षका मालिक हो तो चलायमान पर्वतके समान काले सर्प अंजन, भ्रमर और महिषीकी नाईं काली द्युतिवाले मेघवृन्द आकाशको व्याप्त करत हैं, उत्कण्ठासूचक भारी शब्द करके समस्त दिशाओंको पूण करत हुए अमल जलसे पृथ्वीको पूर्ण करते हैं, सरोवरोंमें, कमल कुमुद और उत्पल फूल जाते हैं, उपवन (बाग) प्रफुल्ल वृक्षयुक्त और भ्रमरोंके शब्दसे शब्दायमान होते हैं, गाय दूध्र बहुतसा देती हैं, नेत्रोंको आनंद देनेवाली स्त्रियां आशक्तिसे अविरत पुरुषोंका रमण कराती हैं, ईख, शाट्टी, जौ, धान्य श्रेष्ठ और युक्त समूह समृद्धि युक्त चैत्य अर्थात् छोटे २ देवमंदिरोंसे अंकित और यज्ञ व होमके पवित्र शब्दसे शब्दायमान् होकर पथ्वी राजाओंसे पाली जाती है ।।४।।५।।६।। मंगल वर्षका स्वामी हो तो वायुसे उठी हुई अतिप्रचंड अग्नि ग्राम, वन और नगरोंको जलानेकी इच्छा करती है, पृथ्वीके मनुष्य चोरोंसे मार डाले जाकर सहायहीन और पशुहीन होकर हाहाकार करते हुए विचरण करते हैं; मेघकुल शून्यमें कम ऊँचा और संहत पूर्ति होकर भी कहीं बहुतसा जल नहीं वर्षाते, पका हुआ धान्य लगभग सूखही जाता है और किसी प्रकारसे निवटकर भी अविनयके हेतुसे दूसरे आदमी उसको हरण कर लेते हैं, मंगलके संवन्सरमें राजा लोग भलीभांतिसे प्रजाको नहीं पालते, पित्तसे उत्पन्न हुए रोगोंकी अधिकता होती है,, सर्पोंका कोप होता है, इस प्रकार प्रजाके लोग बिना नाजके दीन हीन और मृतकवत् हो जाते हैं ।।७।।८।।९।। बुध वर्षका स्वामी हो तो माया. इन्द्रजाल और भानमती करनेवाले मनुष्य और गंधर्व.

लेख्य, गणित व अस्त्र जाननेवालोंकी वृद्धि होती है, राजालोग प्रीतिकी कामनासे अद्भुतदर्शन और तुष्टिकर द्रव्य, परस्पर एक दूसरेको दान करनेकी इच्छा करते हैं, जगत्में वार्ता और त्रयी शास्त्र अविकल और सत्य रहता है, मनुके समान दंडनीति भली भांतिसे विराजमान रहती है, कोई शास्त्रज्ञानमें अपनी बुद्धिको लगाता है, कोई २ आन्वीक्षिकी शास्त्रसे परम पदके पानेकी चेष्टा करता है, बुधग्रह अपने वर्षमें अथवा मासमें इस प्रकारसे पृथिवीको हास्यज्ञ दूत कवि, बालक नपुंसक, युक्ति जाननेवाले, सेतु, जल और पर्वतवासियोंकी की तृप्ति करता है और पृथ्वीपर औषधियां बहुतायतसे होती हैं ॥१०॥११॥१२॥ बृहस्पति वर्षका स्वामी हो तो यज्ञमें उच्चारण की हुई विपुल आकाश गामी वेदध्वनि, यज्ञध्वंस करनेवालोंके मनको विदीर्ण कर श्रेष्ठ ब्राह्मणोंके और यज्ञांश भागियोंके हृदयको आनंद कराकर भ्रमण करती हैं, उत्तम सत्यवती और अनेक हस्ती, घोडे, चतुरंग सेना, महाधन, गोकुल और धनयुक्त पृथ्वी राजाओंसे पाली जाकर और वर्धित होकर मानो स्वर्गवासियोंके समान स्पर्द्धा करनेवालोंके साथ विराजमान होती है, आसमानी पानीसे तृप्तिकारक विविध रंगके बादल पृथ्वीको ढक लेते हैं, इन देवतानाथके गुरु बृहस्पतिजीके शुभवर्षमें इस प्रकारसे पृथ्वी बहुतसे धान्यवाली और ऋद्धियुक्त होती है ॥१३॥१४॥१५॥ शुक्र वर्षका स्वामी हो तो पर्वताकार बादलोंकरके छोडे हुए जलसे परिपूर्ण हुए पृथ्वी सुंदर कमलोंसे जिनका जल ढका हुआ है ऐसे तडागोंसे आकीर्ण होकर नये नये गहनोंसे सजी हुई उज्ज्वल अंगवाली नारीके समान शोभा पाता है, और शाट्ठी व ईख पैदा करती है, शत्रुओंको क्षय करनेवाले और पोषण करते हुए जयशब्दसे दिशाओंको शब्दायमान करते हुए राजा लोग शिष्ट जनोंको संतोष और दुष्टोंका नाश करके नगर व खानिके सहित ऋद्धिशाली पृथ्वीका पालन करते हैं, वसन्त ऋतुमें मनुष्यगण कामिनियोंके साथ बारंबार मधुपान करके वेणुवीणाके साथ वारंवार श्रवणसुख कर गान किया करते हैं और अतिथि सुहृद व भाई बंधुओंके साथ अन्नभोजन किया करते हैं, शुक्रके वर्षमें इस प्रकारसे कामदेवकी जय हुआ करती है ॥१६॥१७॥१८॥ जब शनि वर्षका स्वामी होता है तब खोटे व्रतवाले चोर और बहुतसे संग्रामोंके होनेसे समस्त राज्य आकुल होते हैं, बहुतोंका पशु धन जाता रहता हैं, बंधुओंका वियोग होनेसे मनुष्यगण बहुतही रोते हैं. क्षुधाके मारे और रोगोंके मारे बहुतही व्याकुल होते हैं, आकाशमें जैसेही बादल आते हैं वैसेही पवन उनको उड़ा देता है, पृथ्वीपर एक पत्ता भी तो आरोग्य नहीं रहता, आकाशमें सूर्य चंद्रमाकी किरणें धूरिसे बंध जाती हैं, जलाशय जलहीन और नदियां कृशांग हो जाती हैं, कहीं पर नाज जलके अभावसे नष्ट हो जाता है, कहीं जल भरी हुई भूमिमें फल जाता है। इस प्रकार जिस वर्षमें शनि स्वामी होता है तब इन्द्र मन्द मन्द धान्यका देनेवाला जल वर्षाता है ॥१९॥२०॥२१॥ जो ग्रह क्षुद्र, अपटुकिरण, नीचगामी या किसीसे विजित हो जाता है, वह समस्त फलका दाता और पुष्टिकारी नहीं हो सकता। जो अशुभ ग्रह वर्षका स्वामी या मासका स्वामी होता है तो उसके भारसे उत्पन्न हुए फलकी प्राप्ति होती है, अन्यथा होवे तो शुभ फल भी प्राप्त हो जाता है ॥२२॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायामेकोनविंशोऽध्यायः ॥१९॥

अथ विंशोऽध्यायः

ग्रहश्रृंङ्गाटकः

यस्यां दिशि दृश्यन्ते विशंन्ति ताराग्रहा रविं सर्वे। भवति भयं दिशि तस्यामायुधकोपक्षुधातंकैः ॥ १ ॥ चक्रधनुःश्रृङ्गाटकदण्डपुरप्रासवज्रसंस्थानाः। क्षुदवृष्टिकरा लोके समराय च मानवेन्द्राणाम् ॥ २ ॥ यस्मिन् खांशे दृश्या ग्रहमाला दिनकरे दिनान्तगते। तत्रान्यो भवति नृपः परचक्रोपद्रवश्च महान् ॥३॥ यस्मिन्नृक्षे कुर्युः समागमं तज्जनान् ग्रहा हन्युः। अविभेदनाः। परस्परम-मलमयूखाः शिवास्तेषाम् ॥४॥ ग्रहसंवर्तसमागमसम्मोहसमाजसन्निपाताख्याः। कोशश्चेत्येषामभिधास्ये लक्षणं सफलम् ॥५॥ एकर्क्षे चत्वारः सह पौरैर्यायिनोऽथवा पञ्च। संवर्तो नाम भवेच्छिखिराहुयुतःस सम्मोहः ॥ ६ ॥ पौरः पौर-समेतो यायी सह यायिना समाजाख्यः। यमजीवसङ्गमेऽन्यो यद्यागच्छेत्तदा कोशः ॥७॥ दितः पश्चादेकः प्राक् चान्यो यदि स सन्निपाताख्यः। अविकृततनवः स्निग्धा विपुलाश्च समागमे धन्याः ॥ ८ ॥ समौ तु संवर्तसमागमाख्यौ सम्मोहकोशो भयदौ प्रजानाम्। समाजसंज्ञः सुसमः प्रदिष्टो वैरप्रकोपः खलु सन्निपाते ।९॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां ग्रहश्रृङ्गाटकं नाम विंशतितमोऽध्यायः॥२०॥

जिस दिशामें ताराग्रह रविमें प्रवेश करते हुए देखे जाते हैं, उसी दिशाके वासियोंको अस्त्रकोप, क्षुधा और आतंकसे भय होता है ॥१॥ ग्रहसंस्थान जब चक्र धनु, श्रृंगाटक (चतुष्पथ), दण्डपुर, ग्रास या वज्रके समान दिखाई दे तब लोगोंको क्षुधा, अवृष्टि और राजाओंका समर हुआ करता है ॥२॥ सूर्य भगवानके दिनके अंतमें चले जाने पर जिस देशके आकाशके अंशमें ग्रहमाला दिखलाई दे वहां पर दूसरे राजाका अधिकार होता है और परचक्रका महान् उपद्रव होता है ॥३॥ जिस नक्षत्रमें ग्रह आया कहते हैं, उस नक्षत्रके वशीभूत जनोंका विनाश करते हैं, परस्पर वर्जित विभेदन और निर्मल किरण होने पर वहांके मनुष्योंका मंगल होता है ॥४॥ ग्रहोंका संवर्त्त, समागम, सम्मोह, समाज सन्निपात और कोशनामक रोग हुआ करता है इन सबके सबल लक्षण कहे जाते हैं ॥५॥ एक नक्षत्रमें पौर ग्रहोंके साथ चार या पांच यायि ग्रहोंके मिलनेसे संवर्त्त कहा जाता है, राहुकेतुका सम्मोह कहलाता है ॥६॥ पौरके साथ पौरका वा यायिगणोंके साथ यायीका संयोग होनेपर समाज नाम होता है, शनि और बृहस्पतिके संगमें यदि कोई और ग्रह आ जाय तो वह कोश कहा जायगा ॥७॥ यदि पश्चिममें एक और पूर्वमें दूसरा उदय हो तो उसको सन्निपात कहते हैं, समागममें अर्थात् चंद्रमाके मिलनमें ग्रहगण विकाररहित, स्निग्ध, विपुल और धन्य होते हैं ॥८॥ सहंवर्त्त और समागमका फल समता है, सम्मोह और कोशमें प्रजाओंको भय होता है; समाज संज्ञामें उत्तम समता और सन्निपातमें वैर और कोप होता है ॥९॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां विंशोऽध्यायः ॥२०॥

अथैकविंशोऽध्यायः

गर्भलक्षणम्

अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तम् । यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन ॥ १ ॥ तल्लक्षणानि मुनिभिर्यानि निबद्धानि तानि दृष्टेदम् । क्रियते गर्गपराशरकाश्यपवात्स्यादिरचितानि ॥ २ ॥ दैवविदवहितचित्तो द्युनिशं यो गर्भलक्षणे भवति । तस्य मुनेरिव वाणी न भवति मिथ्याम्बुनिर्देशे ॥ ३ ॥ किं वातः परमन्यच्छास्त्रं ज्यायोऽस्ति यद्विदित्वैव । प्रध्वंसिन्यपि काले त्रिकालदर्शी कलौ भवति ॥ ४ ॥ केचिद्वदन्ति कार्त्तिकशुक्लान्तमतीत्य गर्भदिवसाः स्युः । न तु तन्मतं बहूनां गर्गादीनां मतं वक्ष्ये ॥ ५ ॥ मार्गशिरशुक्ल पक्षप्रतिपत्प्रभृति क्षपाकरेऽषाढाम् । पूर्वां वा समुपगते गर्भाणां लक्षणं ज्ञेयम् ॥६॥ यन्नक्षत्रमुपगते गर्भश्चन्द्रे भवेत् स चंद्रवशात् । पञ्चनवते दिनशते तत्रैव प्रसवमायाति ॥७॥ सितपक्षभवाः कृष्णे शुक्ले कृष्णा द्युसंभवा रात्रौ नक्तं प्रभवाश्चाहनि संध्याजाताश्च संध्यायाम् ॥८॥ मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्लजाताश्च । पौषस्य कृष्णपक्षेण निर्दिशेच्छ्रावणस्य सितम् ॥ ९ ॥ माघसितोत्था गर्भाः श्रावणकृष्णे प्रसूतिमायान्ति । माघस्य कृष्णपक्षेण निर्दिशेद्भाद्रपदशुक्लम् ॥ १० ॥ फाल्गुनशुक्लसमुत्था भाद्रपदस्यासिते विनिर्देश्याः । तस्यैव कृष्णपक्षोद्भवास्तु ये तेऽश्वयुक्शुक्ले ॥ ११ ॥ चैत्रसितपक्षजाताःकृष्णेऽश्वयुजस्य वारिदा गर्भाः । चैत्रासितसम्भूताः कार्त्तिकशुक्लेऽभिवर्षन्ति ॥१२॥ पूर्वोद्भूता पश्चादपरोत्थाः प्राग्भवन्ति जीमूताः। शेषास्वपि दिक्ष्वेवं विपर्ययो भवति वायोश्च ॥ १३ ॥ ह्लादि मृदुदक्षिणशक्रदिग्भवो मारुतो वियद्विमलम् । स्निग्धसितबहुलपरिवेषपरिवृतौ हिममयूखार्कौ ॥ १४ ॥ पृथुबहुलस्निग्धघनं घनसूचीक्षुरकलोहिताभ्रयुतम् । काकाण्डमेचकाभं वियद्विशुद्धेन्दुनक्षत्रम् ॥ १५ ॥ सुरचापमन्द्रगर्जितविद्युत्प्रतिसूर्यकाः शुभा संध्या । शशिशिवशक्राशास्थाः प्रशान्तरवाः पक्षिमृगसंघाः ॥ १६ ॥ विपुलाः प्रदक्षिणचराः स्निग्धमयूखा ग्रहा निरुपसर्गाः । तरवश्च निरुपसृष्टांकुरा नरचतुष्पदा हृष्टां ॥ १७ ॥ गर्भाणां पुष्टिकराः सर्वेषामेव योऽत्र तु विशेषः । स्वर्तुस्वभावजनितो गर्भविवृद्धौ तमभिधास्ये ॥ १८ ॥ पौषे समार्गशीर्षे सन्ध्यारागोऽम्बुदाः सपरिवेषाः । नात्यर्थं मृगशीर्षे शीतं पौषेऽतिहिमपातः ॥१९॥ माघे प्रबलो वायुस्तुषारकलुषद्युती रविशशांकौ । अतिशीतं सघनस्यच भानोरस्तोदयौ धन्यौ ॥२०॥ फाल्गुनमासे रूक्षश्चण्डः पवनोऽभ्रसंप्लवाः स्निग्धः । परिवेषाश्चासकलाः कपिलस्ताम्रो रविश्च शुभः ॥२१॥ पवनघनवृष्टियुक्ताश्चैत्रे गर्भाः शुभाः सपरिवेषाः । घनपवनसलिलविद्युत्स्तनितैश्च हिताय

वैशाखे ॥ २२ ॥ मुक्तारजतनिकाशास्तमालनीलोत्पलाञ्जनाभासः । जलचरसत्त्वाकारा गर्भेषु घनाः प्रभूतजलाः ॥ २३ ॥ तीव्रदिवाकर किरणाभितापिता मन्दमारुता जलदाः । रुषिता इव धाराभिर्विसृजन्त्यम्भः प्रसवकाले ॥ २४ ॥ गर्भोपघातलिङ्गान्युल्काशनिपांसुपातदिग्दाहाः । क्षितिकम्पस्वपुरकीलककेतुग्रहयुद्धनिर्घाताः ॥ २५ ॥ रुधिरादिवृष्टिवैकृतपरिघेन्द्रधनूंषि दर्शनं राहोः । इत्युत्पातैरेभिस्त्रिविधैश्चान्यैर्हतो गर्भः ॥ २६ ॥ स्वर्तुस्वभावजनितैः साभान्यैर्यैश्चलक्षणैर्वृद्धिः । गर्भाणां विपरीतैस्तैरेव विपर्ययो भवति ॥२७॥ भाद्रपदाद्वयविश्वाम्बुदैवपैतामहेष्वथर्क्षेषु । सर्वेष्वृतुषु विवृद्धो गर्भो बहुतोयदो भवति ॥२८॥ शतभिषगाश्लेषार्द्रास्वातिमघासंयुतः शुभो गर्भः । पुष्णाति बहून्दिवसान् हन्त्युत्पातैर्हतस्त्रिविधैः ॥२९॥ मृगमासादिष्वष्टौ षट् षोडश विंशतिश्चतुर्युक्ता । विंशतिरथ दिवसत्रयमेकतमर्क्षेण पञ्चभ्यः ॥३०॥ क्रूरग्रहसंयुक्ते करकाशनिमत्स्यवर्षदा गर्भाः । शशिनि रवौ वा शुभसंयुतेक्षिते भूरिवृष्टिकराः ॥३१॥ गर्भसमयेऽतिवृष्टिर्गर्भाभावाय निर्निमित्तकृता । द्रोणाष्टांशेऽभ्यधिके वृष्टे गर्भः स्रुतो भवति ॥३२॥ गर्भः पुष्टः प्रसवे ग्रहोपघातादिभिर्यदि न वृष्टः । आत्मीयगर्भसमये करकामिश्रं ददात्यम्भः ॥३३॥ काठिन्यं याति यथा चिरकालधृतं पयः पयस्विन्याः । कालातीतं तद्वत्सलिलं काठिन्यमुपयाति ॥३४॥ पञ्चनिमितैः शतयोजनं तदर्धार्धमेकहान्यातः । वर्षति पञ्च समन्तात्तद्रूपेणैव यो गर्भः ॥३५॥ द्रोणः पञ्चनिमित्ते गर्भे त्रीण्याढकानि पवनेन । षड् विद्युता नवाभ्रैः स्तनितेन द्वादश प्रसवे ॥३६॥ पवनसलिलविद्युद्गर्जिताभ्रान्वितो यः स भवति बहुतोयः पञ्चरूपाभ्युपेतः । विसृजति यदि तोयं गर्भकालेऽतिभूरि प्रसवसमयमित्वा शीकराम्भः करोति ॥३७॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां गर्भलक्षणमेकविंशोऽध्यायः ॥२१॥

अन्नही जगत्का प्राण है और अन्न वर्षाकालके वशमें है इस कारण इस करके यत्नके सहित वर्षाकालकी परीक्षा करनी चाहिये ॥१॥ मैंने गर्ग, पराशर, काश्यप और वात्स्यादि मुनियोंके द्वारा रचे हुए और बांधे हुए वर्षाके समस्त लक्षण देखकर यह गर्भलक्षण बनाया है ॥२॥ जो दैवका जाननेवाला पुरुष रात दिन गर्भलक्षणमें मन लगाय सावधान चित्तसे रहते हैं, उनके वाक्य मुनियोंके समान मेघगणितमें कभी मिथ्या नहीं होते ॥३॥ इससे कौनसा श्रेष्ठ शास्त्र है, कि किसे श्रेष्ठ शास्त्रको जानकर विध्वंसी कलिकालमें भी लोग त्रिकालदर्शी होते हैं ॥४॥ कोई २ कहते हैं कि कार्तिकमासके शुक्लपक्षको लांघकर गर्भके दिन होते हैं; किन्तु यह बात सर्वसंमत नहीं है इसलिये गर्गादि बहुतसे ऋषियोंका मत प्रकाश करता हूं ॥५॥ अग्रहायण मासके शुक्ल पक्षकी प्रतिपदासे जिस दिन चंद्रमा पूर्वाषाढा नक्षत्रमें होता है उस दिनसेही सब गर्भोंका लक्षण जानना चाहिये ॥६॥ चंद्रमाके जिस नक्षत्रमें प्राप्त होनेसे । मेघको गर्भ होता है, चंद्रमाके वशसे १९५

दिनमें वह गर्भ प्रसवके कालको प्राप्त होगा ॥७॥ शुक्लपक्षका पैदा हुआ गर्भ कृष्णपक्षमें और कृष्णपक्षका पैदा हुआ गर्भ शुक्लपक्षमें, दिनका गर्भ रात्रिकालमें, रात्रिका गर्भ दिनके किसी भागमें और संध्याका गर्भ विपरीत संध्याकालमें प्रसव कालको पाता है, ॥८॥ मृगशीर्षादिमें पैदा हुए गर्भ और पौषशुक्लजात गर्भ मन्दफलयुक्त हैं, पौषकृष्णपक्षके द्वारा श्रावणका शुक्लपक्ष बताना चाहिये ॥९॥ माघमासके शुक्लपक्षका गर्भ श्रावणके कृष्णपक्ष में प्रसवकालको प्राप्त होता है, माघके कृष्ण पक्षद्वारा भाद्रमासका शुक्लपक्ष निश्चय होता है ॥१०॥ फाल्गुनके शुक्लपक्षजात गर्भ भाद्रमासके कृष्णपक्षमें प्रसव होने चाहिये, फाल्गुनके कृष्णपक्षजात जो गर्भ हैं, वह आश्विनमासके शुक्लपक्षमें प्रसूत होते हैं ॥११॥ चैत्रके श्वेत-पक्षजात गर्भ आश्विनके कृष्णपक्षमें जल देते हैं; और चैत्रके शुक्लपक्ष सम्भूत गर्भ कार्तिकके शुक्लपक्षमें जल वर्षाते हैं ॥१२॥ पूर्वदिशाके मेघ पश्चिममें उडते हैं और पश्चिमके मेघ पूर्वदिशामें उदित होते हैं, ऐसे ही शेष दिशाओंमें भी बादल और पवनका अदल बदल होता है ॥१३॥ उत्तर, ईशानकोण और पूर्वदिशाकी वायुमें आकाश निर्मल, आनंदकर, मृदु होता है। चद्रमा और सूर्य स्निग्ध, सफेत और बहुत करके घेरेदार होता है ॥१४॥ स्थूल, बहुत चिकने मेघोंसे युक्त अथवा काकके अण्डके समान और मोरके पंखोंके समान आकाशके होनेपर नक्षत्र और चंद्रमा विमल ज्योतिवालेही होते हैं ॥१५॥ इन्द्रधनुष और गंभीर गर्जनयुक्त, सूर्याभिमुख, बिजलीका प्रकाश करनेवाले उत्तर, ईशान और पूर्वदिशामें स्थित मेघोंके होनेपर और पक्षी व मृगकुलके शांत शब्द करनेपर संध्याकाल रमण ठीक होता है ॥१६॥ जो प्रदक्षिणा करते हुए बहुतसे ग्रह उपद्रवहीन और चिकनी किरणवाले हो, वृक्ष व्याधिके अंकुरोंसे हीन और नर व चौपाये हर्षित दृष्टि आवें तो गर्भोंकी पुष्टता होती है, परंतु वह निज ऋतु और स्वाभाविक गर्भके विषयमें कहा है ॥१७॥१८॥ अग्र-हायण और पौषमें मेघोंके संध्यारागरंजित और मण्डलदार होनेसे आग्रहायण मासमें अति शीत और पौषमें अत्यंत हिमपात होनेसे गर्भ पुष्ट नहीं होता ॥१९॥ माघमें यदि प्रबल वायु, चंद्र, सूर्यकी किरण तुषारके समान कलुषित और अत्यन्त शीतल हो तो मेघयुक्त भानुका अस्त और उदय वांछनीय ॥२०॥ जो फाल्गुनके महीनेमें पवन रूखी और प्रचंड बहै, चिकने बादल इकट्ठे हों, यदि वे संपूर्ण हों सूर्य अग्निके समान पिंगल और ताम्रवर्ण हो तो शुभ होता है ॥२१॥ यदि चैत्रमें सब गर्भ पवन, मेघ, वृष्टियुक्त और परिवेषयुक्त हो तो शुभ है। जो वैशाखमें मेघ, वायु, जल और शब्दायमान बिजलीसे युक्त हो तो गर्भसे हितसाधन होता है ॥२२॥ मोती या चांदीके समान वा तमाल, नील उत्पल और अंजनकी द्युतिके समान या जलचर प्राणियोंके समान आकारवाले मेघ बहुतसा जल वर्षावे और सूर्यकी किरणसे गर्भ तपे और मद २ पवनके चलनेसे बादल प्रसव-कालमें मानो रुषित होकर जलधारा वर्षावे ॥२३॥२४॥ उल्का, वज्र, धूरिका गिरना, दिग्दाह, भोंचाल गंधर्वनगर, कीलक, केतु, ग्रहयुद्ध, निर्घात, रुधिरादिके वर्षनेसे विकारपन-परिघ इन्द्रधनुष, राहुदर्शन इन सब उत्पातोंसे व और तीन उत्पातोंसे गर्भका नाश हो जाता है ॥२५॥ ऋतुके स्वभावसे साधारण लक्षणद्वारा जो गर्भ बढते हैं, उनके विपरीत लक्षणोंसे उनका बदल हो जाता है ॥२६॥ सब ऋतुओंमें ही पूर्वाभाद्रपदा, उत्तराभाद्रपदा पूर्वाषाढा उत्तराषाढा और रोहिणीनक्षत्रमें बढे हुए गर्भ बहुतसा जल देते हैं ॥२७॥ शतभिषा, आश्लेषा, आर्द्रा, स्वाती और मघासंयुक्त गर्भ शुभदायी और बहुत दिनतक पोषण

करते हैं तीन उत्पातोंसे हने हुए हो तो हनन करते हैं ।।२८।। जब चंद्रमा इन पांच नक्षत्रोंमेंसे किसी एक नक्षत्रमें रहता है तब अग्रहायणसे वैशाखतक छः मासमें क्रमानुसार ।।८।।६।।१६।।२०।।२४।। और ३ दिनतक बर बर वर्षा हुआ करती है ।।२९।। क्रूर-ग्रहसंयुक्त होनेपर समस्त गर्भ ओले, अशनि और मछली वर्षाया करते हैं और चंद्रमा या सूर्य शुभग्रहयुक्त या शुभग्रहसे देखे जानेपर बहुत ही वर्षा करते हैं ।।३०।। यदि गर्भ-समयमें अकारण ही बहुतसी वर्षा होवे तो गर्भका अभाव होता है, द्रोणके अष्टांशसे भी अधिक वर्षण करनेपर गर्भ नष्ट हो जाता है ।।३१।। जो पुष्टगर्भ ग्रहोपघातादिसे न वर्षे तो प्रसवकालमें आत्मीय गर्भके समय ओलेका मिला हुआ जल वर्षाते हैं ।।३२।। जिस प्रकार गायोंका बहुत कालतक धरा हुआ दूध कडेपनको प्राप्त हो जाता है, वैसे ही गर्भ अनेक दिन वीतनेपर कठिनताको प्राप्त हो जाता है ।।३३।। जो गर्भ पांच प्रकारके निमित्तसे पुष्ट होता है वह गर्भ शतयोजनतक फैलकर वर्षा करता है, उसे एक २ निमित्तके अभावमें, शत योजनके अर्द्धार्द्धकी हानि होकर वर्षा होती है ।।३४।। अर्थात् चतुर्निमित्तका गर्भ ५० योजन (२०० कोश), त्रिनिमित्तक २५ योजन (१०० कोश), द्विनिमित्तक १२।। योजन (५० कोश) और एक निमित्तकगर्भ ५ योजन (२० कोश) तक जल वर्षाता है, पांचनिमित्तकगर्भ एक द्रोणजल वर्षाता है, पवननिमित्तक तीन (३) आढक और विद्युन्नि-मित्तक ६ आढक जल वर्षाता है ।।३५।। जो गर्भ पवन, जल, बिजली, गर्जित और मेघ रूप पंचनिमित्त युक्त है सो बहुतसा जल देता है, यदि गर्भकालमें बहुतसा जल वर्षे तो प्रसवकालको लांघकर जलकण वर्षा करते हैं ।।३६।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायामेकविंशोऽध्यायः ।।२१।।

अथ द्वाविंशोऽध्यायः

गर्भधारणम्

ज्येष्ठसितेऽष्टम्याश्चत्वारो वायुधारणादिवसाः । मृदुशुभपवनाः शस्ताः स्निग्धघ-नस्तगितगगनाश्च ।।१।। तत्रैव स्वात्याद्ये वृष्टे भचतुष्टये क्रमान्मासाः । श्रावण-पूर्वा ज्ञेयाः परिश्रुता धारणास्ताः स्युः ।।२।। यदिताः स्युरेकरूपाः शुभास्ततः सान्तरास्तु न शिवाय । तस्करभयदाःप्रोक्ताः श्लोकाश्चाप्यत्र वासिष्ठाः ।।३।। सविद्युतः सपृषतः सपांसूत्करमारुताः । सार्कचन्द्रपरिच्छन्ना धारणाः शुभधारणाः ।।४।। यदा तु विद्युतः श्रेष्ठाःशुभा शाप्रत्युपस्थिताः । तदापि सर्वसस्यानां वृद्धिं ब्रूयाद्विचक्षणः ।।५।। सपांसुवर्षाः स।पर्श्च शुभाबालक्रीया अपि । पक्षिणां सुस्वरा वाचः क्रीडा पांशुजलादिषु ।।६।। रविचंद्रपरि वेषाः स्निग्धा नात्यन्तदूषिताः । वृष्टिस्तदापि विज्ञेया सर्वसस्याभिवृद्धये ।।७।। मेघाः स्निग्धा संहताश्च प्रदक्षिण-गतिक्रियाः । तदा स्यान्महती वृष्टिः सर्वसस्यार्थसाधिका ।।८।।

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां मेघगर्भधारणं नाम द्वाविंशोऽध्यायः ।।२२।।

ज्येष्ठमासके शुक्लपक्षकी अष्टमी आदिको चार दिनतक वायुसे गर्भधारण ज्ञान होनेके दिन हैं। सो मृदु शुभ वायुयुक्त होनेपर या चिकने मेघसे ढके हुए बादलके होनेपर श्रेष्ठ है ॥१॥ उसमें स्वाती आदि चार नक्षत्रोंके वर्षा हो तो क्रमसे श्रावणादि महीनेमें गर्भधारण परिस्रुत जानना अर्थात् वर्षा न होगी ॥२॥ यदि यह चारों दिन एकसे हों तो शुभ होता है, जो इससे विपरीत हो तो मंगलदायी नहीं होते, बरन् तस्करोंका भय होता है। वसिष्ठजीके कहे हुए श्लोक इस विषयमें कहे हैं यथा ॥३॥ दामिनी; जलकण और धूरि मिला हुआ पवन चले, चंद्रमा वा सूर्यका मेघोंसे ढके रहना इस प्रकारका जो गर्भ धारण है सो श्रेष्ठ है ॥४॥ जिस समय श्रेष्ठ बिजली शुभ दिशाओंमें दमके तब बुद्धिमान् पुरुषको कहना चाहिये कि धान्यकी वृद्धि होगी ॥५॥ जो बालक खेलते २ जल या धूरिको वर्षावे या पक्षियोंका मधुर २ शब्द हों, पक्षी धूल या जलादिमें किलोलें करें तो शुभ होता है ॥६॥ चंद्रमा सूर्यके मण्डल स्निग्ध है और अत्यंत दूषित नहीं हो तो इस कालकी वर्षा ही सब धान्योंको बढानेवाली है ॥७॥ मेघ चिकने, गाढे और प्रदक्षिण गतिसे परिक्रमा करते हुए चलते हों तो सर्व धान्य और अर्थकी साधन करनेवाली बडी भारी वर्षा होती है ॥८॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां द्वाविंशोऽध्यायः ॥२२॥

अथ त्रयोविंशोऽध्यायः

प्रवर्षणम्

ज्यैष्ठ्यां समतीतायां पूर्वाषाढादिसम्प्रवृष्टेन। शुभमशुभं वा वा वाच्यं परिमाणं चाम्भसस्तज्ज्ञैः ॥१॥ हस्तविशालं कुण्डकमधिकृत्याम्बुप्रमाणनिर्देशः। पञ्चाशत्पलमाढकमनेन मिनुयाज्जलं पतितम् ॥२॥ येन धरित्री मुद्रा जनिता वा बिन्दवस्तृणाग्रेषु। वृष्टेन तेन वाच्यं परिमाणं वारिणः प्रथमम् ॥३॥ केचिद्यथाभिवृष्टं दशयोजनमण्डलं वदन्त्यन्ये। गर्गवसिष्ठपराशरमतमेतद्द्वादशान्न परम् ॥४॥ येषु च भेष्वभिवृष्टं भूयस्तेष्वेव वर्षति प्रायः। यदि नाप्यादिषु वृष्टं सर्वेषु तदा त्वनावृष्टिः ॥५॥ हस्ताप्यसौम्यचित्रापौष्णधनिष्ठासु षोडश द्रोणाः। शतभिषगैन्द्र स्वातिषु चत्वारः कृत्तिकासु दश ॥६॥ श्रवणे मघानुराधाभरणीमूलेषु दश चतुर्युक्ताः फल्गुन्यां पञ्चकृतिः पुनर्वसौ विंशतिद्रोणाः ॥७॥ ऐन्द्राग्नाख्ये वैश्वे विंशतिः सार्पभे च दशत्र्यधिकाः। आहिर्बुध्न्यार्यम्णप्राजापत्येषु पञ्चकृतिः ॥८॥ पञ्चदशाजे पुष्ये कीर्तिता च वाजिभे दश द्वौ च। रौद्रेऽष्टादश कथिता द्रोणा निरुपद्रवेष्वेषु ॥९॥ रविरविसुतकेतुपीडिते भे क्षितितनयत्रिविधाद्भुताहतेच। भवति हि न शिवं न चापि वृष्टिःशुभसहिते निरुपद्रवे शिवं च ॥१०॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां प्रवर्षणं नाम त्रयोविंशोऽध्यायः ॥२३॥

ज्येष्ठकी पूर्णिमाके भलीभांति वर्ष जानेपर यदि पूर्वाषाढादि नक्षत्रमें वर्षा हो तो जलका परिमाण और शुभाशुभ बुद्धिमानोंको कहना उचित है ॥१॥ एक हाथ लम्बे

और एक हाथ चौडे कुण्डको धारण करके जलका प्रमाण कहना चाहिये यह पानीसे भर जाय तो उस वर्षे हुए जलको तोलकर वर्षाका परिणाम कहे। उक्त पात्रका परिणाम पचास पल है। यह जलसे भर जाय तो वर्षे हुए जलका परिणाम एक आढक होता है ।।२।। जिसके गिरनेसे पृथ्वीपर चिह्न पड जाय यातृणोंकी नोकोंपर पानीकी बूंदें ठहर जायँ, उस वर्षासे ही जलका प्रथम परिणाम कहना चाहिये ।।३।। कोई २ कहते हैं कि जहांतक देखा जाय वहां तकही वर्षा होती है; कोई २ ऊपर कहे हुए लक्षणसे दश योजन मण्डलमें वर्षाका होना कहते हैं, परंतु गर्ग, वसिष्ठ और पराशरके मतसे बारह योजन अर्थात् ४८ कोशके आगे वर्षा नहीं होती ।।४।। जिन नक्षत्रोंमें वर्षा होती है, बहुधा प्रसवकालके समय उन्हीं सब नक्षत्रोंमें वर्षा हुआ करती है, परंतु यदि पूर्वाषाढासे लेकर मूलनक्षत्रतक किसी नक्षत्रमें वर्षा न हो तो सब नक्षत्रोंमें अनावृष्टि होती है ।।५।। जो उपद्रवहीन चंद्रमा हस्त पूर्वाषाढा, मृगशिर, चित्रा, रेवती और धनिष्ठामें हो तो सोलह द्रोण, शतभिषा, ज्येष्ठा और स्वातीमें ४ द्रोण, कृत्तिकामें १० दश, श्रवण, मघा, अनुराधा, भरणी और मूलमें चतुर्दश, फाल्गुनीमें पच्चीस, पुनर्वसुमें २० वीस, विशाखा और उत्तराषाढा नक्षत्रमें बीस, आश्लेषा नक्षत्रमें तेरह, उत्तराभाद्रपदा, उत्तरफाल्गुनी और रोहिणीमें पच्चीस, पूर्वाभाद्रपदा, पुष्य और अश्विनी नक्षत्रमें बारह और आर्द्रामें अठारह द्रोण जल वर्षाता है ।६।।७।।८।।९।। यदि सब नक्षत्र सूर्य, शनि वा केतुसे पीडित हों और मंगल करके त्रिविध अद्भुत द्वारा आहित हों तो वर्षा नहीं होती, परंतु सुखके साथ निरुपद्रव होनेपर शुभ होता है ।।१०।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबाद वास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां त्रयोविंशोऽध्यायः ।।२३।।

अथ चतुर्विंशोऽध्यायः

रोहिणीयोगः

कनकशिलाचयविवरजतरुकुसुमासङ्गिमधुकरानुरुते । बहुविहगकलहसुरयुवतिगीतमन्द्रस्वनोपवने ।।१।। सुरनिलयशिखरिशिखरे बृहस्पतिर्नारदाय यानाह । गर्गपराशरकाश्यपमयाश्च याञ्छिष्यसङ्घेभ्यः ।।२।। तानवलोक्य यथावत् प्राजापत्येन्दुसम्प्रयोगार्थान् । स्वल्पग्रन्थेनाहं तानेवाभ्युद्यतो वक्तुम् ।। ३ ।। प्राजेश माषाढतमिस्रपक्षे क्षपाकरेणोपगतं समीक्ष्य । वक्तव्यमिष्टं जगतोऽशुभं वा शास्त्रोपदेशाद्ग्रहचिन्तकेन ।।४।। योगो यथानागत एव वाच्यः स धिष्ण्ययोगः करणे मयोक्तः । चंद्रप्रमाणद्युतिवर्णमार्गैरुत्पातपातैश्च फलं निगद्यम् ।। ५ ।। पुरादुदक्पूर्वतोऽपि वा स्थलं त्र्यहोषितस्तत्र हुताशतत्परः । ग्रहान् सनक्षत्रगणान् समालिखेत् सधूपपुष्पैर्बलिभिश्च पूजयेत् ।।६।। सरत्नतोयौषधिभिश्चतुर्दिशं तरुप्रवालापिहितैः सुपूजितैः । अकालमूलैः कलशैरलंकृतं कुशास्तृतं स्थण्डिलमावसद्विजः ।।७।। आलभ्य मंत्रेण महाव्रतेन बीजानि सर्वाणि निधाय कुम्भे । प्लाव्यानि चामीकर-

दर्भतोयैर्होमो मरुद्वारुण सौम्यमंत्रैः ॥ ८ ॥ श्लक्ष्णां पताकामसितां विदध्याद्दण्ड-
प्रमाणां त्रिगुणोच्छ्रितां च । आदौ कृते दिग्ग्रहणेनभस्वान् ग्राह्यस्तया योगगते
शशाङ्के ॥ ९ ॥ तत्रार्धमासाः प्रहरैर्विकल्प्या वर्षानिमित्तं दिवसास्तदंशैः । सव्येन
गच्छञ्छुभदः सदैव यस्मिन्प्रतिष्ठा बलवान् स वायुः ॥१०॥ वृत्ते तु योगेऽङ्कुरि-
तानि यानि सन्तीह बीजानि धृतानि कुम्भे । येषां तु योंऽशोंऽकुरितस्तदंशस्तेषां
विवृद्धि समुपैति नान्यः ॥११॥ शान्तपक्षिमृगराविता दिशो निर्मलं वियदनिन्दि-
तोऽनिलः । शस्यते शशिनि रोहिणीयुते मेघमारुतफलानि वच्म्यतः ॥ १२ ॥
क्वचिदसितसितैः सितैः क्वचिच्च क्वचिदसितैर्भुजगौरिवाम्बुवाहैः । वलितजठर-
पृष्ठमात्रदृश्यैः स्फुरिततडिद्रसनैर्वृतं विशालैः ॥ १३ ॥ विकसितकमलोदरावदा-
तैररुणाकरद्युतिरञ्चितोपकण्ठैः । छुरितमिव वियद्धनैर्विचित्रैर्मधुकरकुंकुमकिंशु-
कावदातैः ॥ १४ ॥ असितघननिरुद्धमेव वा चलिततडित्सुरचापचित्रितम् ।
द्विपमहिषकुलाकुलीकृतं वनमिव दावपरितमम्बरम् ॥ १५ ॥ अथवाञ्जनशैल-
शिलानिचयप्रतिरूपधरैः स्थगितं गगनम् । हिममौक्तिकशंखशशांककरद्युतिहारि-
भिरम्बुधरैरथवा ॥ १६ ॥ तडिद्धेमकक्षैर्बलाकाग्रदन्तैः स्त्रवद्वारिदानैश्चलत्प्रांत-
हस्तैः । विचित्रेन्द्रचापध्वजोच्छ्रायशोभैस्तमालालिनीलैर्वृतं चाब्दनागैः ॥ १७ ॥
संध्यानुरक्तेनभसिस्थितानामिन्दीवरश्यामरुचां घनानाम् । वृन्दानि पीताम्बरवे-
ष्टितस्य कान्ति हरेश्चोरयतां यदा वा ॥ १८ ॥ सशिखिचातकदर्दुरनिःस्वनैर्यदि-
विमिश्रितमन्द्रपटुस्वनाः । खमवतत्य दिगन्तविलम्बिनः सलिलदाः सलिलौघमुचः
क्षितौ ॥ १९ ॥ निगदितरूपैर्जलधरजालैस्त्र्यहमवरुद्धं द्व्यहमथवाहः । यदि
वियदेवं भवति सुभिक्षं मुदितजना च प्रचुरजला भूः ॥२०॥ रूक्षैरल्पैर्मारुताक्षिप्त-
देहैरुष्ट्रध्वांक्षप्रेतशाखामृगाभैः । अन्येषां वा निंदितानांसरूपैर्मूकैश्चाब्दैर्नोशिवंनापि
वृष्टिः ॥ २१ ॥ विगतघने वा वियति विवस्वानामृदुमयूखः सलिलकृदेवम् । सर
इव फुल्लं निशि कुमुदाढ्यं खमुडुविशुद्धं यदि च सुवृष्ट्यै ॥ २२ ॥ पूर्वोद्भूतैः
सस्यनिष्पत्तिरब्दैराग्नेयाशासम्भवैरग्निकोपः । याम्ये सस्यं क्षीयते नैर्ऋतेऽर्धं पश्चा-
ज्जातैः शोभना वृष्टिरब्दैः ॥ २३ ॥ वायव्योत्थैर्वातवृष्टिः क्वचिच्च पुष्टा वृष्टिः
सौम्यकाष्ठासमुत्थैः श्रेष्ठं सस्यं स्याणुदिक्सम्प्रवृद्धैर्वायुश्चैवं दिक्षु धत्ते फलानि
॥ २४ ॥ उल्कानि पातास्तडितोऽशनिश्च दिग्दाहनिर्घातमहीप्रकम्पाः । नावा
मृगाणां सपतत्त्रिणां च ग्राह्या यथैवाम्बुधरास्तथैव ॥ २५ ॥ नामांकितैस्तैरुदगा-
दिकुम्भैः प्रदक्षिणं श्रावणमासपूर्वैः । पूर्णैः स मासः सलिलस्य दाता स्रुतैरवृष्टिः-
परिकल्प्यमूनैः ॥ २६ ॥ अन्यैश्च कुम्भैर्नृपनामचिह्नैर्देशाङ्कितैश्चाप्यपरैस्तथैव ।
भग्नैः स्रुतैर्न्यूनजलैः सुपूर्णैर्भाग्यानि वाच्यानि यथानुरूपम् ॥२७॥ दूरगो निकटगोऽ-

थवा शशी दक्षिणे पथि यथातथा स्थितः । रोहिणीं यदि युनक्ति सर्वथा कष्टमव जगतो विनिर्दिशेत् ।। २८ ।। स्पृशन्नुदग्याति यदा शशांकस्तदा सुवृष्टिर्बहुलोपसर्गाः । असंस्पृशन्योगमुदक्समेतः करोति वृष्टिं विपुलां शिवं च ।। २९ ।। रोहिणीशकटमध्यसंस्थिते चन्द्रमस्यशरणीकृता जनाः । क्वापि यान्ति शिशुयाचिताशनाः सूर्यतप्तपिठराम्बुपायिनः ।। ३० ।। उदितं यदि शीतदीधितिं प्रथमं पृष्ठत एति रोहिणी । शुभमेव तदा स्मरातुराः प्रमदाः कामिवशे च संस्थिताः ।। ३१ ।। अनुगच्छति पृष्ठतः शशी कामी वनितामिव प्रियाम् । मकरध्वजबाणखेदिताः प्रमदानां वशगास्तदा नराः ।। ३२ ।। आग्नेय्यां दिशि चंद्रमा यदि भवेत्तत्रोपसर्गो महान् नैर्ऋत्यां समुपद्रुतानि निधनं सस्यानि यान्तीतिभिः । प्राजेशानिलदिक्स्थिते हिमकरे सस्यस्य मध्यश्चयो याते स्थाणुदिशं गुणाः सुबहवः सस्यार्घवृद्ध्यादयः ।। ३३ ।। ताडयेद्यदि च योगतारकामावृणोति विपुषा यदापि वा । ताडने भयमुशन्ति दारुणं छादने नृपवधोऽङ्गनाकृतः ।।३४।। गोप्रवेशसमयऽग्रतो वृषो याति कृष्णपशुरेव वा पुरः । भूरि वारि शबले तु मध्यमं नो सितेंऽम्बु परिकल्पनापरैः ।। ३५ ।। दृश्यते न यदि रोहिणीयुतश्चन्द्रमा नभसि तोयदावृते । रुग्भयं महदुपस्थितं तदा भूश्च भूरिजलसस्यसंयुता ।।३६।।

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां नाम चतुर्विंशोऽध्यायः ।। २४ ।।

सुमेरुपर्वतके शिखरपर लगे हुए वृक्षोंके फूलोंपर आसक्त हुए भ्रमरोंके गुंजारसे अनेक प्रकारके पक्षियोंकी चहकारसे और देवाङ्गनाओंके मृदु गंभीर गीतोंके स्वरसे परिपूर्ण, पर्वतकी चोटीपर स्थित रमणीक उपवनोंमें बृहस्पतिजीने नारदजीसे जो रोहिणी योग कहा था और गर्ग, पराशर, काश्यप, ऋषियोंने और मयअसुरने अपने शिष्योंसे जो कहा था, उसको देखकर इस छोटेसे ग्रंथमें उसी रोहिणी और चंद्रमाके योगका अर्थ यथार्थ २ वर्णन करनेको हम उत्साही हुए हैं ।।१।।२।।३।। आषाढ मासके कृष्णपक्षमें रोहिणीका चंद्रमाके साथ मेल देखकर जगत्का इष्ट या अनिष्ठ शास्त्रके उपदेशानुसार दैवज्ञ कह सकता है ।।४।। मेल होनेसे पहले ही उनका योग जिस प्रकारसे होना चाहिये, करण (पंचसिद्धान्तिका) में वह धिष्ण्ययोग हमारे द्वारा कहा जा चुका है, चंद्रमाका प्रमाण द्युति, वर्ण, मार्ग और उत्पातके द्वारा ही फल कहना चाहिये ।।५।। ग्रहसंस्थानके जाननेवाला नगरकी पूर्व उत्तरदिशामें नक्षत्रसहित ग्रहोंको लिखकर धूप, फूल और बलिसे पूजा करे ।।६।। चारों ओरमें वृक्ष और कौंपलसे ढका हुआ रत्नसहित जल और औषधियुक्त, तिसकी तलीका भी न हो ऐसे पूजनीय कलशके द्वारा कुश बिछे हुए यज्ञस्थानमें ब्राह्मणको-बैठना चाहिये ।।७।। महाव्रत नामके मंत्रोंसे अभिमंत्रित कर सब प्रकारके बीज घडेमें डालकर सुवर्ण और दर्भयुक्त जलसे उसको प्लावित करे और मारुत, वरुण और सौम्य मंत्रसे होम करे ।।८।। चंद्रमाका योग होनेपर दंडके समान बारह हाथ ऊंचे बांसपर ४ हाथ लम्बी काले रंगकी पताका धारण करे। पहले दिन निर्णय करके उस पताकासे कितने क्षणतक कौन दिशामें हवा चलती है सो जाने ।।९।। एक प्रहरतक एक दिशामें

हवा चले तो १५ दिन तक वर्षा होगी फिर इस प्रकार वायु बहनके कालसे दिवस के अंशको निर्णय करे (श्रावणसे कार्तिकतक इन चार मासके आठ पक्षका एक २ पक्ष एक एक अंशसे निर्देश करना चाहिये) बांयी दिशामें वायु गमन करे तो शीघ्र ही शुभदायी होती है और जो एक नियतलक्ष्यमें अर्थात् एक दिशामें ही गमन करे तो वह वायु प्रतिष्ठावान् और बलवान् होता है ॥१०॥ इस योग के चले जानेपर घडेमें धरे हुए बीजोंमेंसे जो जो अंकुरित हों उनका वही २ अंश ही वृद्धिको प्राप्त होगा, और अंश नहीं ॥११॥ रोहिणीके साथ चंद्रमाका मेल होनेपर यदि सब दिशाएँ शांत हो जायँ, पक्षीगण या मृगगण उनमें मनोहर शब्द करे, आकाश निर्मल और वायु आनंदित हो तो भूमिकी श्रेष्ठ सिद्धि होती है। इसके उपरांत मेघ मारुतके फल क्रमानुसार कहे जाते हैं ॥१२॥ आकाशमें कहीं कालेसे मिला हुआ श्वेत, कहीं श्वेत, कहीं कृष्ण वर्ण, कहीं वलित जठर, पृष्ठ मात्र दृश्य अर्थात् कुण्डली मारकर सर्पके मारनेसे जैसे जिनकी पीठ और पेट दीख पडती हों, चमकती हुई बिजलीके समान जीभवाले और शब्दयुक्त विशाल भुजंगाकार मेघोंके द्वारा जो आकाश घिर जाय, खिले हुए कमलके समान निर्मल व अरुण है समीपभाग जिनका, मधुकर, कुंकुम, टेसूके फूलके समान निर्मल विचित्र मेघोंसे रंगनेके समान जो आकाश शोभायमान हो, काले मेघोंसे रंगनेके समान जो आकाश शोभायमान हो, काले मेघोंसे ढका हुआ हो या चमकती हुई बिजली और इन्द्रधनुषके द्वारा चित्रित आकाश मानो हाथी और भैसोंके द्वारा आकुल किया हुआ दावानलयुक्त वनके समान दिखलाई दे या अञ्जन पहाडके काले पत्थरोंके समान मेघोंसे आकाश छा जाय, अथवा हिम, मुक्ता, शंख और चंद्रकिरणोंकी ज्योति हरण करनेवाले बादलोंसे जो आकाशमण्डल ढक जाय, या बिजलीरूप हैमकक्षासंपन्न वायुका रूप अग्रदन्तरूप जलरूप मद चुआता प्रांतरूप कर चलानेवाला, विचित्र इन्द्रका रूप ऊंची ध्वजासे शोभायमान और तमाल वा भ्रमरके समान नीलवर्ण हाथीरूप बादलसे सब आकाश छा जाय, जो सांझके रागसे रँगे हुए आकाशमें स्थित नीले पद्मके समान मेघ बृंद पीतांबर पहरे हुए हरिकी कान्तिको हरण करे और मोर चातक व मेंढकोंके शब्दके साथ यदि मेघका गंभीर शब्द मिल जाय तो दिशाओंमें फैले हुए आकाशव्यापी बादल पृथ्वीपर बहुतसा जल वर्षाते हैं ॥१३॥१४॥१५॥ ॥१६॥१७॥१८॥१९॥ इस उक्त प्रकारके बादलोंसे आकाश दो या तीन दिन घिरे रहे तो सुभिक्ष हो, मनुष्य प्रसन्न हों और पृथ्वीपर बहुतसा जल वर्षे ॥२०॥ रूखे और अल्पपवनसे जिनका देह फैल गया है, ऊंट, काग, प्रेत किंवा वानरोंके समान या अन्य निन्दित आकारवाले शब्दरहित मेघ जो उदय हों तो शुभ नहीं होता, न वर्षा होती है ॥२१॥ अथवा आकाश मेघशून्य हो, यदि सूर्यकी किरणें तीक्ष्ण हों तो जल वर्षेगा और रात्रिकालमें आकाश निर्मल नत्रत्रोंके साथ कुमुद सरोवरके समान प्रफुल्ल हो तो वृष्टि अच्छी होती है ॥२२॥ पूर्वदिशाके उत्पन्न हुए मेघोंसे धान्य भलीभांति पक जाता है, आग्नेय कोणके उठे हुए मेघोंसे अग्निका कोप होता है, दक्षिण दिशाके उत्पन्न मेघोंसे धान्यका क्षय होता है, नैर्ऋतसे उठे बादलों करके महँगी होती है और पश्चिमके उठे हुए मेघोंसे सुंदर वर्षा होती है ॥२३॥ वायुकोणके उठे हुए मेघोंसे वायु और कहीं भी वर्षा होती है, उत्तर दिशाके उत्पन्न हुए मेघोंसे पुष्ट वर्षा होती है और ईशानकोणके उठे हुए मेघोंसे श्रेष्ठ धान्य होता है, चारों ओरकी वायुमें भी ऐसा ही फल होता है

।।२४।। जो रोहिणीयोगके दिन उल्का गिरे, विजली, वज्रपात, दिग्दाह, निर्घात, पृथ्वीका कंपायमान होना और मृग व पक्षियोंका कोलाहल शब्द हो तो बादलके लक्षणके समान फल ग्रहण किया जाता है ।।२५।। रोहिणीयोगके दिन वृष्टि गिरनेके समय उत्तर आदि चार दिशाओंमें श्रवण, भादों, क्वार, कार्तिक इन चारोंके नामके चार घडे प्रदक्षिणाके क्रमसे स्थापित करे, जो जो घडा जलसे पूर्ण होगा वही श्रावणादि मासका क्रमानुसार जलदाता होगा जिस घडेका जल टपक जाय तो अवृष्टि होगी, घट जाय तो जल कम वर्षेगा ।।२६।। इसी भांतिसे और घडे राजाओंके नामके और देशोंके नामके प्रदक्षिणाके भावसे स्थापन करे, फिर दूसरे दिन उनको देखे. जो टूट जाय, टपक जाय, जिसका जल कम हो जाय या जो पूर्ण रहे, उसका वैसा ही भाग्य निर्णय करना चाहिये ।।२७।। चंद्रमा दूर स्थित होकर रहे या निकट स्थित रहे; पर दक्षिणमार्गमें यदि रोहिणीयुक्त हो तो सर्व प्रकारसे संसारको कष्टदायी होता है ।।२८।। जब चंद्रमा रोहिणीके उत्तर दिशावाले नक्षत्रको स्पर्श करता हुआ हो तो बहुतसे उपद्रवोंके साथ अच्छी वर्षा होती है और विना योग स्पर्श किये उत्तर दिशाके नक्षत्रमें जाय तो भी बहुतसी वर्षा होती है और मंगल होता है ।।२९।। जो चंद्रमा रोहिणीके शकटमें (आकाशमें शकटके आकारके पांच तारे हैं) विराजमान हो तो आदमी शरणरहित, क्षुधातुर, बालयुक्त और सूर्य करके तपाई हुई हांडीके जलको पीते हुए समय बिताते हैं ।।३०।। पहले चंद्रमा उदय हो और जिसके पीछे ही रोहिणी उदय हो तो कामदेववसे व्याकुल हुई स्त्रियां कामी पुरुषके वश हो जाती हैं ।।३१।। प्यारी भार्याके पीछे कामी जनके समान यदि चंद्रमा रोहिणीके पीछे चले तो मनुष्यगण पञ्चबाणके बाणोंसे पीडित होकर औरतोंके वशमें हो जाते हैं ।।३२।। जो अग्निकोणमें चंद्रमा विराजमान हो तो बडे २ उपद्रव होते हैं, नैर्ऋतकोणमें हो तो समस्त धान्य ईतिसे ग्रसित होकर नष्ट हो जाते हैं, पश्चिम और वायुकोणमें चंद्रमा हो तो खेतीका मध्यम संग्रह होता है, ईशानकोणमें हो तो अनेक गुण होते हैं और धान्यका मूल्य भी बढ जाता है इत्यादि ।।३३।। जो चंद्रमा योगतारेको ताडना करे या शरीरसे ढक ले तो क्रमानुसार दारुण भय और स्त्रीके द्वारा राजाका वध होता है ।।३४।। संध्याके समय जब गायें वनसे चरकर आवें (और उस समय चंद्रमाके प्रवेशका समय हो) और तिस समय उनके आगे बैल या काला पशु आवे तो बहुतसी वर्षा होती है। शुक्ल पशुके आगे आनेसे मध्यम वर्षा होती है। जो अनेक रंगवाला पशु आगे हो तो वर्षाऊ बादल भी मेघ नहीं वर्षाते ।।३५।। यदि मेघसे ढके हुए आकाशमें चंद्रमा रोहिणीसे युक्त न दिखलाई पडे तो रोगका बडा भारी भय आता है और पृथ्वीपर बहुतसा जल और धान्य होते हैं ।।३६।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां चतुर्विंशोऽध्यायः ।।२४।।

अथ पंचविंशोऽध्यायः

स्वातियोगः

यद्रोहिणीयोगफलं तदेव स्वातावषाढासहिते च चन्द्रे। आषाढशुक्ले निखिलं विचिन्त्य योऽस्मिन् विशेषस्तमहं प्रवक्ष्ये ॥ १ ॥ स्वातौ निशांशे प्रथमेऽभिवृष्टे सस्यानि सर्वाण्युपयान्ति वृद्धिम्। भागे द्वितीये तिलमुद्गमाषा ग्रैष्मं तृतीयेऽस्ति न शारदानि ॥ २ ॥ वृष्टेऽह्नि भागे प्रथमे सुवृष्टिस्तद्वद्द्वितीये तु सकीटसर्पा। वृष्टिस्तु मध्यापरभागवृष्टे निश्छिद्रवृष्टिर्द्युनिशं प्रवृष्टे ॥ ३ ॥ सममुत्तरेण तारा चित्रायाः कीर्त्यते ह्यपांवत्सः। तस्यासन्ने चन्द्रे स्वातेर्योगः शिवो भवति ॥ ४ ॥ सप्तम्यां स्वातियोगे यदि पतति हिमं माघमासान्धकारे वायुर्वा चण्डवेगः सजलजलधरो वापि गर्जत्यजस्रम्। विद्युन्मालाकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं विज्ञेया प्रावृडेषा मुदितजनपदा सर्वसस्यैरुपेता ॥ ५ ॥ तथैव फाल्गुने चैत्रे वैशाखस्यासितेऽपि वा। स्वातियोगं विजानीयादाषाढे च विशेषतः ॥ ६ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां स्वातियोगो नाम पञ्चविंशोऽध्यायः ॥२५॥

जैसे चंद्रमाके साथ रोहिणीयोगका फल है स्वाती और आषाढ नक्षत्रके साथ चंद्रमाके योगका फल भी वैसा ही है। आषाढमासके शुक्लपक्षमें इसका भलीभांति विचार करके इसमें जो विशेषता है सो कही जाती है ॥१॥ स्वाती नक्षत्रमें रात्रिके पहले अंशमें वर्षा हो तो सर्व प्रकारके धान्य बढते हैं, दूसरे भागमें तिल, मूंग और उर्द और तिसरे भागमें ग्रीष्मकालका धान्य होता है। परंतु शरद ऋतुकी खेती नहीं होती ॥२॥ दिनके पहले भागमें वृष्टि होनेसे सुवृष्टि होती है, दूसरे भागमें होनेसे सर्प और कीडे होते हैं, मध्य और अपरभागमें वृष्टि हो तो सुवृष्टि और रातदिन वर्षनेसे उस वर्षमें बहुतसी वृष्टि होती है ॥३॥ चित्राके उत्तर ओरका तारा अपांवत्स[1] कहा जाता है, उसके निकट हुए चंद्रमाके साथ स्वातीका योग होनेपर मंगल होता है ॥४॥ यदि माघ मासकी कृष्णपक्षीय सप्तमी तिथिमें स्वातियोगसे हिम गिरे या प्रचंड वेगसे पवन चले, जलयुक्त बादल गर्जता रहे और आकाश यदि बिजली की रेखाओंसे यूक्त हो, चंद्रमा, सूर्य और ताराओंकी ज्योति रहे तो वर्षाकालमें जनपद आनंदित और सब धान्योंसे युक्त होते हैं ॥५॥ फाल्गुन चैत्र या वैशाखको कृष्णपक्षमें भी ऐसा ही स्वातीका योग होता है, परंतु आषाढ मासमें स्वातियोगको विशेषरूपसे जानना ॥६॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य पंडितबदेलवप्रसादमिश्रविरचितायां हिन्दीटीकायां पंचविंशोऽध्यायः ॥२५॥

---

१ "अपांवत्सस्तु चित्रायामुत्तरेंऽशैस्तु पञ्चभिः" चित्रा नक्षत्रके पांच अंश उत्तरविक्षेपमें अर्थात् तीन अंश स्फुट होनेके बाद विक्षेपमें जो एक बडा तारा दिखाई देता है सोई "अपांवत्स" है। सूर्यसिद्धांतनक्षत्रग्रहयुत्यधिकार ॥

अथ षड्विंशोऽध्यायः

आषाढीयोगः

आषाढ्यां समतुलिताधिवासितानामन्येद्युर्यदधिकतामुपैति बीजम् । तद्वृद्धिर्भवति न जायते यदूनं मन्त्रोऽस्मिन् भवति तुलाभिमन्त्रणाय ॥१॥ स्तोतव्या मंत्रयोगेन सत्या देवी सरस्वती । दर्शयिष्यसि यत्सत्यं सत्ये सत्यव्रता ह्यसि ॥ २ ॥ येन सत्येन चन्द्रार्कौ ग्रहा ज्योतिर्गणस्तथा । उत्तिष्ठन्तीह पूर्वेण पश्चादस्तं व्रजन्ति च ॥ ३ ॥ यत्सत्यं सर्ववेदेषु यत् सत्यं ब्रह्मवादिषु । यत् सत्यं त्रिषु लोकेषु तत् सत्यमिह दृश्यताम् ॥ ४ ॥ ब्रह्मणो दुहितासि त्वमादित्येति प्रकीर्तिता । कश्यपी गोत्रतश्चैव नामतो विश्रुता तुला ॥ ५ ॥ क्षौमं चतुःसूत्रकसन्निबद्धं षडङ्गुलं शिक्यकवस्त्रमस्याः । सूत्रप्रमाणं च दशांगुलानि षडेव कक्षोभयशिक्यमध्ये ॥ ६ ॥ याम्ये शिक्ये काञ्चनं सन्निवेश्यं शेषद्रव्याण्युत्तरेऽम्बूनि चैवम् । तोयैः कौप्यैः स्यन्दिभिः सारसैश्च वृष्टिर्हीना मध्यमा चोत्तमा च ॥ ७ ॥ दन्तैर्नागा गोहयाद्याश्च लोम्ना हेम्ना भूपाः सिक्थकेन द्विजाद्याः । तद्वद्देशा वर्षमासा दिशश्च शेषद्रव्याण्यात्मरूपस्थितानि ॥ ८ ॥ हैमी प्रधाना रजतेन मध्या तयोरलाभे खदिरेण कार्या । विद्धः पुमान्येन शरेण सा वा तुला प्रमाणेन भवेद्वितस्तिः ॥ ९ ॥ हीनस्य नाशोऽभ्यधिकस्य वृद्धिस्तुल्येन तुल्यं तुलितं तुलायाम् । एतत्तुलाकोशरहस्यमुक्तं प्राजेशयोगेऽपि नरो विदध्यात् ॥ १० ॥ स्वातावषाढास्वथ रोहिणीषु पापग्रहा योगगता न शस्ताः । ग्राह्यं तु योगद्वयमप्युपोष्य यदाधिमासो द्विगुणीकरोति ॥ ११ ॥ त्रयोऽपि योगाः सदृशाः फलेन यदा तदा वाच्यमसंशयेन । विपर्यये यत्त्विह रोहिणीजं फलं तदेवाभ्यधिकं निगद्यम् ॥१२॥ निष्पत्तिरग्निकोपो वृष्टिर्मन्दाथ मध्यमा श्रेष्ठा । बहुजलपवना पुष्टा शुभा च पूर्वादिभिः पवनैः ॥ १३ ॥ वृत्तायामाषाढ्यां कृष्णचतुर्थ्यामजैकपादर्क्षे । यदि वर्षति पर्जन्यः प्रावृट् शस्ता न चेन्न ततः ॥ १४ ॥ आषाढ्यां पौर्णमास्यां तु यद्यैशानोऽनिलीभवेत् । अस्तं गच्छति तीक्ष्णांशौ सस्यसम्पत्तिरुत्तमा ॥ १५ ॥

इति श्रीवराहमिहि० बृहत्संहितायामाषाढीयोगो नाम षड्विंशोध्यायः ॥ २६ ॥

आषाढी पूनमके दिन जब उत्तराषाढामें चंद्रमा चला जाय तब सभी अन्नका बीज (बीहन) बराबर तोलकर रख दे और दूसरे दिन जिस धान्यका बीज बहुतायतको प्राप्त हो अर्थात् बढ जाय उसकी वृद्धि होती है, जो धान्य कमती हो वह भलीभांति नहीं होता, इसमें तुला अभिमंत्रका मंत्र पढना चाहिये ॥१॥ सत्यात्मिका देवी सरस्वतीकी इस मंत्रसे इस प्रकार स्तुति करनी चाहिये, हे देवी सरस्वती ! आप सत्य संबंधमें सत्यव्रतवाली हैं, इसलिये जो सत्य है तिसको आप दिखा दें ॥२॥ इस संसारमें जिस सत्यके बलसे चंद्रमा

सूर्य ग्रह और ज्योतिर्गण पूर्वमें उदित होते और पश्चिममें अस्त हो जाते हैं, सर्व वेदमें जो सत्य है, ब्रह्मवादियोंमें जो सत्य है और त्रिलोकमें जो सत्य है वह सत्य यहां पर आप दिखा दें, क्योकि आप ब्रह्माकी पुत्री आदित्या नामसे विख्यात हैं, आप गोत्रमें काश्यपी और तुला नामसे विख्यात हैं ॥३–४॥ शनकी बनी हुई चार डेरियोंमें बंधी हुई छः अंगुलकी विस्तारवाली तखडी है, उसकी चारों डोरियोंका प्रमाण दश २ अंगुल होना चाहिये इस प्रकार दोनों पल्लोंके बीचमें छः अंगुलके परिमाणकी कक्षा रखनी चाहिये (जिस सूत्रको पकडकर उठाते हैं, उसे कक्षा कहते हैं) ॥५॥ दायीं ओरके पल्लेमें कांचन रखना चाहियें, ऊपरके पल्लेमें शेष द्रव्य और जल रखना चाहिये, कूप, सरोवर या नदीके जलसे यह कार्य करनेसे क्रमानुसार हीन, मध्यम और उत्तम वर्षा होती है, अर्थात् कुए का जल यदि पहले दिन की अपेक्षा दूसरे दिन कुछ अधिक भारी हो जाय तो वर्षा न होगी. यदि वृष्टिका जल अधिक भारी हो जाय तो मध्यम वर्षा होगी और नदी या कुण्डका जल अधिक भारी हो जाय तो उचित जल वर्षता है, सब जल बढै तो अतिवृष्टि और सब जल घटे तो अनावृष्टि होती है ॥७॥ दन्तसे नागगण, लोभसे गो, अश्वादि पशुगण, स्वर्गसे राजालोग सिक्थ अर्थात् एक ग्रास प्रमाण मोमसे द्विजाति लोगोंकी वृद्धि-हानि जानी जाती है, तथा मध्यदेश, वर्ष, मास और दिग्मंडल तथा शेष द्रव्य (धान्यादि) आत्मरूपसे अर्थात् जिस वस्तुकी हानि वृद्धि जाननी हो उसीको मापकर फल कहना. सुवर्णका बना हुआ तुलादण्ड ही अच्छा है, चांदीका मध्यम है, यह न हो तो खैरकी लकडीकी दण्डी बनानी चाहिये। अथवा जिस शरसे पुरुष विद्ध हो जाते हैं वैसे ही आकारकी और वितस्तिके प्रमाणकी दण्डी बनानी चाहिये ॥८॥९॥ तराजूके साथ तोल करनेमें हीनकी उन्चता और अधिककी वृद्धि (नीचता) होती है, यह तुलाकोशरहस्य कहा गया। मनुष्य रोहिणीयोगमें भी इसको धारण करते हैं ॥१०॥ स्वाती, रोहिणी और आषाढनक्षत्रमें पापग्रहयोग अच्छा नहीं है, परंतु जिस वर्ष अधि[1]मास हो अर्थात् आषाढमास हो, उस वर्षमें पहले कहे हुए दोनों योग ग्रहण किये जायेंगे ॥ ११ ॥ यदि तीनों (रोहिणी, स्वाती और आषाढी) योगोंका फल समान हो तो निसन्देह होकर शुभ या अशुभ फल जैसा हो सो कहना और अदलबदल होनेपर रोहिणीसे उत्पन्न हुआ जो फल है, वही अधिक कहा जाता है ॥१२॥ यदि पूर्वाई हवा चले तो धान्य भलीभांति निवट जाता है, अग्निकोण की हवा चलनेपर अग्निका कोप होता है, ऐसेही यदि दक्षिणादिकी प्रदक्षिणानुसार मंदवृष्टि, मध्यवृष्टि, उत्तमवृष्टि, झंझावृष्टि, पुष्टवृष्टि, और शुभवृष्टि होती है ॥१३॥ आषाढी पूर्णिमाके पीछे कृष्णचतुर्थीमें और पूर्वाषाढानक्षत्रमें जो बादल वर्षा करे तो वर्षा अच्छी है, नहीं तो नहीं ॥१४॥ आषाढी पौर्णिमासीको सूर्य अस्त होनेके समय यदि ईशानकोणकी पवन चले तब पृथ्वीपर धान्य उत्तम होता है ॥१५॥

इति श्रीवराहमिहिराचार्यविरचि० बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां षड्विशोऽध्यायः ॥२६॥

---

१ जिस चंद्रमाससे रविसंक्रमण नहीं होता उसको अधिमास या मलमास कहते हैं। "असंक्रात्तिना सोऽधिमासः स्फुटं स्यात्।" (सिद्धांन्तशिरोमणिः)

अथ सप्तविंशोऽध्यायः[1]

वातचक्रम्

पूर्वः पूर्वसमुद्रवीचिशिखरप्रस्फालनाघूर्णितश्चन्द्रार्कांशुसटाभिघातकलितो वायुर्यदाकाशतः। नैकान्तस्थितनीलमेघपटलां शारद्यसंवर्धितां वासन्तोत्कटसस्य मण्डिततला विद्यात्तदा मेदिनीम् ॥ १ ॥ यदाग्नेयो वायुर्मलयशिखरास्फालन पटुःप्लवत्यस्मिन् योगे भगवति पतङ्गे प्रवसति । तदा नित्योद्दीप्ता ज्वलन-शिखरालिङ्गिततला स्वगात्रोष्मोच्छ्वासैर्वमति वसुधा भस्मनिकरम् ॥ २ ॥ तालीपत्रलतावितानतरुभिः शाखामृगान्नर्तयन् योगेऽस्मिन् प्लवति ध्वनन् सुप-रुषोवायुर्यदा दक्षिणः। सर्वोद्योगसमुन्नताश्च गजवत्तालाङ्कुशैर्घट्टिताः कीनाशा इव मन्दवारिकणिकान्मुञ्चन्ति मेघास्तदा ॥ ३ ॥ सूक्ष्मैलालवलीलवङ्गनिचयान् व्याघूर्णयन् सागरे भानोरस्तमये प्लवत्यविरतो वायुर्यदा नैर्ऋतः । क्षुत्तृष्णामृतमा-नुषास्थिशकलप्रस्तारभारच्छदा मत्ता प्रेतवधूरिवोग्रचपला भूमिस्तदा लक्ष्यते ॥ ४ ॥ यदा रेणूत्पातैः प्रविकटसटाटोपचपलः प्रवातः पश्चार्धे दिनकरकरापात-समये । तदा सस्योपेता प्रवरनृपराबद्धसमरा धरा स्थाने स्थानेष्ववितरवसामांस-रुधिरा ॥५॥ आषाढीपर्वकाले यदि किरणपतेरस्तकालोपपत्तौ वायव्यो वृद्धवेगः प्लवति घनरिपुः पन्नगादानुकारी । जानीयाद्वारिधाराप्रमुदितमुदितां मुक्तमण्डूककण्ठां सस्योद्भासैकचिह्नां सुखबहुलतया भाग्यसेनामिवोर्वीम् ॥ ६ ॥ मेरुग्रस्तमरीचिमण्डलतले ग्रीष्मावसाने रवौ वात्यामोदिकदम्बगन्धसुरभिर्वायु-र्यदा चोत्तरः। विद्युद्भ्रान्तिसमस्तकान्तिकलनामत्तास्तदा तोयदा उन्मत्ता इव दृष्टचन्द्रकिरणां गां पूरयन्त्यम्बुभिः ॥ ७ ॥ ऐशानो यदि शीतलोऽमरगणैः संसेव्यमानो भवेत् पुन्नागागुरुपारिजातसुरभिर्वायुः प्रचण्डध्वनिः। आपूर्णोदकयौ-वनावसुमती सम्पन्नसस्याकुला धर्मिष्ठाः प्रणतारयो नृपतयो रक्षन्ति वर्णांस्तदा ॥ ८ ॥

इति श्रीवराहमिहिरकृतौबृहत्संहितायां वातचक्रं नाम सप्तविंशोऽध्यायः ॥ २७ ॥

आषाढीयोगके दिन जब सूर्य अस्त हो तब आकाशसे पूर्वाई पवन पूर्वसमुद्रके तरंग शिखरको स्पर्श करता हुआ घूमता और चंद्रमा सूर्यके किरणरूप जटाके अभिघातसे बंध जाता है तब समस्त पृथ्वी एकांतमें स्थित नीले बादलोंके समूहोंसे और वृद्धिको प्राप्त हुए शरदऋतुके फल धान्यसे युक्त होकर समस्त वसन्ती धान्यसे शोभायमान हो जाती है ॥१॥ भगवान् सूर्यके अस्ताचलपर गमन करनेपर जब मलयपर्वतके शिखरपर अखंडित आग्नेय

---

१ अत्र "केचिद्वातचक्रं" (अध्यायं) पठन्ति तद्वराहमिहिरकृतं न भवति। यतो निष्पत्तिरग्निकोपो वृष्टिर्मन्दाथ मध्यमा श्रेष्ठा। बहुजलपवना पुष्टा शुभा च पूर्वादिभिः पवनैः॥" इत्यनेन पौनरुक्त्यं भवति। बहुष्वादर्शेषु दृश्यतेऽतोऽस्माभिः सरसत्वाद् व्याख्यायते। यत। इति टीकाकृताभट्टोत्पलेनोक्तम्।

वायु वहन करे तो पृथ्वी नित्य उद्दीप्त होती है, और प्रकाशकी शिखासे तलमें आलिंगन पानेपर अपने गात्रके तापसे उत्पन्न हुए श्वासोंसे मानो भस्मको वमन करती है ।।२।। जब इस योगमें निठुर दक्षिणी पवन शब्द करते २ तालवृक्ष लताओंके समूह सहित वानरोंको नचाता रहता है, तब सर्व प्रकारके उद्योग करके ऊँचे गजके समान ताल और अंकुशसे ताडित हाथीके समान मेघ कृपण मनुष्यके समान थोडी वर्षा करते हैं ।।३।। सूर्यके अस्तगमनकालमें जब नैर्ऋतवायु छोटी इलायची और लवंग वृक्षोंको समुद्रके किनारे में घुमाता है तब भूख प्यासके मारे मृत मनुष्योंके हड्डियोंके टुकड़े और तिनकोंके गुच्छेके भारसे ढकी हुई पृथ्वीको उन्मत्त प्रेतकी वधूके समान उग्र व चपल दिखाया करता है ।।४।। संध्याके समय जब कि धूरि वर्षने करके केशरके आक्षेपद्वारा चञ्चल और गर्वके हेतुसे चञ्चल हो पश्चिममें बहता है, तब पृथ्वी धान्ययुक्त और प्रधान राजाओंकी समर-भूमि होकर स्थान २ में चरबी मांस व रुधिरसे बराबर ढकी रहती है ।।५।। आषाढी पूर्णिमाको जब सूर्यके अस्त होनेका समय आवे, उस समय यदि मेघका शत्रु वायवीय पवन गरुडकी चालका चलनेवाला होकर गमन करता है; तब पृथ्वी जलकी धारासे प्रफुल्ल, मेंडकोंके शब्दसे शब्दायमान और धान्यशोभाधारिणी होकर बहुत सुखके प्राप्त होनेसे भाग्य सेनाके समान दिखाई देती है ।।६।। ग्रीष्मके अंतमें जब सूर्यकी किरण मेरु पर्वतकी तलीमें पहुंच जाय तो सुगंधित उत्तर वायु कदम्बके फूलोंकी गंधसे सुगंधित होकर बहता है तब बादलोंमें बिजली घूमती है और वह मेघ समस्त दीप्ति धारण करनेसे मत्त होकर उन्मत्तके समान चंद्रमाकी किरणों करके हीन पृथ्वीको जलसे पूर्ण कर देता है ।।७।। जो प्रचण्डध्वनि पुन्नाग, अगरु व पारिजातके फूलोंसे सुगंधित ईशान वायु शीतल और देवताओंसे सेवनीय हो तो पृथ्वी चलरूप यौवनद्वारा परिपूर्ण और पके हुए नाजसे युक्त हो जाती है और शत्रुओंके वश करनेवाले धर्मात्मा राजालोग धर्मकी रक्षा करते हैं ।।८।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायांसप्तविंशोऽध्यायः ।।२७।।

अथाष्टाविंशोऽध्यायः

सद्योवृष्टिलक्षणम्

वर्षाप्रश्ने सलिलनिलयं राशिमाश्रित्य चन्द्रो लग्नं यातो भवति यदि वा केन्द्रगः शुक्लपक्षे । सौम्यैर्दृष्टः प्रचुरमुदकं पापदृष्टोऽल्पमम्भः प्रावृटकाले सृजति न चिराच्चन्द्रवद्भार्गवोऽपि ।। १ ।। आर्द्रं द्रव्यं स्पृशति यदि वा वारि तत्संज्ञकं वा तोयासन्नो भवति यदि वा तोयकार्योन्मुखो वा । प्रष्टा वाच्यः सलिलमचिरादस्ति निःसंशयेन पृच्छाकाले सलिलमिति वा श्रूयते यत्र शब्दः ।। २ ।। उदयशिखरि-संस्थो दुर्निरीक्ष्योऽतिदीप्त्या द्रुतकनकनिकाशः स्निग्धवैडूर्यकान्तिः । तदहनि कुरुतेऽम्भस्तोयकाले विवस्वान् प्रतपति यदि वोच्चैः खं गतोऽतीवतीक्ष्णम् ।। ३ ।।

विरसमुदकं गोनेत्राभं वियद्विमला दिशो लवणविकृतिः काकाण्डाभं यदा च भवेन्नभः । पवनविगमः पोप्लूयन्ते झषाः स्थलगामिनो रसनमसकृन्मण्डूकानां जलागमहेतवः ॥ ४ ॥ मार्जारा भृशमवनिं नखैर्लिखन्तो लोहानां मलनिचयः सविस्रगन्धः । रथ्यायां शिशुनिचिताश्च सेतुबन्धाः सम्प्राप्तं जलमचिरान्निवेदयन्ति ॥ ५ ॥ गिरयोऽञ्जनपुञ्जसन्निभा यदि वा बाष्पनिरुद्धकन्दराः । कृकवाकुविलोचनोपमाः परिवेषाः शशिनश्च वृष्टिदाः ॥६ ॥ विनोपघातेन पिपीलिकानामण्डोपसंक्रान्तिरहिव्यवायः । द्रुमाधिरोहश्च भुजङ्गमानां वृष्टेर्निमित्तानि गवां प्लुतं च ॥ ७ ॥ तरुशिखरोपगताः कृकलासा गगनतलस्थितदृष्टिनिपाताः । यदि च गवां रविवीक्षणमूर्ध्वं निपतति वारि तदा न चिरेण ॥ ८ ॥ नेच्छन्ति विनिर्गमं गृहाद्धुन्वंति श्रवणान् खुरानपि । पशवः पशुवच्च कुक्कुरा यद्यम्भः पततीति निर्दिशेत् ॥ ९ ॥ यदा स्थिता गृहपटलेषु कुक्कुरा भवन्ति वा यदि विततं दिवोन्मुखाः । दिवा तडिद्यदि च पिनाकिदिग्भवा तदा क्षमा भवति समातिवारिणा ॥ १० ॥ शुककपोतविलोचनसन्निभो मधुनिभश्च यदाहिमदीधितेः । प्रतिशशी च यदा दिवि राजते पतति वारि तदा न चिराद्दिवः ॥ ११ ॥ स्तनितं निशि विद्युतो दिवा रुधिरनिभा यदि दण्डवत् स्थिताः । पवनः पुरतश्च शीतलो यदि सलिलस्य तदागमो भवेत् ॥ १२ ॥ वल्लीनां गगनतलोन्मुखाः प्रवालाः स्नायन्ते यदि चलपांसुभिर्विहङ्गाः । सेवन्ते यदि च सरीसृपास्तृणाग्राण्यासन्नो भवति तदा जलस्य पातः ॥ १३ ॥ मयूरशुकचाषचातकसमानवर्णा यदा जपाकुसुमपंकजद्युतिमुषश्च सन्ध्याघनाः । जलोर्मिनगनक्रकच्छपवराहमीनोपमाः प्रभूतपुटसञ्चया न तु चिरेण यच्छन्त्यपः ॥१४॥ पर्यन्तेषु सुधाशशांकधवला मध्येऽञ्चनालित्विषः स्निग्धा नैकपुटाः क्षरज्जलकणाः सोपानविच्छेदिनः । माहेन्द्रीप्रभवाः प्रयान्त्यपरतः प्राक्चाम्बुपाशोद्भवा ये ते वारिमुचस्त्यजन्ति न चिरादम्भः प्रभूतं भुवि ॥ १५ ॥ शक्रचापपरिघप्रतिसूर्या रोहितोऽथ तडितः परिवेषाः । उद्गमास्तसमये यदि भानोरादिशेत् प्रचुरमम्बु तदाशु ॥१६॥ यदि तित्तिरपत्रनिभं गगनं मुदिताः प्रवदन्ति च पक्षिगणाः । उदयास्तमये सवितुर्द्युनिशं विसृजन्ति घना न चिरेण जलम् ॥१७॥ यद्यमोघकिरणाः सहस्रगोरस्तभूधरकरा इवोच्छ्रिताः । भूसमं च रसते यदाम्बुदस्तन्महद्भवति वृष्टिलक्षणम् ॥ १८ ॥ प्रावृषि शीतकरो भृगुपुत्रात् सप्तमराशिगतः शुभदृष्टः । सूर्यसुतान्नवपञ्चमगो वा सप्तमगश्च जलागमनाय ॥ १९ ॥ प्रायो ग्रहाणामुदयास्तकाले समागमे मण्डलसंक्रमे च । पक्षक्षये तीक्ष्णकरायनान्ते वृष्टिर्गतेऽर्के नियमेन चार्द्राम् ॥२०॥ समागमे पतति जलं ज्ञशुकयोर्ज्ञजीवयोर्गुरुसितयोश्च सङ्गमे ।

यमारयोः पवनहुताशजं भयं न दृष्टयोरसहितयोश्च सद्ग्रहैः ॥२१॥ अग्रतः पृष्ठतो वापि ग्रहाःसूर्यावलम्बिन : । यदा तदा प्रकुर्वन्ति महीमेकार्णवामिव ॥ २२ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां सद्योवृष्टिलक्षणं नामाष्टाविंशोऽध्यायः ॥ २८ ॥

वर्षाका प्रश्न पूछे जानेपर उस कालमें चंद्रमा यदि जलराशिके अर्थात् कर्क, कुंभ, मीन, कन्या और मकरकी अन्त्यार्द्ध राशिको आश्रय करके यदि लग्नमें या केंद्रमें हो और शुभ ग्रहसे देखा जाय तो बहुतसा जल वर्षता है, पापग्रहसे देखा जाय तो थोडा जल वर्षता है और बहुत कालतक वर्षा नहीं होती। शुक्रभी चंद्रमाके समान फलदाता है ॥१॥ जो प्रश्न करनेके समय प्रश्नका करनेवाला गीला द्रव्य वा जल अथवा जलपर जिसका नाम हो ऐसे किसी द्रव्यको छुए अथवा जलके निकटवाले या जल संबंधी किसी कार्यमें रत हो या प्रश्न करनेके कालमें जल या जलवाचक शब्द हो तो प्रश्नकर्तासे निःसंदेह कहा जा सकता है कि बहुत शीघ्र वर्षा होगी ॥२॥ वर्षाकालमें जिस दिन उदयपर्वतपर स्थापित सूर्य भगवान् अपनी कांतिसे दृष्टिको संताप पहुंचानेवाले हों, पिघले हुए सुवर्णके समान या वैडूर्यमणिके समान चिकनी कांतिवाले हों उस दिन जल वर्षेगा और यदि आकाशके ऊंचे स्थानमें जाकर तीक्ष्ण किरणोंसे तपें तो उस समय जल वर्षेगा ॥३॥ जलका स्वाद विगड जाना, गायकी आंखके समान आकाशका रंग हो जाना, दिशाओंका विमल होना, सांभरका पसीज जाना, कागके अंडोंके रंगके समान रंगवाले मेघोंका उदय होना, पवनके बहनेसे थँभ जाना, मछलियोंका जलमेंसे वारंवार उछलना और मेंडकोंका वारंवार शब्द करना, जलकी अवाईका चिह्न है ॥४॥ बिल्लियोंका अपने पंजोंसे पृथ्वीको कुरेदना, लोहेपर मैल जम जानेसे उसमें कच्चे मांसके समान गंध आना, बालकोंका मार्गमें रेते आदिका पुल बांधना शीघ्र ही जल वर्षनेके लक्षणको प्रकाश करता है ॥५॥ समस्त पर्वत अंजनराशिके समान रंगवाले हो जायें, उनकी कंदराओंमें बाफ भर जाय और चंद्रमाका परिवेष कुक्कुटके नेत्रके समान हो जाय तो वर्षा होगी ॥६॥ बिना किसी उपद्रवके चींटियोंका अपने अण्डोंका एक स्थानसे उठाकर दूसरे स्थानपर ले जाना, सर्पोंका मैथुन करना और वृक्षोंके ऊपर चढना और गायोंका उछलना कूदना वर्षाका लानेवाला है ॥७॥ जो वृक्षोंके ऊपर गिरगट चढकर आकाशकी ओर देखे, गायें भी ऊपरको दृष्टि उठाकर, सूर्यको देखे तो शीघ्रही जल गिरेगा ॥८॥ जो पशु गृहसे बाहर जानेकी इच्छा न करे और कान व खुरोंको कंपायमान करते रहें और कुत्ते भी इन पशुओंकी नाई ऐसे कार्य करें तो बतलाना चाहिये कि जल वर्षेगा ॥९॥ जब घरोंकी छत्तोंपर कुत्ते बैठे या बराबर ऊपरको देखें और जब दिनके समय ईशानकोणमें बिजली चमके तब अत्यन्तही जलके वर्षनेसे पृथ्वी एकाकार हो जायगी ॥१०॥ जिस समय तोते या कबूतरके नेत्रके समान चंद्रमाका लाल रंग हो या शहतके समान रंग हो और जब आकाशमें दूसरा चंद्रमा दिखलाई जावे, तब आकाशसे शीघ्रही जल वर्षेगा ॥११॥ जो रात्रिमें विजलीकी कडकडाहटका शब्द हो, दिनके समय रुधिरके समान या दंडके समान बिजलीकी रेखा दीख पडे और पवन आगेसे शीतल हो तो उस समय जलका आगम होता है

।।१२।। लताओंके नये पत्ते जो आकाशकी ओर उठ जायँ, पक्षिगण जल या धूरीसे स्नान करें और सर्पादि कीडे मकोडे तृणोंकी नोक पर चढकर बैठें तो शीघ्र वर्षा होगी ।।१३।। जब संध्याकालके आकाशमें मेघगण मोर, शुक, नीलकण्ठ या चातकपक्षीके समान रंगवाले या जपाकुसुम वा कमलकी कांतिको हरण करें और जलकी तरंग पर्वत, नाका, कछुआ, शूकर या मछलीके समान आकारवाले हों तो शीघ्र जल वर्षेगा ।।१४।। चारों किनारोंपर सीधा और चंद्रमाके समान श्वेतवर्ण हो मध्यम अंजन और भ्रमरके समान दीप्तिवाला हो, चिकने जलकी बूंदें टपकता हो, पैरियोंके समान एकके ऊपर एक चढे रहें, पूर्वदिशासे आकर पश्चिम दिशाको जायँ वे वादल शीघ्रही पृथ्वीमें बहुतसा जल वर्षाते हैं ।।१५।। सूर्यके उदय या अस्तके समय जो इन्द्रधनुष्य, परिघ, दूसरा सूर्य, दण्डाकार, इन्द्रधनुष्य, या बिजलीके समान परिवेष प्रकाशित हो तो शीघ्रही बहुतसा जल वर्षता है ।। १६ ।। सूर्यके उदय अस्तके समय यदि आकाशका रंग तीतरके पंखोंके समान हो जाय और पक्षिगण आनंदित होकर कलरव करते हैं तो मेघ शीघ्रही बहुतसा जल वर्षाते हैं ।।१७।। यदि हजार किरणवाले सूर्यके अस्तकालमें अस्ताचलकी किरणोंके समान उंची और अमोघ किरणें विराजमान हैं और यदि मेघगण पृथ्वीके निकट शब्द करें तो इन बातोंको वर्षा होनेका बडा भारी लक्षण कहा जा सकता है ।।१८।। जो वर्षाकालमें चंद्रमा शुभ ग्रहों करके देखता जाय तो शुक्रसे सप्तम राशिमें या शनिसे नवम, पञ्चम वा सप्तम राशिमें हो तो यह जलागमका कारण है ।।१९।। ग्रहोंके उदयास्तकालमें मण्डल संक्रमण और समागम होनेपर और पक्षक्षयमें, अयनके अंतमें और सूर्यके आर्द्रामें जाने पर बहुधा नियमानुसार वर्षा होती है ।।२०।। बुध शुक्रके समागमसे, बुध बृहस्पतिके समागमसे, बालबृहस्पति और शुक्रके संगमसे जल वर्षता है। जो अच्छे ग्रहसे न देखा जाकर या न मिलकर शनि और मंगलका संयोग हो तो अग्निका भय होता है ।।२१।। जब सूर्यका अवलम्बन करनेवाले ग्रह सूर्यके पूर्वमें भी पश्चिममें रहे तो वे पृथ्वीको समुद्रके समान कर देतेहैं ।।२२।।

इति श्रीवराहमिहिराचार्यविरचितायां वृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य- पंडित बलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायांमष्टाविंशोऽध्यायः ।।२८।।

अथकोनत्रिंशोध्यायः

कुसुमलता

फलकुसुमसम्प्रवृद्धिं वनस्पतीनां विलोक्य विज्ञेयम्। सुलभत्वं द्रव्याणां निष्पत्तिश्चापि सस्यानाम् ।।१।। शालेन कमलशाली रक्ताशोकेन रक्तशालिश्च। पाण्डूकः क्षीरिकया नीलाशोकेन सूकरकः ।। २ ।। न्यग्रोधेन तु यवकस्तिन्दुकवृद्ध्या च षष्टिको भवति। अश्वत्थेन ज्ञेया निष्पत्तिः सर्वसस्यानाम् ।। ३ ।। जम्बूभिस्तिलमाषाः शिरीषवृद्ध्या च कंगुनिष्पत्तिः। गोधूमाश्च मधूकैर्यववृद्धिः सप्तपर्णेन ।।४ ।। अतिमुक्तककुन्दाभ्यां कर्पासं सर्षपान्वदेदशनैः। बदरीभिश्च कुलत्थांश्चिरबिल्वेनादिशेन्मुद्गान् ।। ५ ।। अतसी वेतसपुष्पैः पलाशकुसुमैश्च कोद्रवा ज्ञेयाः। तिलकेन शङ्खमौक्तिकरजतान्यथ चेङ्गुदेनशणः ।। ६ ।। करिणश्च हस्तिकर्णै रा-

देश्या वाजिनोऽश्वकर्णेन । गावश्च पाटलाभिः कदलीभिरजाविकं भवति ॥ ७ ॥ चम्पककुसुमैः कनकं विद्रुमसम्पच्च बन्धुजीवेन । कुरुबकवृद्धया वज्रं वैदूर्यं नन्दिकावर्तैः ॥ ८ ॥ विद्याच्च सिन्दुवारेण मौक्तिकं कुंकुमं कुसुम्भेन । रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः ॥ ९ ॥ श्रेष्ठी सुवर्णपुष्पैः पद्मैर्विप्राः पुरोहिताः कुमुदैः । सौगन्धिकेन बलपतिरर्केण हिरण्यपरिवृद्धिः ॥१०॥ आम्रैः क्षेमं भल्लातकैर्भयं पीलुभिस्तथारोग्यम् । खदिरशमीभ्यां दुर्भिक्षमर्जुनैः शोभना वृष्टिः ॥११॥ पिचुमन्दनागकुसुमैः सुभिक्षमथ मारुतः कपित्थेन । निचुलेनावृष्टिभयं व्याधिभयं भवति कुटजेन ॥ १२ ॥ दूर्वाकुशकुसुमाभ्यामिक्षुर्वह्निश्च कोविदारेण । श्यामालताभिवृद्धया बन्धक्यो वृद्धिमायान्ति ॥ १३ ॥ यस्मिन्देशे स्निग्धनिश्छिद्रपत्राः संदृश्यन्ते वृक्षगुल्मा लताश्च । तस्मिन् वृष्टिः शोभना सम्प्रदिष्टा रूक्षैश्छिद्रैरल्पमम्भः प्रदिष्टम् ॥ १४ ॥

इति श्रीवराहमिहिरकृतौ बृह० कुसुमलताध्याय एकोनत्रिंशोऽध्यायः ॥ २९ ॥

वनस्पतियोंके फल और फूलोंकी अधिकाई देखनेसे द्रव्योंकी सुलभता और खेतीकी निष्पन्नता जानी जाती है ॥१॥ शालके फूल और फलोंकी अधिकाई होनेसे सफेद शट्ठी, दूधीसे पाण्डूक, नीले अशोकसे शूकरकी वृद्धि होती है. वडकी वृद्धिसे युवक और तिन्दुककी वृद्धिसे वृष्टिके धान्य होते हैं और पीपलकी वृद्धिसे सब धान्योंकी वृद्धि होती है ॥२॥३॥ जामुनकी बृद्धिसे तिल और उर्द, शिरीषकी वृद्धिसे कंगनी महुएसे गेहूँ और सप्तपर्णसे जौकी वृद्धि जानना चाहिये ॥४॥ अतिमुक्तक और कुन्द इन दोनों पुष्पवृक्षकी वृद्धिसे कपास, असनासे सरसों, बेरसे कुलथी और सदावेलसे मूंगको जानना चाहिये ॥५॥ वेतससे अलसी, पलाशसे कोदोंकी वृद्धि, तिलकसे शंख, मोती और चांदीकी वृद्धि और इंगुदीकी वृद्धिसे शनकी उत्पत्ति होती है ॥६॥ हस्तिकर्णसे हाथियोंकी, अश्वकर्णसे घोडोंकी, पाटलाकी वृद्धिसे गायोंकी और कदलीसे बकरी और भेडोंकी वृद्धि होती है ॥७॥ चम्पाके फूलसे सुवर्ण, दुपहरियाके फूलसे मूंगा, कुरबककी वृद्धिसे वज्र, नन्दिकावर्तसे वैदूर्य, सिन्धुवारकी वृद्धिसे रत्नोंकी वृद्धि, कुसुम्भसे केशर, लालकमलसे राजा और नील कमलसे मंत्री कहा जाता है ॥८॥९॥ सुवर्णपुष्पसे वणिक, पद्मसे विप्र, कुमुदसे पुरोहित, सुगन्धद्रव्यसे सेनापति, आकके वृक्षसे सुवर्ण, आमसे कल्याण, भिलावेसे भय, पीलुसे आरोग्य, खैर और शमीसे दुर्भिक्ष, अर्जुनसे शुभकरी वृष्टि, नीम और नागकुसुमसे सुभिक्ष, कैथसे पवन, निचुलसे अवृष्टिका भय और कुटजसे व्याधिभयका ज्ञान होता है ॥१०॥११॥१२॥ दूब और कुशके बढनेसे ईख, कचनारसे आग और श्यामालताकी वृद्धिसे व्यभिचारिणी स्त्रियें बढती हैं ॥१३॥ जिस देशमें वृक्ष और जुल्म और लताओंके पत्ते चिकने और छेदसे रहित दिखाई दें उस देशमें शुभ वर्षा होगी और जिसमें वृक्षोंके पत्ते रूखे और सूराखदार हों वहां थोडा २ जल वर्षता है ॥१४॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्सहितायां पश्चिमोत्तरदेशीयभुरादाबादवास्तव्य–पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकयांमेकोनत्रिंशोऽध्यायः ॥२९॥

अथ त्रिंशोऽध्यायः

संध्यालक्षणम्

अर्द्धास्तमितानुदितात् सूर्यादस्पष्टभं नभो यावत् । तावत्सन्ध्याकालश्चिह्नैरेतैः फलं चास्मिन् ॥ १ ॥ मृगशकुनपवनपरिवेषपरिधिपरिघाभ्रवृक्षसुरचापैः । गन्धर्वनगररविकरदण्डरजः स्नेहवर्णैश्च ॥२॥ भैरवमुच्चैर्विरुवन् मृगोऽसकृद् ग्रामघातमाचष्टे । रविदीप्तो दक्षिणतो महास्वनः सैन्यघातकरः ॥३॥ अपसव्ये संग्रामः सव्ये सेनासमागमः शान्ते । मृगचक्रे पवने वा सन्ध्यायां मिश्रगे वृष्टिः ॥ ४ ॥ दीप्तमृगाण्डजविरुता प्राक् सन्ध्या देशनाशमाख्याति । दक्षिणदिक्स्थैर्विरुता ग्रहणाय पुरस्य दीप्तास्यैः ॥५॥ गृहतरुतोरणमथने सपांशुलोष्टोत्करेऽनिले प्रबले । भैरवरावे रूक्षे खगपातिनि चाशुभा सन्ध्या ॥६॥ मन्दपवनावघट्टितचलितपलाशद्रुमा विपवना वा । मधुरस्वरशान्तविहङ्गमृगरुता पूजिता सन्ध्या ॥७॥ सन्ध्याकाले स्निग्धा दण्डतडिन्मत्स्यपरिधिपरिवेषाः । सुरपतिचापैरावतरविकिरणाश्चाशु वृष्टिकराः ॥८॥ विच्छिन्नविषमविध्वस्तविकृतकुटिलापसव्यपरिवृत्ताः । तनुह्रस्वविकलकलुषाश्च विग्रहावृष्टिदाः किरणाः ॥ ९ ॥ उद्द्योतिनः प्रसन्ना ऋजवो दीर्घाः प्रदक्षिणावर्ताः । किरणाः शिवाय जगतो वितमस्के नभसि भानुमतः ॥ १० ॥ शुक्लाः करा दिनकृतो दिवादिध्यान्तगामिनः स्निग्धाः । अव्युच्छिन्ना ऋजवो वृष्टिकरास्ते ह्यमोघाख्याः ॥ ११ ॥ कल्माषबभ्रुकपिला विचित्रमाञ्जिष्ठहरितशबलाभाः । त्रिदिवानुबन्धिनो वृष्टयेऽल्पभयदास्तु सप्ताहात् ॥१२॥ ताम्रा बलपतिमृत्युं पीतारुणसन्निभाश्च तद्व्यसनम् । हरिताः पशुसस्यवधं धूमसवर्णा गवां नाशम् ॥ १३ ॥ माञ्जिष्ठाभाः शस्त्राग्निसम्भ्रमं बभ्रवः पवनवृष्टिम् । भस्मसदृशास्त्ववृष्टि तनुभावं शबलकल्माषाः ॥ १४ ॥ बन्धूकपुष्पाञ्जनचूर्णसन्निभं साध्यं रजोऽभ्येति यदा दिवाकरम् । लोकस्तदा रोगशतैर्निपीड्यते शुक्लं रजो लोकविवृद्धिशान्तये ॥ १५ ॥ रविकिरणजलदमरुतां संघातो दण्डवत् सस्थितो दण्डः । विदिक्स्थितो नृपाणामशुभो दिक्षु द्विजातीनाम् ॥ १६ ॥ शस्त्रभयातंककरो दृष्टः प्राङ्मध्यसन्धिषु दिनस्य । शुक्लाद्यो विप्रादीन् यदभिमुखस्तां निहन्ति दिशम् ॥१७॥ दधिसदृशाभ्रो नीलो भानुच्छादी खमध्यगोऽभ्रतरुः । पीतच्छुरिताश्च घना घनमूला भूरिवृष्टिकराः ॥ १८ ॥ अनुलोमगेऽभ्रवृक्षे समुद्गते यायिनो नृपस्य वधः । बालतरुप्रतिरूपिणि युवराजामात्ययोर्मृत्युः ॥ १९ ॥ कुवलयवैदूर्याम्बुजकिञ्जल्काभा प्रभञ्जनोन्मुक्ता । सन्ध्या करोति वृष्टिं रविकिरणोद्भासिता सद्यः ॥ २० ॥ अशुभाकृतिघनगन्धर्वनगरनीहारपांसुधूमयुता । प्रावृषि करोत्यवग्रहमन्यतौ शस्त्रकोपकरी ॥ २१ ॥ शिशिरादिषु वर्णाः शोणपीतसितचित्रपद्मरुधिरनिभाः । प्रकृतिभवाः सन्ध्यायां स्वतौ शस्ता विकृतिरन्या

॥ २२ ॥ आयुधभृन्नररूपं छिन्नाभ्रं परभयाय रविगामि । सितखपुरेऽर्काक्रान्ते पुरलाभो भेदने नाशः ॥ २३ ॥ सितनितान्तघनावरणं रवेर्भवति वृष्टिकरं यदि सव्यतः । यदि च वीरणगुल्मनिभैर्घनैर्दिवसभर्तुरदीप्तदिगुद्भवैः ॥ २४ ॥ नृपविपत्तिकरः परिघः सितः क्षतजतुल्यवपुर्बलकोपकृत् । कनकरूपधरो बलवृद्धिदः सवितुरुद्गमकालसमुत्थितः ॥ २५ ॥ उभयपार्श्वगतौ परिधी रवेः प्रचुरतोयकृतो वपुषान्वितौ । अथ समस्तककुप्परिवारिणः परिधयोऽस्ति कणोऽपि न वारिणः ॥ २६ ॥ ध्वजातपत्रपर्वतद्विपाश्वरूपधारिणः । जयाय सन्ध्ययोर्घना रणाय रक्त सन्निभाः ॥ २७ ॥ पलालधूमसञ्चयस्थितोपमा बलाहकाः । बलान्यरूक्षमूर्तयो विवर्द्धयन्ति भूभृताम् ॥ २८ ॥ विलम्बिनो द्रुमोपमाः खरारुणप्रकाशिनः । घनाः शिवाय सन्ध्ययोः पुरोपमाः शुभावहाः ॥ २९ ॥ दीप्तविहङ्गशिवामृगघुष्टा दण्डरजः परिघादियुता च । प्रत्यहमर्कविकारयुता वा देशनरेशसुभिक्षवधाय ॥३०॥ प्राची तत्क्षणमेव नक्तमपरा सन्ध्या त्र्यहाद्वा फलं सप्ताहात्परिवेषरेणुपरिघाः कुर्वन्ति सद्यो न चेत् । तद्वत्सूर्यकरेन्द्रकार्मुकतडित्प्रत्यर्कमेघानिलास्तमिन्नेव दिनेऽष्टमेऽथ विहगाः सप्ताहपाका मृगाः ॥३१॥ एकं दीप्त्या योजनं भाति सन्ध्या विद्युद्भासा षट् प्रकाशीकरोति । पञ्चाब्दानां गर्जितं याति शब्दो नास्तीयत्ता काचिदुल्कानिपाते ॥ ३२ ॥ प्रत्यर्कसंज्ञाः परिधिस्तु तस्य त्रियोजनाभा परिघस्य पञ्च । षट् पञ्च दृश्यं परिवेषचक्रं दशामरेशस्य धनुर्विभाति ॥ ३३ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां सन्ध्यालक्षणं नाम त्रिंशोऽध्यायः ॥ ३० ॥

प्रतिदिन सूर्यके अर्द्धास्त हो जाने के समयसे जबतक आकाशमें नक्षत्र भलीभांदि दिखाई न दें तबतक संध्याकाल रहता है ऐसाही अर्द्धोदित सूर्यसे पहिले तारादर्शनतक सन्ध्याकाल है ॥ १ ॥ मृग, शकुन, पवन, परिवेष, परिधि, परिघ, मेघ, वृक्ष, इन्द्रधनुष, गंधर्वनगर, सूर्यकिरण दण्ड, धूरि, स्नेह और वर्ण (रंग) इन लक्षणोंसे संध्याका फल कहा जाता है ॥ २ ॥वारंवार ऊँचा भयंकर शब्द करता हुआ मृग ग्रामके नष्ट होनेकी सूचना करता है। सेनाके दक्षिण भागमें स्थित मृग सूर्यके सोहीं मुख कर महान् शब्द करे तो सेनाका नाश होता है ॥३॥ दिशाके दक्षिण में शांत होनेसे संग्राम और वाममें होनेसे सेनाका समागम होता है, सन्ध्याकालमें मृग चकवा पवनके मिश्र या मिली हुई दिशाओंमें चलनेसे वर्षा होगी ॥४॥ पूर्वमें प्रातःसन्ध्याके समय सूर्यकी ओरको मुख करके मृग और पक्षियोंके शब्दसे युक्त संध्या देशके नाशकी सूचना प्रकाश करती है. दक्षिण दिशामें स्थित सूर्यकी ओर मुख किये मृग पक्षियों करके शब्दायमान नगर शत्रुओं करके ग्रहण कर लिया जाता है ॥५॥ गृह, वृक्ष, तोरणमथन और धूरिके साथ मट्टीके ढेलोंको उडाने वाला पवन, प्रबल वेग और भयंकर रूखे शब्दसे पक्षियोंको गिरावें तो अशुभकारी सन्ध्या होती है ॥६॥ सन्ध्याकालमें मन्द पवनके प्रवाहसे हिलते हुए पलाश अथवा वायुरहित हो और मधुर स्वर से शान्त दिशामें विहंग और मृगोंके नाद करनेसे सन्ध्या पूजित होती है ॥७॥ संध्याकालमें दण्ड, तडित, मत्स्य, मंडल, परिवेष, इन्द्रधनु, ऐरावत और सूर्यकी किरण इन सबका स्निग्ध होना शीघ्र वर्षाको लाता है ॥ ८ ॥ टूटी फूटी, टेढी वेडी, विध्वस्त, विकराल, कुटिल, बाईं ओरको झुकी

हुई, छोटी २ विकल और मलीन सूर्यकी किरणें संध्या कालमें हों तो युद्ध हो, वर्षा नहीं हो ।। ९ ।। अन्धकारहीन आकाशमें सूर्यकी किरणोंका निर्मल, प्रसन्न, सीधा, दीर्घताका प्राप्त होना और प्रदक्षिणाके आकारमें घूमना संसारके मंगलका कारण होता है ।। १० ।। सूर्यके किरण दिनके आदि मध्य और अन्तगामी होकर, चिकने, अखंडित, सीधे और श्वेत हों तो वर्षा होती है और इनका नाम अमोघ है ।। ११ ।। वही काले, पीले, कपिल, लाल, हरे अनेक प्रकारके होकर आकाश में फैल जायँ तो वर्षाके कारणरूप हैं, परन्तु एक सप्ताहतक कुछ एक भयदायी हैं ।। १२ ।। इनके ताम्ररंग होनेमें सेनापतिकी मृत्यु होती है, पीले और लालरंगके समान हों तो सेनापतिको दुःख होता है, हरे रंगके होनेसे पशु और धान्यका नाश होता है, धूम्रवर्णसे गोनाश, मंजीठकी आभाके समान रंगदार होनेसे शस्त्र व अग्निका भय होता है, पीछे हों तो पवनके साथ वर्षा होती है, भस्म समान होनेसे अनावृष्टि और सबल और कल्माष रंगके होनेसे वृष्टिका क्षीणभाव हो जाता है ।।१३।।१४।। संध्याकाल की धूरि दुपहरियाके फूल और अंजन चूर्णके समान काली होकर जब सूर्यके सामने को जाती है तब मनुष्य सैंकडों प्रकारके रोगोंसे पीडित होते हैं, इसका श्वेत होना मनुष्योंकी वृद्धि और शान्तिका कारण होता है ।। १५ ।। सूर्यके किरण जल और पवनसे मिल कर दंडके समान हो जायँ तो यही दंड होता है, वह विदिक्में स्थित हो तो राजाओंको और दिक्में स्थिर होकर द्विजात्तियोंको अशुभकारी होता है ।।१६।। दिन निकलनेसे पहले और मध्य सन्धि में जो दंड दिखाई दें तो शस्त्रभय और रोगभयका करनेवाला होता है, शुक्लादि वर्णका हो तो ब्राह्मणोंको और जिनके सम्मुख स्थित हो उन दिशाओंको हनन करता है ।। १७ ।। आकाशमें सूर्यके ढकनेवाले दहीके समान किनारेदार नीले मेघको अभ्रतरु कहते हैं । यह और पीले रंगका मेघ जो घनमूल अर्थात् उसके नीचे मुंख युक्त हो तो बहुतसा जल वर्षाता है ।। १८ ।। अभ्रतरु शत्रुके ऊपर चढ जानेवाले राजाके पीछे २ चलकर अकस्मात् शान्त हो जाय तो युवराज और मंत्रीका नाश हो जाता है ।। १९ ।। नीलकमल, वैदूर्य और पद्मकेशरके समान कांतियुक्त, पवन-हीन संध्या यदि सूर्यकी किरणोंसे प्रकाशित हो तो वर्षा करती है ।। २० ।। अशुभाकार मेघ, गंधर्वनगरी, हिम, धूरि और धूम (कुहर) युक्त संध्या वर्षाकालमें वर्षाकी कमी करती है व और ऋतुमें हो तो शस्त्रका कोप करनेवाली होती है ।। २१ ।। शिशिरादिऋतुमें संध्याकास्वभावसे उत्पन्न हुआ रंग जो लाल, पीला, श्वेत, चित्रविचित्र, पद्म और रुधिरके समान होता है जैसी ऋतु हो वैसाही वर्ण हो तो कल्याणदायी है, दूसरा रंग हो तो विकार होता है ।। २२ ।। शस्त्र धारण किये नररूपधारी सूर्यके सन्मुखके मेघ जो छिन्नभिन्न हों तो शत्रुभय होता है, श्वेत आकाशमें गंधर्वनगर जो सूर्यको ढक ले तो आक्रमणकारी राजाको घेरा हुआ नगर प्राप्त हो जाता है, सूर्य-नगर गंधर्वनगरका भेदन करे तो नगरका शत्रुसे नाश हो जाता है ।।२३।। शुक्लवर्ण और शुक्ल किनारेवाले मेघ जो बांईं ओरसे सूर्यको ढके अथवा उशीर (खस) गुल्मली समान अदीप्त दिशासे उत्पन्न हुए बादलसे जो सूर्य ढक जाय तो वर्षा करनेवाला होगा ।। २४ ।। सूर्यके उदयकालमें जो शुक्लवर्णका परिघ दिखाई दे तो राजाको विपद होती है, रक्तवर्णसे सेनाका कोप होता है और कनकरूपधारीसे बलकी वृद्धि होती है ।। २५ ।। सूर्यके दोनों ओरकी परिधि जो शरीरवाली हो जाय तो बहुतसा जल वर्षता है, सब परिधि दिशाओंको घेर लें तो जलका एक कणभी नहीं गिरता ।।२६।। सन्ध्याकालके मेघ ध्वज, छत्र, पर्वत, हस्ती और घोडेका रूप धारण करे तो जयका कारण है और रक्तके समान लाल हो तो रणके कारण होते हैं ।। २७ ।। पलालके धुएँके समान स्निग्ध मूर्तिधारी मेघ राजा लोगोंके बलको बढाते हैं ।। २८ ।। मेघ संध्याकालमें तीक्ष्ण सूर्यके

प्रकाशक वृक्षाकार हों या झुक जायँ तो मंगल होता है, इसी समयमें नगरके समान मेघ हो तो शुभ होता है ॥ २९ ॥ सूर्यके सन्मुख होकर पक्षी, गीदड और मृग करके शब्दायमान और दंड, धूरि और परिघयुक्त वा प्रतिदिन सूर्यको विकार करनेवाली संध्या देश, राजा और सुभिक्षके नाशके कारण हैं ॥ ३० ॥ पूर्वसंध्या तत्काल फलको देती है, रात्रि वा सायंसन्ध्या तीन दिनमें और परिवेष, रज और परिघ उसी दिनमें फल न दे तो एक सप्ताहमें फल देते हैं, ऐसेही सूर्यकिरण, इन्द्रधनुष, बिजली, प्रतिसूर्य, मेघ और वायु आठ दिनमें और पक्षी व मृग सप्ताहमें फलको पकाते हैं. सन्ध्या अपनी दीप्तिसे एक योजन और बिजली अपनी दीप्तिसे छः योजनतक प्रकाश किया करती है मेघकी गर्जना पांच योजनतक जाती है और उल्कासे गिरनेके योजनका कुछ परिणाम नहीं ॥ ३१ ॥ ३२ ॥ प्रत्यर्क नामवाली परिधिकी दीप्ति तीन योजन, परिघकी दीप्ति पांच योजन, परिवेषचक्रकी दीप्ति पांच या छ. योजनतक देखी जाती है और इंद्रधनुष दश योजनतक प्रकाश करता है ॥ ३३ ॥

इति श्रीवराहमिहिराचार्यविरचि० बृहत्संहितायांपश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां त्रिंशोऽध्यायः ॥३०॥

अथैकत्रिंशोऽध्यायः

दिग्दाहलक्षणम्

दाहो दिशां राजभयाय पीतो देशस्य नाशाय हुताशवर्णः। यश्चारुणः स्यादपसव्यवायुः सस्यस्य नाशं स करोति दृष्टः ॥ १ ॥ योऽतीव दीप्त्या कुरुते प्रकाशं छायामपि व्यञ्जयतेऽर्कवद्यः। राज्ञो महद्वेदयते भयं स शस्त्रप्रकोपं क्षतजानुरूपः ॥२॥ प्राक्क्षत्रियाणां सनरेश्वराणां प्राग्दक्षिणे शिल्पिकुमारपीडा। याम्ये सहोग्रैः पुरुषैस्तु वैश्या दूताः पुनर्भूप्रमदाश्च कोणे ॥ ३ ॥ पश्चात्तु शूद्राः कृषिजीविनश्च चौरास्तुरंगैः सह वायुदिक्स्थे। पीडां व्रजन्त्युत्तरतश्च विप्राः पाषण्डिनो वाणिजकाश्च शार्व्याम् ॥४॥ नभः प्रसन्नं विमलानि भानि प्रदक्षिणं वाति सदागतिश्च। दिशां च दाहः कनकावदातो हिताय लोकस्य सपार्थिवस्य ॥ ५ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां दिग्दाहलक्षणं नामैकत्रिंशोऽध्यायः ॥३१॥

पीले वर्णका दिग्दाह राजभयका कारण, हुताशनके वर्णका दिग्दाह देश नाशका कारण होता है और लालरंगका हुआ दक्षिणी पवन धान्यको नष्ट करता है ॥ १ ॥ जिस दिग्दाहमेंअत्यन्त दीप्ति हो और सूर्यके समान छायाको (अंतर्गतज्योतिको) प्रकाशित करता है वह रुधिरके समान दाह राजाको महाभय देता है और शस्त्रका कोप प्रकाशित करता है ॥ २ ॥ पूर्वदिशामें दिग्दाह हो तो राजा और क्षत्रियोंको पीडा होती है, अग्निकोणमें कुमारगण और शिल्पयोगी पीडा देता है, दक्षिणमें उग्रपुरुष, वैश्य दूतगण और दूसरी वार व्याही हुई स्त्रियोंको पीडादायक होता है ॥३॥ पश्चिमदिशामें शूद्र और किसान, वायुकोणमें तुरंगसहित चोर लोग और उत्तर दिशामें ब्राह्मण लोग और ईशान कोणमें पाषण्डी और बनियोंको पीडा होती है ॥ ४ ॥ जो आकाश

प्रसन्न हों, नक्षत्र निर्मल हो, पवन घूमता हुआ चले तो सुवर्णके रंगका दिग्दाह लोगोंके और राजाके हितका निमित्त होता है ॥ ५ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायांमेकत्रिंशोऽध्यायः ॥३१॥

अथ द्वात्रिंशोध्यायः

भूमिकम्पलक्षणम्

क्षितिकम्पमाहुरेके बृहदन्तर्जलनिवासिसत्त्वकृतम् । भूभारखिन्नदिग्गजविश्रामसमुद्भवं चान्ये ॥ १ ॥ अनिलोऽनिलेन निहतः क्षितौ पतन् सस्वनं करोत्येके । केचित्त्वदृष्टकारितमिदमन्ये प्राहुराचार्याः ॥ २ ॥ गिरिभिः पुरा सपक्षैर्वसुधा प्रपतद्भिरुत्पतद्भिश्च । आकम्पिता पितामहमाहामरसदसि सव्रीडम् ॥ ३ ॥ भगवन्नाम ममैतत्त्वया कृतं यदचलेति तन्न तथा । क्रियतेऽचलैश्चलद्भिः शक्ताहं नास्य खेदस्य ॥ ४ ॥ तस्याः सगद्गदगिरं किञ्चित्स्फुरिताधरं विनतमीषत् । साश्रुविलोचनमाननमवलोक्य पितामहः प्राह ॥ ५ ॥ मन्युं हरेन्द्र धात्र्याः क्षिप कुलिशं शैलपक्षभङ्गाय । शक्रः कृतमित्युक्त्वा मा भैरिति वसुमतीमाह ॥ ६ ॥ किन्त्वनिलदहनसुरपतिवरुणाः सदसत्फलावबोधार्थम् । प्राग्द्वित्रिचतुर्भागेषु दिननिशोः कम्पयिष्यन्ति ॥ ७ ॥ चत्वार्यार्यम्णाद्यान्यादित्यं मृगशिरोश्वयुक्चेति । मण्डलमेतद्वायव्यमस्य रूपाणि सप्ताहात् ॥ ८ ॥ धूमाकुलीकृताशे नभसि नभस्वान् रजः क्षिपन् भौमम् । विरुजन्द्रुमांश्च विचरति रविरपटुकरावभासी च ॥ ९ ॥ वायव्ये भूकम्पे सस्याम्बुवनौषधीक्षयोऽभिहितः । श्वयथुश्वासोन्मादज्वरकासभवा वणिक्पीडा ॥ १० ॥ रूपायुधभृद्वैद्याः स्त्रीकविगन्धर्वपण्यशिल्पजनाः । पीड्यन्ते सौराष्ट्रककुरुमगधदशार्णमत्स्याश्च ॥ ११ ॥ पुष्याग्नेयविशाखाभरणीपित्र्याजभाग्यसंज्ञानि । वर्गो हौतभुजोऽयं करोति रूपाण्यथैतानि ॥ १२ ॥ तारोल्कापातावृतमादीप्तमिवाम्बरं सदिग्दाहम् । विचरति मरुत्सहायः सप्तार्चिः सप्तदिवासान्त. ॥ १३ ॥ आग्नेयेऽम्बुदनाशः सलिलाशयसंक्षयो नृपतिवैरम् । दद्रूविर्चचिकाज्वरविसर्पिकाः पाण्डुरोगश्च ॥१४॥ दीप्तौजसः प्रचण्डाः पीड्यन्ते चाश्मकाङ्गबाह्लीकाः । तङ्गणकलिङ्गवङ्गद्रविडाः शबराश्च नैकविधाः ॥ १५ ॥ अभिजिच्छ्रवणधनिष्ठाप्राजापत्यैन्द्रवैश्वमैत्राणि सुरपतिमण्डलमेतद्भवन्ति चास्य स्वरूपाणि ॥ १६ ॥ चलिताचलवर्ष्माणो गम्भीरविराविणस्तडित्वन्तः । गवललालिकुलाहिनिभा विसृजन्ति पयः पयोवाहाः ॥ १७ ॥ ऐन्द्रं श्रुतिकुलजातिख्यातावनिपालगणपतिविध्वंसि । अतिसारगलग्रहवदनरोगकृच्छर्दिकोपाय ॥ १८ ॥ काशियुगन्धरपौरवकिरातकीराभिसारहलमद्राः । अर्बुदसुवास्तुमालवपीडाकरमिष्टवृष्टिकरम् ॥ १९ ॥

पौष्णाप्याद्रश्लेषामूलाहिर्बुध्यवरुणदेवानि। मडलमेतद्वारुणमस्यापि भवन्ति रूपाणि ॥२०॥ नीलोत्पलालिभिन्नाञ्जनत्विषो मधुररावविणो बहुलाः। तडिदुद्भासित देहा धारांकुशवर्षिणो जलदाः ॥ २१ ॥ वारुणमर्णवसरिदाश्रितघ्नमतिवृष्टिदं विगतवैरम्। गोनर्दचेदिकुकुरान् किरातवैदेहकान् हन्ति ॥ २२ ॥ षड्भिर्मासैः-कम्पो द्वाभ्यां पाकं च याति निर्घातः। अन्यानप्युत्पातान् जगुरन्ये मण्डलैरेतैः ॥२३॥ उल्का हरिश्चन्द्रपुरं रजश्च निर्घातभूकम्पककुप्प्रदाहाः। वातोऽतिचण्डो ग्रहणं रवीन्द्वोर्नक्षत्रतारागणवैकृतानि ॥२४॥ व्यभ्रे वृष्टिवैंकृतं वातवृष्टिर्धूमोऽनग्नेर्विस्फुलिङ्गार्चिषो वा। वन्यं सत्त्वं ग्राममध्येविशेद्वा रात्रावैन्द्रं कार्मुकं दृश्यते वा ॥२५॥ संध्याविकाराःपरिवेषखण्डा नद्यः प्रतीपा दिवि तूर्यनादाः। अन्यच्च यत्स्यात् प्रकृतःप्रतीपं तन्मण्डलैरेव फलं निगद्यम् ॥२६॥ हन्त्यैन्द्रो वायव्यं वायुश्चाप्यैन्द्रमेवमन्योऽन्यम्। वारुणहौतभुजावपि वेलानक्षत्रजाः कम्पाः ॥२७॥ प्रथितनरेश्वरमरणव्यसनान्याग्नेयवायुमण्डलयोः। क्षुद्भयमरकावृष्टिभिरुपताप्यन्ते जनाश्चापि ॥२८॥ वारुणपौरन्दरयोः सुभिक्षशिववृष्टिर्हार्दयो लोके। गावोऽतिभूरिपयसो निवृत्तवैराश्च भूपालाः ॥२९॥ पक्षैश्चतुर्भिरनिलस्त्रिभिरग्निर्देवराट् च सप्ताहात्। सद्यः फलति च वरुणो येषु न कालोऽद्भुतेषूक्तः ॥३०॥ चलयति पवनः शतद्वयं शतमनलो दशयोजनान्वितम्। सलिलपतिरशीतिसंयुतं कुलिशधरोऽभ्यधिकं च षष्टिकम् ॥३१॥ त्रिचतुर्थसप्तमदिने मासे पक्षे तथा त्रिपक्षे च। यदि भवति भूमिकम्प्पः प्रधाननृपनाशनो भाति ॥३२॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां भूमिकम्पलक्षणं नाम द्वात्रिंशोऽध्यायः॥३२॥

एक संप्रदायवाले भूमिकंपको जलमें रहनेवाले बडे प्राणियोंका किया हुआ कहते हैं, कोई २ कहते हैं–पृथ्वीके भारको धारण करने से थके हुए दिग्गजोंका विश्राम करना ही इसका कारण है ॥ १ ॥ और कोई २ कहते हैं कि जब पवन पवनसे टकराकर गिरता है, तब वही शब्दके साथ भूमिकम्पको करता है और कोई २ इसको शुभ अशुभ कार्यका कारण कहते हैं. किसी किसी आचार्यका मत यह है कि, पूर्वकालमें पृथ्वी और आकाशसे नीचे गिरते हुए और पृथ्वी परसे आकाशको उडते हुए पर्वतोंको गिरने और उडनेसे कम्पायमान हो देवताओंके साथ लजाती हुई पृथ्वी ब्रह्माजीसे बोली थी,–हे भगवन्! आपने मेरा "अचला" नाम रक्खा है, परंतु इस समय चलायमान पर्वतों करके मैं सचला (कम्पयुक्त) होती हूँ इस कारण मैं इस कष्टको नहीं सह सकती ॥ २ ॥ ३ ॥ ४ ॥ पृथ्वीके इस प्रकार गद्गद वचन सुनकर और फडकते हुए अधरवाला कुछेक झुका हुआ आंसुओंसे भरे नेत्रवाला मुख देखकर ब्रह्माजी बोले,–हे इन्द्र! धरतीका शोक हरण करो और पर्वतोंके पंख काटनेको वज्र लाओ। इन्द्रने "तथास्तु" कहकर पृथ्वीसे कहा,– "कुछ भय नहीं है. परन्तु वायु, अग्नि, इन्द्र और वरुण दिनरातके प्रथम दूसरे तीसरे और चौथे भागमें सत् और असत् फल सूचित करनेके लिये तुमको कम्पायमान करेंगे" ।५॥६॥७॥ पहले उत्तराफाल्गुनी, हस्त, चित्रा, स्वाती, रेवती, मृगशिरा और अश्विनी यह वायव्य मंडल है; इसका फल एक सप्ताहमें होता है ॥८॥ इसमें धूम से छाये हुए आकाश में पृथ्वी की धूरिको उडाता हुआ

हुआ, वृक्षोंको तोडता हिलाता प्रचंड पवन चला करता है और सूर्यकिरण मन्द हो जाते हैं ।। ९ ।। वायव्य भोंचालसे धान्य, जल और वनौषधियोंका क्षय होता है, बनियोंको शोध, दमा, उन्माद, ज्वर और खांसीकी पीडा होती है ।। १० ।। सुन्दर पुरुष अस्त्रधारी, वैद्यगण, स्त्री, कवि और गानेवाले, व्यापारी और शिल्प जाननेवाले पुरुष और सौराष्ट्र, कुरु, मगध, दशार्ण और मत्स्यदेश पीडित होता है ।। ११ ।। पुष्य, आग्नेय, विशाखा, भरणी, पित्र्य, अज और भाग्य नामवाले नक्षत्रमें हौतभुजवर्ग होता है. इसका रूप इस प्रकार है, सात दिनतक तारा और उल्काके गिरनेसे ढका हुआ आकाश मानो दिग्दाहयुक्त और कुछेक दीप्तिके समान होता है और सात विशाखा-वाला अग्नि पवनका सहायी होकर विचरता है ।। १२ ।। १३।। इस आग्नेयवर्गमें भूमिकंपहोनेसे मेघनाश, जलाशयोंका सूखना, राजद्वेष और दाद, विर्चचिका, ज्वर, विसर्पिका और पांडुरोग होते हैं. दीप्ततेजा और प्रचंड अश्मक, अंग, बाह्लीक, तंगण कलिंग, वंग, द्रविड देश और अनेक प्रकारके शबरगण पीडित होते हैं ।। १४ ।। १५ ।। अभिजित्, श्रवण, धनिष्ठा, रोहिणी, ज्येष्ठा, उत्तराषाढा और अनुराधा ये सात नक्षत्र इन्द्रमंडलके हैं. इनका स्वरूप ऐसा है, चलते हुए पर्वतके समान रूपधारी, गंभीर शब्दकारी, तडिद्युक्त, वन, भैंस, भ्रमर और सांपके समान काले मेघ जल को वर्षाते हैं. इन्द्रवर्गमें भूमिकम्म होनेसे समुद्र और नदियोंमें रहनेवाले राजा और गणपतियों का विध्वंस होता है और अतिसार, गलग्रह, वदनरोग और वमनकोप होता है ।। १६ ।। १७ ।। ।। १८ ।। काशी, युगंधर, पौरव, किरात, कीर, अभिसार, हल, मद्र, अर्बुद, सुवास्तु और मालव देशमें पीडा होती है और अभिलाषाके अनुसार वर्षा होती है ।। १९ ।। रेवती, पूर्वाषाढा, आर्द्रा, आश्लेषा, मूल, उत्तराभाद्रपदा, शतभिषा ये सात नक्षत्र वरुणमण्डलके हैं इनका स्वरूप इस प्रकार है नीला कमल, भ्रमर और अञ्जनके समान प्रतिफलित द्युतिमान्, बिजलीकरके उद्भासित देह बहुतसे बादल मधुर शब्द करते २ जलधारारूप अंकुरोंसे वर्षते हैं ।। २० ।। २१ ।। इस वारुणमण्डलमें भूमिकम्प हो तो समुद्र और नदियोंके आश्रयमें रहनेवालोंका नाश होता है, यह वृष्टिकारक, द्वेषहीन और गोनर्द, चेदी, कुकुर, किरात और विदेहवासियोंका नाश करता है ।। २२ ।। भूमिकंपका फल छ:मासमें पकता है, निर्घातका फल दो मासमें होता है, इन मंडलोंमें और उत्पात हों वे भी इन दो महीनोंमेंही फल देंगे ।। २३ ।। उल्का, गंधर्वपुर, धूरि, उपद्रव, भूकंप दिग्दाह, प्रचंडपवन और सूर्य चन्द्रमाका ग्रहण, नक्षत्र और तारोंके विकारके लिये कहा गया ।। २४ ।। विना बादलके वर्षाका होना, विकार, अग्निकी चिनगारीदार लपट, पवनके साथ वर्षाका होना, धूप, बनैले प्राणियोंका ग्राममें आना, रात्रिमें इंद्रधनुषका दिखाई देना, संध्याका विकार, परिवेषखंड, नदियोंकी गतिका विपरीत होना, आकाशमें तुर्रहीका बजना. और भी जो कुछ संसारमें विपरीतता हो इस वर्गसेही उसका फल कहा जाता है ।। २५ ।। २६ ।। जो इन्द्र-मण्डल वायव्यमंडलको निहत करे या वायव्यमंडल इन्द्रवर्गका नाश करे जो ऐसेही वारुण और आग्नेयमंडल परस्पर एक दूसरेको हनन करे तो उसको वेलानक्षत्रजात कम्प कहते हैं ।। २७ ।। आग्नेय और वायव्यमंडलके परस्पर टकरानेसे विख्यात राजाकी मृत्यु होती है या वह विपत्तिमें पडता है, और मनुष्य क्षुधाभय, मरी और वर्षाके न होनेसे सन्तापित होते हैं, वरुण और पौरन्दर मंडलके अभिघातसे सुभिक्ष, कल्याणी वर्षा और प्रीति होती है, गायें बहुतसा दूध देने लगती हैं, राजा लोग आपसका वैर छोड देते हैं ।। २८ ।। २९ ।। अंग फडकना आदि जिन उपद्रवोंके फलका समय नहीं कहा, उनके वायव्यमंडलमें होनेसे दो मासके मध्यमें फल होता है, अग्निवर्ग तीन पक्षमें, इन्द्रवर्ग सप्ताहके पीछे और वरुणवर्ग शीघ्र फलवान् होता है ।। ३० ।। पवनवर्ग दो शत योजन,

अनलवर्ग एक शत दश योजन, वरुणवर्ग एक शत अस्सी योजन और इन्द्रवर्ग साठ योजनसे कुछ अधिक भूमिको कंपायमान करता है ।। ३१ ।। भूमि कंपके बाद तीसरे चौथे और सातवें दिनमें या महीनेमें वा पक्षमें अथवा तीन पक्षमें जो फिर भूमिकंप हो तो मुख्यराजाका नाश होता है ।। ३२ ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां द्वात्रिंशोऽध्यायः ।।३२।।

अथ त्रयस्त्रिंशोऽध्यायः

उल्कालक्षणम्

दिवि भुक्तशुभफलानां पततां रूपाणि यानि तान्युल्काः । धिष्ण्योल्काशनिविद्युतारा इति पञ्चधा भिन्नाः ।।१।। उल्का पक्षेण फलं तद्वद्धिष्ण्याशनिस्त्रिभिः पक्षैः । विद्युदहोभिः षड्भिस्तद्वत्तारा विपाचयति ।।२।। तारा फलपादकरी फलार्धदात्री प्रकीर्तिता धिष्ण्या । तिस्रः संपूर्णफला विद्युदथोल्काशनिश्चेति ।। ३ ।। अशनिः स्वनेन महता नृगजाश्वमृगाश्मवेश्मतरुपशुषु । निपतति विदारयन्ती धरातलं चक्रसंस्थाना ।।४।। विद्युत्सत्त्वत्रासं जनयन्ती तटतटस्वना सहसा । कुटिलविशाला निपतति जीवेन्धनराशिषु ज्वलिता ।।५।। धिष्ण्या कृशाल्पपुच्छा धनूंषि दश दृश्यतेऽन्तराभ्यधिकम् । ज्वलिताङ्गारनिकाशा द्वौ हस्तौ सा प्रमाणेन ।।६।। तारा हस्तं दीर्घा शुक्ला ताम्राब्जतन्तुरूपा वा । तिर्यगधश्चोर्ध्वं वा याति वियत्युह्यमानेव ।।७।। उल्का शिरसि विशाला निपतन्ती वर्द्धते प्रतनुपुच्छा । दीर्घा भवति च पुरुषं भेदा बहवो भवन्त्यस्याः ।।८।। प्रेतप्रहरणखरकरभनक्रकपिदंष्ट्रिलाङ्गलमृगाभाः । गोधाहिधूमरूपाः पापा या चोभयशिरस्का ।।९।। ध्वजझषकरिगिरिकमलेन्दुतुरगसन्तप्तरजतहंसाभाः । श्रीवत्सवज्रशंखस्वस्तिकरूपाः शिवसुभिक्षाः ।।१०।। अम्बरमध्याद्बह्व्यो निपतन्त्यो राजराष्ट्रनाशाय । बभ्रमती गगनोपरि विभ्रममाख्याति लोकस्य ।।११।। संस्पृशतौ चन्द्रार्को तद्विसृता वा सभूप्रकम्पा च । परचक्रागमनृपवधदुर्भिक्षावृष्टिभयजननी ।।१२।। पौरेतरघ्नमुल्कापसव्यकरणं दिवाकरहिमांश्वोः । उल्का शुभदा पुरतो दिवाकरनिःसृता यातुः ।।१३।। शुक्ला रक्ता पीता कृष्णा चोल्का द्विजादिवर्णघ्नी । क्रमशश्चैतान् हन्युर्मूर्धोरःपार्श्वपुच्छस्थाः ।। १४ ।। उत्तरदिगादिपतिता विप्रादीनामनिष्टदा रूक्षा । ऋज्वी स्निग्धाखण्डा नीचोपगता च तद्वृद्ध्यै ।। १५ ।। श्यामा वारुणनीलासृग्दहनासितभस्मनिभा रूक्षा । सन्ध्यादिनजा वक्रा दलिता च परागमभयाय ।।१६।। नक्षत्रग्रहघाते तद्भक्तीनां क्षयाय निर्दिष्टा । उदये घ्नती रवीन्दू पौरेतरमृत्यवेऽस्ते वा ।। १७ ।। भाग्यादित्यधनिष्ठामूलेषूल्काहतेषु युवतीनाम् । विप्रक्षत्रियपीडा पुष्यानिलविष्णुदेवेषु ।।१८।। ध्रुवसौम्येषु नृपाणामुग्रेषु सदारुणेषु चौराणाम् ।

क्षिप्रेषुकलाविदुषांपीडा साधारणे च हते ॥१९॥ कुर्वन्त्येताः पतिता देवप्रतिमासुराजराष्ट्रभयम् । शक्रोपरि नृपतीनां गृहेषु तत्स्वामिनां पीडाम् ॥२०॥ आशाग्रहोपघाते तद्देशानां खले कृषिरतानाम् । चैत्यतरौ सम्पतिता सत्कृतपीडां करोत्युल्का ॥२१॥ द्वारि पुरस्य पुरक्षयमथेन्द्रकीले जनक्षयोऽभिहितः । ब्रह्मायतने विप्रान् विनिहन्याद्गोमिनो गोष्ठे ॥२२॥ क्ष्वेडास्फोटितवादितगीतोत्क्रुष्टस्वना भवन्ति यदा । उल्कानिपातसमये भयाय राष्ट्रस्य सनृपस्य ॥२३॥ यस्याश्चिरं तिष्ठति खेऽनुषङ्गो दण्डाकृतिः सा नृपतेर्भयाय । या चोह्यते तन्तुधृतेव खस्था या वा महेन्द्रध्वजतुल्यरूपा ॥२४॥ श्रेष्ठिनः प्रतीपगा तिर्यगा नृपांगनाः । हन्त्यधोमुखी नृपान् ब्राह्मणानथोर्ध्वगा ॥२५॥ बर्हिपुच्छरूपिणी लोकसंक्षयावहा । सर्पवत् प्रसर्पिणी योषितामनिष्टदा ॥२६॥ हन्ति मण्डला पुरं छत्रवत् पुरोहितम् । वंशगुल्मवत् स्थिता राष्ट्रदोषकारिणी ॥२७॥ व्यालसूकरोपमा विस्फुलिङ्गमालिनी । खण्डशोऽथवा गता सस्वना च पापदा ॥२८॥ सुरपतिचापप्रतिमा राज्यं नभसि विलीना जलदान् हन्ति । पवनविलोमा कुटिलं याता न भवति शस्ता विनिवृत्ता वा ॥२९॥ अभिभवति यतः पुरं बलं वा भवति भयं तत एव पार्थिवस्य । निपतति च यथा दिशा प्रदीप्ता जयति रिपूनचिरात्तया प्रयातः ॥३०॥

इतिश्रीवराहमिहिरकृतौ बृहत्सं० उल्कालक्षणं नाम त्रयस्त्रिंशोऽध्यायः ॥३३॥

स्वर्गमें फल भोगे हुए पुरुषोंका गिरनेके समय जो रूप होता है वही उल्का है. धिष्ण्या, उल्का अशनि, बिजली और तारा यह पांच भाग उल्काके हैं ॥ १ ॥ उल्का १५ दिनमें वैसेही धिष्ण्या और अशनि तीन पक्षमें अर्थात् ४५ दिनमें और तारा वा बिजलीका फल छ. दिनमें होता है ॥ २ ॥ तारा एक चौथाई फल करनेवाली है, धिष्ण्या आधे फलको देनेवाली और बिजली, उल्का वज्र इन तीनोंका संपूर्ण फल होता है ॥ ३ ॥ अशनिका आकार चक्रके समान है, यह बडे शब्दके साथ पृथ्वीको फाडती हुई मनुष्य, गज, अश्व, मृग, पत्थर, गृह वृक्ष और पशुओंके ऊपर गिरती है ॥ ४ ॥ तड २ शब्द करती हुई विद्युत अचानक प्राणियोंको त्रास उपजाती हुई कुटिल और विशाल होकर जलती हुई जीवोंके ऊपर और ईंधनके ढेरपर गिरती है ॥ ५ ॥ पतली,छोटी पूंछ, वाली धिष्ण्या जलते हुए अंगारके समान दश धनुषसे कुछ अधिक स्थानतक दिखाई देती है इसका परिणाम दो हाथका है ॥ ६ ॥ तारा तांबा, कमल,ताररूप वा शुक्ल होती है इसका विस्तार एक हाथका है खींचते हुएके समान आकाशमें तिरछी या आधी उठी हुई गमन करती है ॥ ७ ॥ प्रतनुपुच्छा विशाला उल्का गिरते २ बढती है, परन्तु इसकी पूंछ छोटी होती जाती है । इसकी दीर्घता पुरुषके समान होती है, इसके अनेक भेद हैं ॥ ८ ॥ कभी यह प्रेत, शस्त्र, खर, करभ, नाका, बन्दर, डाढवाले जीव और मृगके समान आकारवाली हो जाती है. कभी गोह सांप और धूमरूप हो जाती है और कभी दो शिरके रूपवाली होती है. यह पापमयी है ॥ ९ ॥ कभी ध्वज, मत्स्य, हाथी, पर्वत, कमल, चन्द्रमा, अश्व, तपी हुई धूल और हंसके समान, कभी श्रीवत्स, वज्र, शंख और स्वस्तिक रूपसे प्रकाशित होती है परन्तु यह सब कल्याण और सुभिक्षकारी है ॥ १० ॥ परन्तु अनेक प्रकारकी रूपवाली उल्कायें निरन्तर आकाशमें घूमते २ आकाशमेंसे गिरती

हैं ॥ ११ ॥ चंद्र और सूर्यको स्पर्श करके उनमेंसे गिरे अथवा भूमि कम्पयुक्त हो तो नगरपर पराये राजाका अधिकार होगा, नृपवध, दुर्भिक्ष, अवृष्टि और भयकारी होती है ॥ १२ ॥ सूर्य चंद्रमाके दाई और उल्का गिरे तो वनवासियोंका नाश करता है. दिवाकरसे निकली हुई उल्का-सन्मुख आवे तो गमनकारीको शुभ है ॥ १३ ॥ शुक्ल, रक्त, पीत और काले रंगकी उल्का क्रमानु-सार द्विजातिवर्गोंका नाश करनेवाली है और उसका मस्तक, छाती बगल और पूंछमें यह सब वर्ण स्थापित हों तोभी यह क्रमानुसार ब्राह्मणादि चार वर्णोंका नाश करनेवाली है ॥ १४ ॥ प्रदक्षिणा के क्रमसे उत्तर आदि दिशाओंमें उल्का रूखे भावसे गिरे तो क्रमानुसार ब्राह्मण क्षत्री, वैश्य और शूद्रोंका नाश करती है. सीधी, चिकनी, अखंड और आकाशके नोचे भागमें जानेवाली हो तो उप-रोक्त वर्णोंकी वृद्धि करती है ॥ १५ ॥ श्याम अरुण, नील, रक्त, दहन, असित और भस्मके समान रूखी संध्यासें उत्पन्न हुई, दिनसे उत्तन्न हुई, टेढी और दलित हुई उल्काका गिरना शत्रुके भयका कारण है ॥ १६ ॥ उल्कासे नक्षत्रघात या ग्रहघात हो तो पीछे कही हुई भक्तिका नाश होता है और उस २ वस्तुका क्षय होता है । उदय या अस्तकालमें उल्का सूर्य या चन्द्रमाको हनन करे तो वनवासियोंका वध होता है ॥ १७ ॥ पूर्वाफाल्गुनी, पुनर्वसु, धनिष्ठा और मूल नक्षत्रके योगतारे को उल्का हनन करे तो युवतियोंको पीडा होती है, और पुष्य, स्वाती व श्रवणको उल्का हत करे तो ब्राह्मण और क्षत्रियोंको पीडा होती है ॥ १८ ॥ रोहिणी, तीनों उत्तरा, मृगशिरा, चित्रा अनुराधा और खेतीको उल्का पीडित करे तो राजाओंको पीडा होती है, तीनों पूर्वाभरणी' मघा, आर्द्रा, आश्लेषा, ज्येष्ठा और मूलनक्षत्रको उल्का ताडन करे तो चोरोंको पीडा होती है, अश्विनी, पुष्य, अभिजित, कृत्तिका और विशाखाका उल्कासे भेद हो तो गीत नृत्य आदि कला जाननेवालोंको पीडा होती है ॥ १९ ॥ देवताकी मूर्तिपर उल्का गिरे तो राजा और राज्यको भयदायक है. इन्द्रध्वज गिरे तो राजाओंको और घरमें गिरे तो गृहस्वामिओंको पीडा उत्पन्न करती है ॥ २० ॥ दिशाके स्वामी गृहके ऊपर उल्का गिरे तो उस दिशाके रहवासियोंको, खरिहानमें गिरनेसे किसानोंकी, छोटे मंदिरके निकट वृक्ष लगा हो उसपर उल्का गिरे तो साधुओंको पीडा होती है ॥ २१ ॥ पुरद्वारपर उल्का गिरे तो पुरका क्षय, इन्द्रकीलके ऊपर गिरे तो मनुष्योंका क्षय कहा हैं, ब्रह्माके मंदिपर गिरे तो ब्राह्मणोंका और गोठमें गिरे तो बहुतसे गोसम्पन्न मनुष्योंको हनन करती है ॥ २२ ॥ जो उल्का गिरनेके समय क्ष्वेड (समरके समय वीरका सिंहनाद करना), आस्फोटित वादित गीत और रोनेका ऊँचा शब्द हो तो नृपयुक्त राज्यको भय होता है ॥ २३ ॥ जिसका आकार नंडके आकारके समान होकर आकाशमें बहुत देरतक रहे वह उल्का राजाओंके भयका कारण होती है और जो आकाशमें ठहरकर डोरीसे बंधी हुईके समान प्रवाहित या इन्द्रकी ध्वजाके समान हो तो राजाको भयदायी है ॥ २४ ॥ जो उल्का विपरीत चले अर्थात् जहांसे निकली हो वहींको फिर लौट चले तो शेठलोगोंको भय करती है, टेढी चलनेवाली उल्का रानियोंका, नीचेको मुखवाली उल्का राजाओंका और ऊपरको चलनेवाली उल्का ब्राह्मणोंका नाश करती है ॥ २५ ॥ मोरपूंछके समान आकारवाली उल्का लोकक्षयकारी और सर्पके समान चलनेवाली उल्का स्त्रियोंका अनभल करती है ॥ २६ ॥ मंडलरूपवाली उल्का नगरको, छत्ररूप उल्का पुरोहितको नाश करती है और बांसकी बीढके समान उल्का देशमें दोष उत्पन्न करती है ॥ २७ ॥ व्याल (काले सांप) और सूकरके समान आकारयुक्त वा चिनगारीदार अथवा पिण्डाकार या शब्दसहित उल्का चले तो पापदायिनी है ॥२८॥ इन्द्रधनुषके समान हो तो राज्य का नाश करे, आकाशमें लीन हो जाय तो बादलोंका नाश करे और पवनकी प्रतिकूल दिशामें कुटिल

भावसे गमन करे और फिर लौट आवे तो शुभदायी नहीं है ।। २९ ।। जिस ओरसे उल्का आकर पुर या सेनाके ऊपर गिरे उस दिशासे ही राजाको भय होता है और जिस दिशामें प्रकाश करके गिरे राजा उस दिशामें जाय तो शीघ्र शत्रुओंको जीतनेके लिये समर्थ होता है ।। ३० ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां त्रयस्त्रिंशोध्यायः ।।३३।।

अथ चतुस्त्रिंशोऽध्यायः

परिवेषलक्षण्

सम्मूर्च्छिता रवीन्द्वोः किरणाः पवनेन मण्डलीभूताः । नानावर्णाकृतयस्तन्वभ्रे व्योम्नि परिवेषाः ।। १ ।। ते रक्तनीलपाण्डुरकापोताभ्राभशबलहरिशुक्लः । इन्द्रयमवरुणनिर्ऋतिश्वसनेशपितामहाग्निकृताः ।।२।। धनदः करोति मेचकमन्योऽन्यगुणाश्रयेण चाप्यन्ये । प्रविलीयते मुहुर्मुहुरल्पफलः सोऽपि वायुकृतः ।।३।। चाषशिखिरजततैलक्षीरजलाभः स्वकालसम्भूतः । अविकलवृत्तः स्निग्धः परिवेषः शिवसुभिक्षकरः ।।४।। सकलगगनानुचारी नैकाभः क्षतज सन्निभो रूक्षः । असकलशकटशरासनशृङ्गाटकवत् स्थितः पापः ।।५।। शिखिगलसमेऽतिवर्षं बहुवर्णे नृपवधो भयं धूम्रे । हरिचापनिभे युद्धान्यशोककुसुमप्रभे चापि ।।६।। वर्णेनैकेन यदा बहुलः स्निग्धः क्षुराभ्रकाकीर्णः । स्वर्तौ सद्यो वर्षं करोति पीतश्च दीप्तार्कः ।।७।। दीप्तविहङ्गमृगरुतः कलुषः संध्यात्रयोत्थितोऽतिमहान् । भयकृत्तडिदुल्काद्यैर्हतो नृपं हन्ति शस्त्रेण ।।८।। प्रतिदिनमर्कहिमांश्वोरहर्निशं रक्तयोर्नरेन्द्रवधः । परिविष्टयोरभीक्ष्णं लग्नास्तनभः स्थयोस्तद्वत् ।।९।। सेनापतेर्भयकरो द्विमण्डलो नातिशस्त्रकोपकरः । त्रिप्रभृति शस्त्रकोपं युवराजभयं नगररोधम् ।।१०।।वृष्टिस्त्र्यहेण मासेन विग्रहो वा ग्रहेन्दुभनिरोधे । होराजन्माधिपयोर्जन्मर्क्षे वाशुभो राज्ञः ।।११।। परिवेषमण्डलगतो रवितनयः क्षुद्रधान्यनाशकरः । जनयति च वातवृष्टिं स्थावरकृषिकृन्निहन्ता च ।।१२।। भौमे कुमारबलपतिसैन्यानां विद्रवोऽग्निशस्त्रभयम् । जीवे परिवेषगते पुरोहितामात्यनृपपीडा ।।१३।। मन्त्रिस्थावरलेखकपरिवृद्धिश्चन्द्रजे सुवृष्टिश्च । शुक्रे यायिक्षत्रियराज्ञां पीडाप्रियं चान्नम् ।।१४।। क्षुदनलमृत्युनराधिपशस्त्रेभ्यो जायते भयं केतौ । परिविष्टे गर्भभयं राहौ व्याधिर्नृपभयं च ।।१५।। युद्धानि विजानीयात् परिवेषाभ्यन्तरे द्वयोर्ग्रहयोः ।। दिवसकृतः शशिनो वा क्षुदवृष्टिभयं त्रिषु प्रोक्तम् ।।१६।। याति चतुर्षु नरेन्द्रः सामात्यपुरोहितो वशं मृत्योः । प्रलयमिव विद्धि जगतः पञ्चादिषु मण्डलस्थेषु ।।१७।। ताराग्रहस्य कुर्यात् पृथगेव समुत्थितो नरेन्द्रवधम् । नक्षत्राणामथवा यदि केतोर्नोदयो भवति ।।१८।। विप्रक्षत्रियविट्छूद्रहा भवेत् प्रतिपदादिषु क्रमशः । श्रेणीपुरकोशानां पञ्चम्यादिष्वशुभकारी भवति ।।१९।। युवराजस्याष्टम्यां परतस्त्रिषु पार्थिवस्य

दोषकरः । पुररोधो द्वादश्यां सैन्यक्षोभस्त्रयोदश्याम् ॥२०॥ नरपतिपत्नीपीडां परिवेषोऽभ्युत्थितश्चतुर्दश्याम्। कुर्यात् तु पञ्चदश्यां पीडां मनुजाधिपस्स्यैव ॥२१॥ नागरिकाणामाभ्यन्तरस्थिता यायिनां च बाह्यस्था । परिवेषमध्यरेखा विज्ञेयाक्रन्दसाराणाम् ॥२२॥ रक्तः श्यामो रूक्षश्च भवति येषां पराजयस्तेषाम् । स्निग्धः श्वेतो द्युतिमान् येषां भागो जयस्तेषाम् ॥२३॥

इति श्रीवराहमिहिरकृतौ बृहत्सं० परिवेषलक्षणं नाम चतुस्त्रिंशोऽध्यायः ॥३४॥

सूर्य या चंद्रमाके किरण पर्वतके ऊपर प्रतिबिम्बित और पवनके द्वारा मंडलाकार होकर थोडेसे मेघवाले आकाशमें अनेक रंग और आकारके दिखलाई देते हैं उनको परिवेष कहते हैं ॥१॥ रक्त, नील, थोडासा श्वेत, कबूतरके रंगका, मेघके रंगका शबल (अनेक प्रकारके रंगोंसे युक्त), हरिद्वर्ण और शुक्लवर्णके परिवेष क्रमानुसार इन्द्र, यम, वरुण, निर्ऋति, वायु, महादेव. ब्रह्मा और अग्निसे उत्पन्न हुए ॥ २ ॥ धनदाता कुबेरजी काले रंगका परिवेष करते हैं और परस्पर गुण आश्रयके हेतु जो वारंवार लीन होता है वह अल्प फल देनेवाला परिवेष वायुका है ॥ ३ ॥ जो परिवेष नीलकंठ मोर, चांदी, तेल, दूध और जलके समान आभावाला हो, स्वकालसंभूत हो, जिसका वृत्त खंडित न हो, जो स्निग्ध हो वह सुभिक्ष और मंगलका करनेवाला है ॥ ४ ॥ जो परिवेष सारे आकाशमें गमन करे, अनेक आभादार हो, रुधिरके समान हो, रूखा, खंडित छकडेके समान, धनुष और शृङ्गाटकके समान हो तो पापकारी है ॥ ५ ॥ मोरकी गर्दनके समान परिवेष हो तो अतिवर्षा होती है, बहुतसे रंगोंसे युक्त हो तो राजाका वध होताहै, धूमवर्ण होनेसे भय होता है, इन्द्रधनुषके समान या अशोकके फूलके समान कान्तिमान् होनेसे युद्ध होता है ॥ ६ ॥ जिस ऋतुमें परिवेष एक वर्णके मेलसे बहुत चिकना, उस्तरेके समान छोटे २ मेघोंसे व्याप्त हो वा सूर्य की किरणें पीले वर्णकी हो उस समय शीघ्र वृष्टि होती है ॥ ७ ॥ सूर्यकी ओरको मुख करके पक्षी और मृगोंके शब्दसहित (त्रिकालके शब्दसहित) त्रिकालकी सन्ध्यामें उत्पन्न हुआ अति महान् परिवेष भयंकर होता है, परन्तु जो यह उल्का या बिजली करके भेदित हो तो शस्त्रसे राजाकी मृत्यु होती है ॥ ८ ॥ प्रति दिन रात सूर्य चन्द्रमाका परिवेष हो तो राजाका वध होता है और उदयकाल, अस्तकाल; दिनरातके मध्यकालमें सूर्य चन्द्रमाका एक दिनमें यदि अधिक परिवेष हो तो भी वही फल अर्थात् राजाका वध होता है ॥ ९ ॥ दो मंडलवाला परिवेष सेनापतिको भयकारी है परन्तु अत्यन्त शस्त्रकोपकारी नहीं है, तीन मंडलवाला या अधिक मंडलवाला परिवेष शस्त्रकोप, युवराजभय और नगररोधका कारण होता है ॥ १० ॥ भौमादि कोई ग्रह, चन्द्रमा नक्षत्र यदि एक परिवेषमें हो तो तीन दिनमें वर्षा या एक मासमें युद्ध होता है, होरा और लग्नाधिपत्ति वा जन्मनक्षत्रका परिवेश हो तो राजाका अशुभ होता है ॥ ११ ॥ जो शनि परिवेष मंडलमें हो तो छोटे धान्यको नष्ट करता है और स्थावर वा किसानोंका हननकारी होकर पवनयुक्त वृष्टिको उत्पन्न करता है ॥ १२ ॥ मंडल परिववेषमें हो तो कुमार, सेनापति और सेनाको व्याकुलता हो और अग्नि शस्त्रका भय हो, और वृहस्पति परिवेषमें हो तो पुरोहित, मंत्री और राजाओं को पीडा होती है ॥ १३ ॥ बुध परिवेषमें हो तो मंत्री, स्थावर और लेखक लोगोंकी वृद्धि और अच्छी वर्षा होती है, परिवेषमें शुक्र हो तो चढकर जानेवाले राजा, क्षत्री राजाको पीडा और दुर्भिक्ष होता है ॥ १४ ॥ केतु परिवेषमें हो तो क्षुधा, अनल, मृत्यु, राजा और शस्त्रसे भय उत्पन्न होता है, राहु परिवेषमें हो तो गर्भभय, व्याधि और राजभय होता है ॥ १५ ॥ रवि चन्द्रके परि-

वेषके भीतर दो ग्रहोंके होनेसे युद्ध होता है, तीन ग्रह जो परिवेषमें हों तो दुर्भिक्ष और वर्षा न होने का भय होता है ।। १६ ।। परिवेषमें चार ग्रह हों तो मंत्री और पुरोहितके साथ राजाकी मृत्यु हो जाय, पंचादि ग्रह मंडलमें हों तो जगत्में मानो प्रलय हो जाय ।। १७ ।। ताराग्रह अर्थात मंगलादि पंचग्रह अथवा नक्षत्रगण यदि अलग २ परिवेषमें हों तो राजाका वध हुआ करता है, यदि केतुका उदय न हो तो केतूदय होनेसे उसीका फल होता है ताराग्रहादिफल नहीं होता है ।। १८ ।। प्रतिपदासे लेकर चौथतक तिथिमें परिवेष ही तो क्रमानुसार ब्राह्मण क्षत्री, वैश्य और शूद्रोंका नाश हो जाता है, पंचमीसे लेकर सातेंतक तिथिमें श्रेणी, पुर और कोषका अशुभकारी होता है ।। १९ ।। अष्टमीमें परिवेष हो तो चारों तरफ से और उसके पीछे तीन तिथिमें परिवेष होनेसे राजाका दोष होता है. द्वादशीमें परिवेष होनेसे पुरका रोध हो जाता है और त्रयो-

वेष होनेसे राजाका दोष होता है. द्वादशीमें परिवेष होनेसे पुरका रोध हो जाता है और त्रयो-

दशीमें होनेसे शस्त्रका क्षोभ होता है ।। २० ।। चतुर्दशीमें परिवेष होनेसे रानीको पीडा होती है, पंचदशीमें राजाको पीडा होती है ।। २१ ।। परिवेषके भीतर रेखा दिखाई दे तो नगरवासियोंको पीडा होती है, परिवेषके बाहर रेखा हो तो चढ जानेवाले राजाओं को पीडा होती है, परिवेषके बीचमें हो तो आक्रन्दसारका शुभाशुभ विचारे ।।२२।। ग्रहभक्ति या कूर्मविभागके अनुसार देशका विभाग करनेसे जिस देशके भागमें परिवेषका रंग लाल श्याम या रूखा हो उसे देशकी पराजय होगी स्निग्ध, श्वेत वर्ण या दीप्तिशाली परिवेष जिनके भागमें गिरे उनकी जय होगी ।। २३ ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां चतुस्त्रिंशोऽध्यायः ।।३४।।

अथ पंचत्रिंशोऽध्यायः

इन्द्रायुधलक्षणम्

सूर्यस्य विविधवर्णाः पवनेन विघट्टिता. कराः साभ्रे । वियति धनुः संस्थानायेदृश्यन्ते तदिन्द्रधनुः ।।१।। केचिदनन्तकुलोरगनिःश्वासोद्धूतमाहुराचार्याः। तद्यायिनां नृपाणामभिमुखामजयावहं भवति ।।२।। अच्छिन्नमवनिगाढं द्युतिमत्स्निग्धं घनं विविधवर्णम् । द्विरुदितमनुलोमं च प्रशस्तमम्भः प्रयच्छति च ।।३।। विदिगुद्भूतं दिक्स्वामिनाशनं व्यभ्रजं मरककारि । पाटलपीतकनीलैः शस्त्राग्निक्षुत्कृता दोषाः ।।४ ।। जलमध्येऽनावृष्टिर्भुवि सस्यवधस्तरौ स्थिते व्याधिः । वल्मीके शस्त्रभयं निशि सचिववधाय धनुरैन्द्रम् ।।५।। वृष्टिं करोत्यवृष्टयां वृष्टिं वृष्टयां निवारयत्यैन्द्रयाम् । पश्चात्सदैव वृष्टिं कुलिशभृतश्चापमाचष्टे ।।६।। चापं मघोनः कुरुते निशायामाखण्डलायां दिशि भूपपीडाम् । याम्यापरोदक्प्रभवं निहन्यात्सेनापतिं नायकमन्त्रिणौ च ।।७।। निशि सुरचापं सितवर्णाद्यं जनयति पीडां द्विजपूर्वाणाम् । भवति च यस्यां दिशि तद्देश्यं नरपतिमुख्यं न चिराद्धन्यात् ।।८।। इति श्रीवराहमिहिरकृतौ बृहत्संहितायामिन्द्रायुधलक्षणं नाम पञ्चत्रिंशोऽध्यायः ।३५

अनेक रंगवाले सूर्यके किरण पवनसे रोके जाकर मेघयुक्त आकाशमें जो धनुषका आकार दिखाई देता है वही इन्द्रधनुष है ।। १ ।। कोई २ आचार्य कहते हैं कि, अनन्तनामक कुलनागके

श्वाससे यह उत्पन्न होता है, जो राजा लोग इस इन्द्रधनुषको सन्मुख रखकर जायँ तो युद्धमें उनकी पराजय होती है ॥२॥ वह अखंडित भूमिमें लगा हुआ, प्रकाशदार, चिकना, निबिड, अनेक रंगोंसे युक्त और दोनों बार उदित व अनुलोम होनेपर श्रेष्ठ है और बहुतसा जल वर्षाता है ॥३॥ ईशान, अग्नि, नैर्ऋत और वायु इन चारों कोनोंसे जो इन्द्रधनुष उदय हो तो संस्थानके राजाका नाश होता है. विना मेघके आकाशमें इन्द्रधनुष हो तो मरी पडती है । पाटलके फूल, पीले और नीले रंगका हो तो शस्त्र, अग्नि, और दुर्भिक्षादि दोष उत्पन्न होते हैं ॥ ४ ॥ जलमें इन्द्रधनुष हो तो अनावृष्टि, पृथ्वीमें होनेसे धान्यकी हानि, वृक्षपर होनेसे व्याधि और वल्मीक (वमई) पर होनेसे शस्त्रभय और रात्रिमें होनेसे मंत्री के वधका कारण होता है ॥ ५ ॥ जो अनावृष्टिके समय इन्द्रधनुष पूर्वदिशामें हो तो जल वर्षता है, वर्षनेके समय पूर्वदिशामें हो तो वृष्टिको रोकता है । पश्चिममें इन्द्रधनुष हो तो सदाही वर्षा होती है ॥ ६ ॥ पूर्वदिशामें रात्रिकालके समय इन्द्रधनुष हो तो राजाओंको पीडित करता है । दक्षिण, पश्चिम और उत्तरदिशासे उत्पन्न हुआ इन्द्रधनुष सेनापति, नायक और मंत्रीका नाश करता है ॥ ७ ॥ रात्रिके समय इन्द्रधनुष श्वेत वर्णादि अर्थात् श्वेत. रक्त, पीत और कृष्ण वर्ण हो तो क्रमानुसार ब्राह्मण, क्षत्री, वैश्य, और शूद्रोंका नाश करता है, परन्तु जिस दिशामें हो उसी दिशाओंके राजाओंका शीघ्र नाश होगा ॥ ८ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां पंचत्रिंशोंध्यायः ॥३५॥

अथ षट्त्रिंशोऽध्यायः

गंधर्वनगरम्.

उदगादिपुरोहितनृपवलपतियुवराजदोषदं खसुरम् । सितरक्तपीतकृष्णं विप्रादीनामभावाय ॥ १ ॥ नागरनृपतिजयावहमुदग्विदिक्स्थं विवर्णनाशाय । शांताशायां दृष्टं सतोरणं नृपतिविजयाय ॥२॥ सर्वदिगुत्थं सततोत्थितं च भयदं नरेन्द्रराष्ट्राणाम् । चौराटविकान् हन्याद्भूमानलशक्रचापाभम् ॥३॥ गंधर्वनगरमुत्थितमापाण्डुरमशनिपातवातकरम् । दीप्ते नरेन्द्रमृत्युर्वामेऽरिभयं जयः सव्ये ॥४॥ अनेकवर्णाकृति खे प्रकाशते पुरं पताकाध्वजतोरणान्वितम् । यदा तदा नागमनुष्यवाजिनां पिबत्यसृग्भूरि रणे वसुन्धरा ॥ ५ ॥

इति श्रीवराहमिहिरकृतौ बृहत्सं०गंधर्वनगरलक्षणं नाम षट्त्रिंशोऽध्यायः ॥३६॥

जो गन्धर्वनगर उत्तरादि दिशाओंमें अर्थात् उत्तर, पूर्व, दक्षिण और पश्चिम दिशामे हो तो क्रमानुसार पुरोहित, राजा, सेनापति और युवराजको विघ्न होता है । श्वेत, रक्त, पीत और कृष्ण वर्णका हो तो ब्राह्मण, क्षत्री, वैश्य और शुद्रोंके नाशका कारण होता है ॥ १ ॥ उत्तर दिशामें हो तो नगर और राजाओंको जयदायी होता है । ईशान, अग्नि और वायुकोणमें स्थित हो तो नीचजातिका नाश हो जाता है । शान्त दिशामें तोरणयुक्त गन्धर्वनगर दिखाई दे तो राजा की विजय होती है ॥ २ ॥ जो गन्धर्वनगर सदा सब दिशाओंमें हो तो राजा व राज्य सबही को भयदायी होता है और धूम, अनल व इन्द्रधनुषके समान हो तो चोर और वनवासियोंको हनन

करता है ।। ३ ।। कुछेक पाण्डुर रंगका गन्धर्वनगर हो तो वज्रपात होकर झंझापवन चला करता है, दीप्त दिशामें गन्धर्वनगर हो तो राजाकी मृत्यु होती है, वामदिशामें हो तो शत्रुभय और दक्षिण भागमें स्थित हो तो जय होती है ।। ४ ।। जब अनेक रंगकी पताका, ध्वज और तोरणयुक्त गन्धर्वपुर आकाशमें प्रकाशित हो तो रणमें हस्ती, मनुष्य और घोड़ोंका बहुतसा रुधिर पृथ्वी पान करती है ।। ५ ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां भाषाटीकायां षट्त्रिंशोऽध्यायः ।।३६।।

अथ सप्तत्रिंशोऽध्यायः

प्रतिसूर्यलक्षणम्

प्रतिसूर्यकः प्रशस्तो दिवसकृदृतुवर्णसप्रभः स्निग्धः । वैदूर्यनिभः स्वच्छः शुक्लश्च क्षेमसौभिक्षः ।। १ ।। पीतो व्याधिं जनयत्यशोकरूपश्च शस्त्रकोपाय । प्रतिसूर्याणां माला दस्युभयातंकनृपहन्त्री ।।२।। दिवसकृतः प्रतिसूर्यो जलकृदुदग्दक्षिणे स्थितोऽनिलकृत्। उभयस्थः सलिलभयं नृपमुपरि निहन्त्यधो जनहा ।।३।।

इति श्रीवराहमिहिरकृतौ बृहत्सं० प्रतिसूर्यचक्रं नाम सप्तत्रिंशोऽध्यायः ।।३७।।

जिस ऋतुमें सूर्यका रंग जिस प्रकारका हो और जिस ऋतुमें प्रतिसूर्यका वर्णभी वैसाही चिकना, वैदूर्यमणिके समान स्वच्छ और शुक्ल वर्ण रक्त हो तो क्षेम और सुभिक्षकारी होता है ।। १ ।। पीत वर्ण हो तो व्याधि उत्पन्न करता है, अशोकके समान वर्ण धारण किये हो तो शस्त्रकोपका कारण होता है और प्रतिसूर्यकी माला अर्थात् बहुतसे प्रतिसूर्य उदय हों तो चोरभय आंतक और राजाका नाश हो जाता है ।। ३ ।। उत्तरमें प्रतिसूर्य हो तो जल वर्षाता है, दक्षिणमें हो तो पवन चलाता है, दोनों दिशाओंमें हो तो जलभय होता है, ऊपर स्थित हो तो राजाको और नीचे स्थित हो तो मनुष्योंका नाश करता है ।। ३ ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां सप्तविंशोऽध्यायः ।।३७।।

अथाष्टत्रिंशो[१]ऽध्यायः

रजोलक्षणम्

कथयन्ति पार्थिववधं रजसा घनतिमिरसञ्चयनिभेन । अविभाव्यमानगिरिपुरतरवः सर्वा दिशश्छन्नाः ।।१।। यस्यां दिशि धूरिचयः प्राग्भवति नाशमेति वा यस्याम्। आगच्छति सप्ताहात्तत्रैव भयं न सन्देहः ।।२।। श्वेते रजो घनौघे पीडा स्यान्मन्त्रिजनपदानां च । न चिरात् कोपमुपयाति शस्त्रमतिसंकुला सिद्धिः ।।३।। अर्कोदये विजृम्भति यदि दिनमेकं दिनद्वयं वापि । स्थगयन्निव गगनतलं भयमत्युग्रं निवेदयति ।।४।। अनवरतसञ्चयवहं रजनीमेकां प्रधाननृपहन्तृ । क्षेमाय च शेषाणां विचक्षणानां

---

१ अध्यायोऽयं न व्याख्यातो न चोल्लिखितो भटोत्पलेन । निवेशितोऽत्र त्वादर्शे दृष्टत्वात् ।

नरेन्द्राणाम् ।।५।। रजनीद्वयं विसर्पति यस्मिन् राष्ट्रे रजोघनं बहुलम् । परचक्रस्यागमनं तस्मिन्नापि सन्निबोद्धव्यम् ।।६।। निपतति रजनीत्रितयं चतुष्कमप्यन्नरसविनाशाय । राज्ञां सैन्यक्षोभो रजसि भवेत्पञ्चरात्रभवे ।।७।। केत्वाद्युदयविमुक्तं यदा रजो भवति तीव्रभयदायि । शिशिरादन्यत्रर्तौ फलमविकलमाहुराचार्याः।।८।।

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां रजोलक्षणं नामाष्टत्रिंशोऽध्यायः ।।३८।।

गहरे अँधियारेके समूहके समान धूरि जब समस्त दिशाओंको ढक ले कि जिसमें पर्वत, पुर या वृक्ष इत्यादि कुछ भी दिखाई न दें तब निश्चय जानना कि राजाका नाश होगा ।।१।। पहले जिस दिशामें धूरिका समूह दीख पडे या जिस दिशामें वह धूरिसमूह पहले निवृत्त हों, निःसंदेह सात दिनमें तहां भय आवेगा ।।२।। धूरिराशिरूप मेघसमूह श्वेतवर्णका हो तो मंत्री और जनपदोंको पीडा होती है । शीघ्र शस्त्रकोप आ पहुँचता है और कार्यकी सिद्धि अति कष्टसे होती है ।।३।। सूर्य उदय होनेके समय जो धूरी एक दिनतक वा दो दिनतक आकाशको ढके हुए प्रकाशित हो तो उग्र भयका विषय कहा जाता है ।। ४ ।। एक रात्रि तक बराबर धूरी इकट्ठा होती जाय तो मुख्य राजाकी मृत्यु होती है और शेष बुद्धिमान् राजाओंको शुभ फल करती है ।। ५ ।। जिस देशमें दो रात्रितक बराबर घनी धूरि फैलती है तो भलीभांति जान लेना चाहिये कि उस देशमें दूसरे राजाका राज होगा ।। ६ ।। तीन या चार रात्रि तक बराबर धूरि गिरती रहे तो अन्न व रसका नाश हो जाता है, पांच रात्रितक धूरी गिरे तो राजाओंकी सेनामें खलबली मच जाती है ।। ७ ।। केतु आदिके उदयसे पीछे धूरि गिरे तो तीव्र भय होता है. आचार्य लोग कहते हैं कि शिशिरके सिवाय और ऋतुओंमें इसका अधिक फल होता है ।। ८ ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्यपंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायांमष्टत्रिंशोऽध्यायः ।।३८।।

अथैकोनचत्वारिंशोऽध्यायः

निर्घातलक्षणम्

पवनः पवनाभिहतो गगनादवनौ यदा समापतति । भवति तदा निर्घातः स च पापो दीप्तविहगरुतः ।।१।।अर्को येऽधिकरणिकनृपधनियोधाङ्गनावणिग्वेश्याः। आप्रहरांशेऽजाविकमुपहन्याच्छूद्रपौरांश्च ।।२।। आमध्याह्नाद्राजोपसेविनो ब्राह्मणांश्च पीडयति । वैश्यजलदांस्तृतीये चौरान् प्रहरे चतुर्थे च ।।३।। अस्तं याते नीचान् प्रथमे यामे निहन्ति सस्यानि । रात्रौ द्वितीययामे पिशाचसंघान्निपीडयति ।।४।। तुरगकरिणस्तृतीये विनिहन्याद्यायिनश्चतुर्थे च । भैरवजर्जरशब्दो याति यतस्तां दिशं हन्ति ।।५।।

इति श्रीवराहमिहिरकृतौ बृहत्सं० निर्घातलक्षणं नामैकोनचत्वारिंशोऽध्यायः ।।३९।।

पवनके द्वारा पवन टकराकर जब पृथ्वीपर गिरता है तब वही निर्घात कहलाता है. उस निर्घातके समय सूर्यकी ओरको मुख करके पक्षिगण शब्द करे तो पापकारी होता है ।। १ ।। सूर्य उदय होनेके समय निर्घात हो तो अधिकरणिक अर्थात् विचारक, नृप, धनवान्, योधा, स्त्री, वणिक् और वेश्यायें नष्ट होती हैं, प्रहरांशसमयतक हो तो बकरी पालनेवाले, शूद्र और

पुरवासियोंका नाश होता है, दुपहरके मध्यमें हो तो राजसेवा करनेवाले पुरुष और ब्राह्मणोंकी पीड़ा होती है, तीसरे प्रहरमें निर्घात हो तो वैश्य और जल देनेवाले मेघोंको, चौथे प्रहरमें हो तो चोरोंको पीडित करता है ।। २ ।। ३ ।। सूर्यास्त होनेपर नीच लोगोंका और रात्रि के प्रथम याममें होने पर धान्यका नाश करता है, रात्रिके दूसरे (प्रहर) में हो तो पिशाचको पीडित करता है ।। ४ ।। रात्रिके तीसरे प्रहरमें हो तो हाथी और घोड़ोंको और चौथे प्रहरमें निर्घात हो तो पैदलोंको हनन करता है और जिस दिशा से भयंकर और फटे हुए शब्दके साथ निर्घातका उत्पात हो तो वह दिशा नष्ट हो जाती है ।। ५ ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायांमेकोनचत्वारिंशोऽध्याय: ।।३९।।

अथ चत्वारिंशोऽध्यायः

सस्यजातकम्

वृश्चिकवृषप्रवेशे भानोर्ये बादरायणेनोक्ताः । ग्रीष्मशरत्सस्यानां सद-सद्योगाःकृतास्त इमे ।।१।। भानोरलिप्रवेशे केन्द्रैस्तस्माच्छुभग्रहाक्रान्तैः ।। बल-वद्भिः सौम्यैर्वा निरीक्षितैर्ग्रैष्मिकविवृद्धिः ।।२।। अष्टमराशिगतेऽर्के गुरुशशिनोः कुम्भसिंहस्थितयोः । सिंहघटसंस्थयोर्वा निष्पत्तिर्ग्रैष्मसस्यस्य ।।३।। अर्कात्सिते द्वितीये बुधेऽथवा युगपदेव वा स्थितयोः । व्ययगतयोरपि तद्वन्निष्पत्तिरतीव गुरु-दृष्ट्या ।।४।। शुभमध्येऽलिनि सूर्याद्गुरुशशिनोः सप्तमे परा सम्पत् । अन्यादिस्थे सवितरि गुरौ द्वितीयेऽर्द्धनिष्पत्तिः ।।५।। लाभहिबुकार्थयुक्तैः सूर्यादलिगात्सिते-न्दुशशिपुत्रैः । सस्यस्य परा संपत् कर्मणि जीवे गवां चाग्र्या ।।६।। कुम्भे गुरुर्गवि शशि सूर्योऽलिमुखे कुजार्कजौ मकरे । निष्पत्तिरस्ति महती पश्चात् परचक्ररोगभयम् ।।७।। मध्ये पापग्रहयोः सूर्यः सस्यं विनाशयत्यलिगः । पापः सप्तमराशौ जातं जातं विनाशयति ।।८।। अर्थस्थाने क्रूरः सौम्यैरनिरीक्षितः प्रथमजातम् । सस्यं निहन्ति पश्चादुप्तं निष्पादयेद्व्यक्तम् ।।९।। जामित्रकेन्द्रसंस्थौ क्रूरौ सूर्यस्य वृश्चिकस्थस्य । सस्यविपत्तिं कुरुतः सौम्यैर्दृष्टौ न सर्वत्र ।।१०।। वृश्चिकसंस्था-दर्कात् सप्तमषष्ठोपगौ यदा क्रूरौ । भवति तदा निष्पत्तिः सस्यानामर्घपरिहानिः ।।११।। विधिनानेनैव रविर्वृषप्रवेशे शरत्समुत्थानाम् । विज्ञेयः सस्यानां नाशाय शिवाय वा तज्ज्ञैः ।।१२।। त्रिषु मेषादिषु सूर्यः सौम्ययुतो वीक्षितोऽपि वा विचरन्। ग्रैष्मिकधान्यं कुरुते समर्थमुभयोपयोग्यं च ।। १३ ।। कार्मुकमृगघटसंस्थःशारदस्य तद्वदेव रविः । संग्रहकाले ज्ञेयो विपर्ययः क्रूरदृग्योगात् ।।१४।।

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां सस्यजातकं नाम चत्वारिंशोऽध्यायः।।४०।।

वृश्चिक या वृषराशिमें सूर्यके प्रवेशकालके समय ग्रीष्म और शरत्कालके उत्पन्न हुए धान्यके सम्बन्धमें जो शुभाशुभ बादरायण मुनिजीने निश्चय किये हैं वह यह हैं—सूर्यके वृश्चिक

राशिमें गमन करनेके समय उसके समस्त केन्द्रस्थान अर्थात् वृश्चिक, कुंभ, वृष और सिंहराशि शुभ ग्रहों करके युक्त वा बलवान् शुभ ग्रहों करके देखा जाय तो ग्रीष्मके धान्यकी वृद्धि होती है ।। २ ।। जब सूर्य आठवीं राशि (वृश्चिक) में गमन करे उस काल यदि कुंभमें बृहस्पति और सिंहमें चन्द्रमा अथवा सिंहमें बृहस्पति और कुंभमें चन्द्रमा हो तो ग्रीष्मका उत्पन्न हुआ धान्य बढता है ।। ३ ।। शुक्र या बुध जो सूर्यकी दूसरी राशिमें जाय अथवा एक साथ ही सूर्यकी बारहवीं राशिमें जाय तो भी ऐसा ही अन्न होगा और उसमें यदि बृहस्पतिकी दृष्टि हो तो वह अन्न उत्तम भांतिसे होगा ।। ४ ।। वृश्चिक राशिमें गये हुए सूर्यकी दोनों दिशाएँ यदि दो शुभ ग्रह और उससे सातवें चन्द्रमा और बृहस्पति हो तो बहुत उत्तम खेती हो, वृश्चिक आरम्भमें रवि और उसके दूसरे स्थानमें बृहस्पतिका होना आधी खेतीकी सूचना कराता है ।। ५ ।। शुक्र, चन्द्र और बुध ग्रह जो वृश्चिकमें गये हुए सूर्यसे दूसरी, चौथी अथवा ग्यारहवीं राशिमें हो तो अन्नकी श्रेष्ठ सम्पत्ति होती है और कर्म (दशम) में बृहस्पति हो तो गायोंके लिये श्रेष्ठ सम्पत्ति प्राप्त होती है ।। ६ ।। जिस समय सूर्य वृश्चिक राशिमें गमन करे उस समय जो कुंभमें बृहस्पति, वृषमें चन्द्रमा और मंगल व शनि यदि मकरराशिमें हों तो अन्न भलीभांतिसे होता है, परन्तु पीछेसे परचक्र और रोगका भय हुआ करता है ।।७।। जो सूर्य वृश्चिक राशिमें दो पापग्रहोंके बीचमें हो तो धान्यका नाश करता है, इस समय वृषराशिमें स्थित हो तो पैदा होते ही अन्नका नाश कर देता है ।।८।। उसके अर्थस्थानमें स्थित क्रूर ग्रह शुभ ग्रहसे न देखा जाय तो पहिली बोई हुई खेतीका नाश करता है, परंतु पीछेकी बोई हुई खेती भलीभांतिसे उपजती है ।।९।। वृश्चिक राशिमें स्थित सूर्यकी सातवीं लग्नमेंके या केन्द्र-स्थित और क्रूर ग्रह खेतीका नाश करते हैं परंतु उनको शुभ ग्रह देखता हो तो सब जगहके धान्यको नाश नहीं कर सकते ।।१०।। जब दो क्रूर ग्रह वृश्चिकराशिमें स्थित सूर्यसे सातवें और छठें हो तो खेती होती है, परंतु मूल्य महंगा रहता है ।।११।। वृष-राशिमें सूर्यके प्रवेश करनेसे उत्पन्न हुए धान्यके नाशका या मंगलका कारण भी होता है ऐसा पंडितोंको कहना चाहिये ।।१२।। मेषादि तीन राशियोंमें स्थित सूर्य शुभ ग्रह करके युक्त हो या शुभ ग्रहसे देखा जाय तो ग्रीष्मकी खेती समर्थ हो और इतना सस्ता अन्न रहे कि आदमी लोक परलोक दोनों बना लें (परलोक बनानेके लिये अन्नदान करें) ।।१३।। धन, मकर और कुंभराशिमें स्थित सूर्य शरत्कालमें उत्पन्न हुई खेतीको भी वैसेही करते हैं और अन्नको संग्रहकालमें क्रूर ग्रहकी दृष्टि और योगसे इसका उलटा फल होता है यही जानना चाहिये ।।१४।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां चत्वारिंशोऽध्यायः ।।४०।।

अथैकचत्वारिंशोऽध्यायः

द्रव्यनिश्चयः

(ये येषां द्रव्याणामधिपतयो राशयः समुद्दिष्टाः । मुनिभिः शुभाशुभार्थं तानागमतः प्रवक्ष्यामि ।।१।। वस्त्राविककुतुपानां मसूरगोधूमरालकयवानाम् । स्थलसम्भववौषधीनां कनकस्य च कीर्तितो मेषः ।। २ ।। गवि वस्त्रकुसुमगोधूम-

शालियवमहिषसुरभितनयाः स्युः । मिथुनेऽपि धान्यशारदवल्लीशालूककर्पासाः ॥३॥ कर्किणि कोद्रवकदलीदूर्वाफलकन्दपत्रचोचानि । सिंहे तुषधान्यरसाः सिंहादीनां त्वचः सगुडाः ॥४॥ षष्ठेऽतसीकलायाः कुलत्थगोधूममुद्गनिष्पावाः । सप्तमराशौ माषा गोधूमाः सर्षपाः सयवाः ॥५॥ अष्टमराशाविक्षुः सैक्यं लोहान्यजाविकं चापि । नवमे तु तुरगलवणाम्बरास्त्रतिलधान्यमूलानि ॥ ६ ॥ मकरे तरुगुल्माद्यं सैक्येक्षुसुवर्णकृष्णलोहानि । कुम्भे सलिलजफलकुसुमरत्नचित्राणि ॥७॥ मीन कपालसम्भवरत्नान्यम्बूद्भवानि वज्राणि । स्नेहाश्च नैकरूपा व्याख्याता मत्स्यजात च ॥८॥ राशेश्चतुर्दशार्थायसप्तनवपञ्चमस्थितो जीवः । व्येकादशदशपञ्चाष्टमेषु शशिजश्च वृद्धिकरः ॥९॥ षट्सप्तमगो हानिं वृद्धिं शुक्रः करोति शेषेषु । उपचयसंस्थाः क्रूराः शुभदाः शेषेषु हानिकराः ॥१०॥ राशेर्यस्य क्रूराः पीडास्थानेष संस्थिता बलिनः । तत्प्रोक्तद्रव्याणां महार्घता दुर्लभत्वं च ॥११॥ इष्टस्थाने सौम्या बलिनो येषां भवन्ति राशीनाम् । तद्द्रव्याणां वृद्धिः सामर्थ्यमदुर्लभत्वं च ॥१२॥ गोचरपीडायामपि राशिर्बलिभिः शुभग्रहैर्दृष्टः । पीडां न करोति तथा क्रूरैरेवं विपर्यासः ॥१३॥

इति वराहमिहिरकृतौ बृहत्संहितयां द्रव्यनिश्चयो नामैकचत्वारिंशोऽध्यायः ॥४१॥

जिन २ राशियोंको निज द्रव्योंका स्वामी मुनि लोगोंने कहा है, शुभ और अशुभ जाननेक लिये आगमसे उनका विषय कहा जाता है ॥१॥ मेशराशि वस्त्र, भेडके रोमसे बने कम्बल, बकरेकी ऊनसे बने कम्बल, मसूर, गेहूँ, राल (वृक्षोंके गोंद), जौ, स्थलकी उपजी हुई औषधियें और सुवर्णकी स्वामिनी कही जाती है ॥२॥ वस्त्र, कुसुम, गेहूँ, शालि धान्य, महिष और गाय इनकी स्वामिनी वृषराशि है–धान्य और शरदृतु में उत्पन्न हुए पदार्थ, लता, कमल कुमकुमादिकी जड और कपास यह मिथुनके अधीन हैं ॥३॥ कर्कमें कोदो, केला, दूब फल, पत्र, और छालकी स्वामिनी है। सिंहके अधिकारमें, भुस्सी, धान्य, रस, गुड और सिंहादिके चर्म हैं ॥४॥ कन्याराशिमें अलसी, मटर, कुलथी, गेहूँ, मूंग, निष्पाव (मटर) हैं। तुला राशिमें उर्द, गेहूँ, सरसों और जौ विद्यमान हैं ॥५॥ ईख, शिक्यस्थ द्रव्य (ईखमें पानी देनेसे जो वस्तु उत्पन्न होती है), लोहा, भेड, बकरीका स्वामी वृश्चिक है। अश्व, लवण, अम्बर, अस्त्र, तिल, धान्य और मूल धनराशिमें विराजमान हैं ॥६॥ मकरमें वृक्ष गुल्मादि और सचिंनेसे जो वस्तु उत्पन्न होती है, ईख सुवर्ण और कासा लोहा है । कुंभमें जलसे उत्पन्न हुए फल, फूल, रत्न और चित्रविचित्र रूपवाले वर्तमान हैं ॥७॥ कपालसंभव रत्न (हाथीके शिरसे निकली मणि या नागके शिरसे निकली मणि), जलसे उत्पन्न होनेवाले पदार्थ अनेक रूपवाले, स्नेह द्रव्य और मछलियाँ मीनराशिके अधीन हैं ॥८॥ जिस राशिके दूसरे चौथे पांचवें, सातवें, नववें, दशवें ग्यारहवें स्थानमें बृहस्पति हो अथवा दूसरे, पांचवें आठवें, दशवें, वा एकादश स्थानमें बुध हो उस राशिमें जो द्रव्य कहे हैं उनकी वृद्धि होगी ऐसेही शुक्र उस राशिके छठे या सातवें स्थानमें हो, तिस राशिके द्रव्योंकी हानि और अभिन्न राशियों में हो तो वृद्धि करते हैं, और क्रूर

ग्रह उपचय स्थान अर्थात् तीसरे, छठे, दशम या एकादश स्थान में हों तो शुभदायी हैं और उसके सिवाय और राशि में स्थित हो तो हानिकारी हैं ॥९॥१०॥ बलवान क्रूर ग्रह जिस राशि के पीडा स्थान में अर्थात् उपचय स्थान के सिवाय अलग स्थान में स्थित हों, उस राशिके अधिकार में जितने द्रव्य हों वह सब महँगे होकर दुर्लभ होजाते हैं ॥११॥ बलवान् शुभ ग्रह जिन राशियों के इष्टस्थान में अर्थात् उपचयस्थान में हों, उन राशियों के अधीन में जो जो द्रव्य हैं उनकी वृद्धि होती है सामर्थ्य और सुलभता होती है ॥१२॥ गोचर पीडा में भी सब राशि में बलवान् और शुभ ग्रहों करके देखी जाय तो पीडा नहीं, और क्रूर ग्रह देखते हों तो इससे विपरीत फल होता है ॥१३॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां भाषाटीकायामेकचत्वारिंशोऽध्यायः ॥४१॥

अथ द्विचत्वारिंशोऽध्यायः

अर्घकाण्डम्

अतिवृष्टयुल्काण्डान् परिवेषग्रहणपरिधिपूर्वांश्च । दृष्ट्वामावास्याया-मुत्पातान् पौर्णमास्यां च ॥१॥ ब्रूयादर्घविशेषान् प्रतिमासं राशिषु क्रमात् सूर्ये । अन्यतिथावुत्पाता ये ते डमरार्तये राज्ञाम् ॥२॥ मेषोपगते सूर्ये ग्रीष्मजधान्यस्य संग्रहं कुर्यात् । वनमूलफलस्य वृषे चतुर्थमासे तयोर्लाभः ॥३॥ मिथुनस्थे सर्व-रसान् धान्यानि च संग्रहं समुपनीय । षष्ठे मासे विपुलं विक्रीणन् प्राप्नुयाल्लाभम् ॥४॥ कर्किण्यर्के मधुगन्धतैलघृतफाणितानि विनिधाय । द्विगुणा द्वितीयमासे लब्धिर्हीनाधिके छेदः ॥५॥ सिंहे सुवर्णमणिचर्मशस्त्राणि मौक्तिकं रजतम् । पञ्चममासे लब्धिर्विक्रेतुरतोऽन्यथा छेदः ॥६॥ कन्यागते दिनकरे चामरखरकर-भवाजिनां क्रेता । षष्ठे मासे द्विगुणं लाभमवाप्नोति विक्रीणन् ॥७॥ तौलिनि तान्तवभाण्डं मणिकम्बलकाचपीतकुसुमानि । आदद्याद्धान्यानि च षण्मासाद्द्विगुणिता वृद्धिः॥८॥ वृश्चिकसंस्थे सवितरि फलकन्दकमूलविविधरत्नानि। वर्षद्वयमुषितानि द्विगुणं लाभं प्रयच्छन्ति ॥९॥ चापगते गृह्णीयात् कुंकुमशंखप्रवालकाचानि । मुक्ताफलानि च ततो वर्षार्द्धाद्द्विगुणतां यान्ति ॥१०॥मृगघटगे गृह्णीयाद्दिवाकर लोहभाण्डधान्यानि । स्थित्वा मांसं दद्याल्लाभार्थी द्विगुणमाप्नोति ॥११॥ सवितरि झषमुपयाते मूलफलं कन्दभाण्डरत्नानि । संस्थाप्य वत्सरार्धं लाभकमिष्टं समा-प्नोति ॥१२॥ राशौ राशौ यस्मिन् शिशिरमयूखः सहस्रकिरणो वा । युक्तोऽ-धिमित्रदृष्टस्तत्रायं लाभकोदिष्टः ॥१३॥ सवितृसहितः संपूर्णो वा शुभैर्युतवीक्षितः शिशिरकिरणः सद्योऽर्घस्य प्रवृद्धिकरः स्मृतः । अशुभसहितः सन्दृष्टो वा हिनस्त्य-थवा रविः प्रतिग्रहगतान् भावान् बुद्धा वदेत्सदसत् फलम् ॥१४॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायामर्घकाण्डं नाम द्विचत्वारिंशोऽध्यायः ॥२४॥

प्रतिमासमें सब राशियें जब सूर्यमें गमन करें अमावास्या या पूर्णिमामें परिवेष, ग्रहण, परिधि, अतिवृष्टि, उल्का व दंडरूप उत्पातों को देखकर क्रमानुसार सब विषयोंको कहना चाहिये और तिथियोंमें जो उत्पात होते हैं, वे सब उत्पात राजाओंके लिये गड-बडीका भय प्रगट करते हैं ॥१॥२॥ सूर्य मेषराशिमें जाय तो ग्रीष्मजात धान्यका संग्रह करना उचित है. वृषराशिमें बनैले फल और मूलका संग्रह करना कर्त्तव्य है. चौथे मासमें उसमें लाभ होता है ॥३॥ सूर्य मिथुन राशिमें प्राप्त हो तो सर्व प्रकारके रस और सब प्रकारके धान्योंका संग्रह करके छठे मासमें विक्रय करे तो बहुतसा लाभ होता है ॥४॥ सूर्य कर्क राशिमें स्थित हो तो मधु, गंध तेल, घी और शक्करकी रक्षा करनेसे अर्थात् इनके भर लेनेसे दूसरे मासमें दूना लाभ होता है परंतु अल्पाधिक समय होनेपर कम लाभ और नाश होवे ॥५॥ सिंहराशिमें सूर्य हो तो सुवर्ण, मणि, चर्म, वर्म, शस्त्र, मोती और चांदीका संग्रह करके पाचवें मासमें बेचे तो बेचनेवालेको लाभ होता है, इसके विरुद्ध होनेसे हानि होती है ॥६॥ सूर्य कन्याराशिमें हो तो चमर, गधे, हाथीके बच्चे और घोडोंको खरीदकर छठे मासमें बेचे तो दुगुना लाभ होता है ॥७॥ तुला-राशिमें सूर्य हो तो सूत व ऊनके बने हुए वस्त्र, बर्त्तन, मणि, कम्बल, कांच, पीले फूल और समस्त धान्योंका संग्रह करनेसे इनका मोल फिर दूना बढ जाता है ॥८॥ वृश्चिक-राशिमें सूर्य हो तो कन्द, मूल फल और विविध भांतिके रत्न इकट्ठे करके दो वर्षतक रक्खे तो दुगुना लाभ होता है ॥९॥ सूर्य धनराशिमें हो तो कुंकुम, शंख, मूंगा, मोती और फलोंको संग्रह करना चाहिये खरीदनेसे छः मासके पीछे इनका मोल दुगुना हो जाता है ॥१०॥ मकर और कुंभराशिमें सूर्य हो तो लोहा, बर्तन और धान्योंको ग्रहण करना चाहिये । लाभ चाहनेवाला इन वस्तुओंको एक मास रखकर बेचे तो दुगुना लाभ होगा ॥११॥ मीनराशिमें सूर्य प्राप्त हो तो मूल, फल, कन्द, वर्त्तन और रत्नोंको ग्रहण करके छः मास रखके पीछे बेचे तो मनमाना लाभ होता है ॥१२॥ जिस राशिको सूर्य या चंद्रमा प्राप्त हों और अधिमित्र ग्रहोंसे वे देखे जायँ तो उस राशिसंबंधी वस्तुमें लाभ करते हैं और अमावास्या या पूर्णिमाको चंद्रमा शुभग्रहसे युत हो या देखा जाता हो तो शीघ्र अर्घप्रवृद्धिकर कहा जाता है । सूर्य अशुभ ग्रहसे देखा जाय या अशुभ ग्रहके साथ हो तो विघ्न होता है. इस प्रकार प्रत्येक ग्रहगत भावोंको जानकर अच्छे और बुरे फलको कहना चाहिये ॥१३॥१४॥

इति श्रीवराहमिहिराचार्यविरचि० बृहत्संहितायां पश्चिमोत्तरदेशीयमुराबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां द्विचत्वारिंशोऽध्यायः ॥४२॥

अथ त्रिचत्वारिंशोऽध्यायः

इन्द्रध्वजसंपत्

ब्रह्माणमूचुरमरा भगवञ्छक्ताः स्म नासुरान् समरे । प्रतियोधयितुमतस्त्वां शरण्यशरणं समुपयाताः ॥१॥ देवानुवाच भगवान् क्षीरोदे केशवः स वः केतुम् । यं दास्यति तं दृष्ट्वा नाजौ स्थास्यन्ति वो दैत्याः ॥२॥ लब्धवराः क्षीरोदंगत्वा ते तुष्टुवुः सुराः सेन्द्राः । श्रीवत्सांकं कौस्तुभमणिकिरणोद्भासितोरस्कम् ॥३॥

श्रीपतिमचिन्त्यमसमं समन्ततः सर्वदेहिनां सूक्ष्मम् । परमात्मनमनादिं विष्णुमविज्ञातपर्यन्तम् ॥४॥ तैः संस्तुतः स देवस्तुतोष नारायणो ददौ चैषाम् । ध्वजमसुरसुरवधूमुखकमलवनतुषास्तीक्ष्णांशुम् ॥५॥ तं विष्णुतेजोभवमष्टचक्रे रथेस्थितं भास्वति रत्नचित्रे । देदीप्यमानं शरदीव सूर्यं ध्वजं समासाद्य मुमोद शक्रः ॥६॥ सकिंकिणीजालपरिष्कृतेन स्रक्छत्रघण्टापिटकान्वितेन । समुच्छ्रितेनामरराड्ध्वजेन निन्ये विनाशं समरेऽरिसैन्यम् ॥७॥ उपरिचरस्यामरपो वसोर्ददौ चेदिपस्य वेणुमयीम् । यष्टिं तां स नरेन्द्रो विधिवत्संपूजयामास ॥८॥ प्रीतो महेन मघवान् प्राहैवं ये नृपाः करिष्यन्ति । वसुवद्वसुमन्तस्ते भुवि सिद्धाज्ञा भविष्यन्ति ॥९॥ मुदिताः प्रजाश्च तेषां भयरोगविवर्जिताः प्रभूतान्नाः । ध्वज एव चाभिधास्यति जगति निमित्तैः फलं सदसत् ॥१०॥ पूजा तस्य नरेन्द्रैर्बलवृद्धिजयार्थिभिर्यथा पूर्वम् । शक्राज्ञया प्रयुक्ता तामागमतः प्रवक्ष्यामि ॥११॥ तस्य विधानं शुभकरणदिवसनक्षत्रमङ्गलमुहूर्तैः । प्रास्थानिकैर्वनमियाद्दैवज्ञः सूत्रधारश्च ॥१२॥ उद्यानदेवतालयपितृवनवल्मीकमार्गचितिजाताः । कुब्जोर्ध्वशुष्ककण्टकिवल्लीवन्दाकयुक्ताश्च ॥१३॥ बहुविहगालयकोटरपवनानलपीडिताश्च ये तरवः । ये च स्युः स्त्रीसंज्ञा न ते शुभाः शक्रकेत्वर्थे ॥१४॥ श्रेष्ठोऽर्जुनोऽश्वकर्णः प्रियकधवोदुम्बराश्च पञ्चैते । एतेषामन्यतमं प्रशस्तमथवापरं वृक्षम् ॥१५॥ गौरासितक्षितिभवं संपूज्य यथाविधि द्विजः पूर्वम् । विजने समेत्य रात्रौ स्पृष्ट्वा ब्रूयादिमं मंत्रम् ॥१६॥ यानीह वृक्ष भूतानि तेभ्यः स्वस्ति नमोऽस्तु वः । उपहारं गृहीत्वेमं क्रियतां वासपर्ययः ॥१७॥ पार्थिवस्त्वां वरयते स्वस्ति तेऽस्तु नगोत्तम । ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम् ॥१८॥ छिन्द्यात् प्रभातसमये वृक्षमुदक् प्राङ्मुखोऽपि वा भूत्वा । परशोर्जर्जरशब्दो नेष्टःस्निग्धो घनश्च हितः ॥१९॥ नृपजयदमविध्वस्तं पतनमनाकुञ्चितं च पूर्वोदक् । अविलग्नं चान्यतरौ विपरीतमतस्त्यजेत्पतितम् ॥ २० ॥ छित्वाग्रे चतुरंगुलमष्टौ मूले जले क्षिपेद्यष्टिम् । उद्धृत्य पुरद्वारं शकटेन नयेन्मनुष्यैर्वा ॥ २१ ॥ अरभङ्गे बलभेदो नेम्या नाशो बलस्य विज्ञेयः । अर्थक्षयोऽक्षभङ्गे तथाणिभङ्गे च वर्द्धकिनः-॥२२॥ भाद्रपदशुक्लपक्षस्याष्टम्यां नागरैर्वृतो राजा । दैवज्ञसचिवकंचुकिविप्रप्रमुखैः सुवेषधरैः ॥२३॥ अहताम्बरसंवीतां यष्टिं पौरन्दरीं पुरं पौरैः । स्रग्गन्धधूपयुक्तां प्रवेशयेच्छंखतूर्यरवैः ॥२४॥ रुधिरपताकातोरणवनमालालंकृतं प्रहृष्टजनम् । सम्मार्जितार्चितपथं सुवेषगणिकाजनाकीर्णम् ॥२५॥ अभ्यर्चितापणगृहं प्रभूतपुण्याहवेदनिर्घोषम् । नटनर्तकगेयज्ञैराकीर्णं चतुषपथं नगरम् ॥ २६ ॥ तत्र पताकाः श्वेता विजयाय भवन्ति रोगदाः पीताः । जयदाश्च चित्ररूपा रक्ताः शस्त्रप्रकोपाय ॥२७॥ यष्टिं प्रवेशयन्तीं निपातयन्तो भयाय नागाद्याः । बालानां तलशब्दे संग्रामः सत्त्वयुद्धे वा ॥२८॥ सन्तक्ष्य पुनस्तक्षा विधिवद्यष्टिं प्ररोपयद्यन्त्रे। जागरमेकादश्यां

नरेश्वरःकारयेच्चास्य ॥२९। सितवस्त्रोष्णीषधरः पुरोहितः शाक्रवैष्णवैर्मन्त्रैः। जुहुयादग्नि सांवत्सरो निमित्तानि गृह्णीयात् ॥३०॥ इष्टद्रव्याकारः सुरभिःस्निग्धो घनोऽनलोऽर्चिष्मान् । शुभकृदतोऽन्यो नेष्टो यात्रायां विस्तरोऽभिहितः ॥३१॥ स्वाहावसानसमये स्वयमुज्ज्वलार्चिः स्निग्धः प्रदक्षिणशिखो हुतभुग् नृपस्य। गङ्गादिवाकरसुताजलचारुहारां धात्रीं समुद्ररसनां वशगां करोति ॥ ३२ ॥ चामी कराशोककुरण्टकाब्जवैदूर्यनीलोत्पलसन्निभेऽग्नौ । न ध्वान्तमन्तर्भवनेऽवकाशं करोति रत्नांशुहतं नृपस्य ॥ ३३ ॥ येषां रथौघार्णवमेघदन्तिनां समस्वनोऽग्निर्यदि वापि दुन्दुभेः। तेषां मदान्धेभघटाविघट्टिता भवन्ति याने तिमिरोपमा दिशः ॥३४॥ ध्वजकुम्भहयेभभूभृतामनुरूपे वशमेति भूभृताम्। उदयास्तधराधरा हिम-वद्विन्ध्यपयोधरा धरा ॥ ३५ ॥ द्विरदमदमहीसरोजलाजैर्धृतमधुना च हुताशने सगंधे। प्रगतनृपशिरोमणिप्रभाभिर्भवति पुरश्छुरितेव भूनृपस्य ॥३६॥ उक्तं यदुत्तिष्ठति शक्रकेतौ शुभाशुभं सप्तमरीचिरूपैः। तज्जन्मयज्ञग्रहशान्तियात्रा-विवाहकालेष्वपि चिन्तनीयम् ॥३७॥ गुडपूपपायसाद्यैर्विप्रानभ्यर्च्य दक्षिणाभिश्च । श्रवणेन द्वादश्यामुत्थाप्योऽन्यत्र वा श्रवणात् ॥३८॥ शक्रकुमार्यः कार्याः प्राह मनुः सप्त पंच वा तज्ज्ञैः । नन्दोपनन्दसंज्ञे पादेनार्धेन चोच्छ्रायात् ॥३९॥ षोडसभागाभ्यधिके जयविजये द्वे वसुंधरे चान्ये । अधिका शक्रजनित्री मध्येऽ-ष्टांशेन चैतासाम् ॥ ४० ॥ प्रीतैः कृतानि विबुधैर्यानि पुरा भूषणानि सुरकेतोः। तानि क्रमेण दद्यात् पिटकानि विचित्ररूपाणि ॥४१॥ रक्ताशोकनिकाशं चतुरस्रं विश्वकर्मणा प्रथमम्। रसना स्वयम्भुवा शंकरेण चानेकवर्णधरी ॥४२॥ अष्टाश्रि नीलरक्तं तृतीयमिन्द्रेण भूषणं दत्तम्। असितंयमश्चतुर्थं मसूरकं कान्तिमदयच्छत ॥४३॥ मञ्जिष्ठाभं वरुणः षडश्रि तत्पंचमं जलोर्मिनिभम् । मायूरं केयूरं षष्ठं वायुर्जलदनीलम् ॥४४॥ स्कन्दः स्वं केयूरं सप्तममदद्ध्वजाय वहुचित्रम्। अष्टम-मनलज्वालासंकाशं हव्यभुग्दत्तम् ॥४५॥ वैदूर्यसदृशमिन्दुर्नवमं ग्रैवेयकं ददावन्यत्। रथचक्राभं दशमं सूर्यस्त्वष्टा प्रभायुक्तम् ॥४६॥ एकादशमुद्वंशं विश्वेदेवाः सरोज-संकाशम्। द्वादशमपि च निवंशं मुनयो नीलोत्पलाभासम् ॥४७॥ किञ्चिदध ऊर्ध्वं निर्णतमुपरि विशालं त्रयोदशं केतोः। शिरसि बृहस्पतिशुक्रौ लाक्षारससन्निभं ददतुः ॥४८॥ यद्यद्येन विनिर्मितममरेण विभूषणं ध्वजस्यार्थे। तत्तत्तद्दैवत्यं विज्ञातव्यं विपश्चिद्भिः ॥४९॥ ध्वजपरिमाणत्र्यंशः परिधिः प्रथमस्य भवति पिटकस्य । परतः प्रथमात्प्रमादष्टांशहीनानि ॥५०॥ कुर्यादहनि चतुर्थे पूरणमिन्द्रध्वजस्य शास्त्रज्ञः। मनुना चागमगीतान् मंत्रानेतान् पठेन्नियतः ॥५१॥ हरार्कवैवस्वत-शक्रसोमैर्धनेशवैश्वानरपाशभृद्भिः। महर्षिसंघैः सदिगप्सरोभिः शुक्राङ्गिरःस्कन्द-मरुद्गणैश्च ॥५२॥ यथा त्वमूर्जस्करनैकरूपैः समर्चितस्त्वाभरणैरुदारैः । तथेह

तान्याभरणानि देव शुभानि सम्प्रीतमना गृहाण ।।५३।। अजोऽव्ययः शाश्वत एकरूपो विष्णुर्वराहः पुरुषः पुराणः । त्वमन्तकः सर्वहरः कृशानुः सहस्रशीर्षा शतमन्युरीड्यः ।।५४।। कविं सप्तजिह्वं त्रातारम् इन्द्रमवितारं सुरेशम् । ह्वयामि शक्रं वृत्रहणं सुषेणमस्माकं वीरा उत्तरे भवन्तु ।।५५।। प्रपूरणे चोच्छ्रयणे प्रवेशे स्नाने तथा माल्यविधौ विसर्गे । पठेदिमान्नृपतिः सोपवासो मंत्राञ्छुभान् पुरुहूतस्य केतोः ।।५६।। छत्रध्वजादर्शफलार्द्धचन्द्रैर्विचित्रमालाकदलीक्षुदण्डैः । सव्याल सिंहैः पिटकैर्गवाक्षैरलंकृतं दिक्षु च लोकपालैः ।। ५७ ।। अच्छिन्नरज्जुं दृढकाष्ठमातृकं सुश्लिष्टयंत्रार्गलपादतोरणम् । उत्थापयेल्लक्ष्म सहस्रचक्षुषः सारद्रुमाभग्नकुमारिकान्वितम् ।।५८।। अविरतजनरावं मङ्गलाशीः प्रणामैः पटुपटहमृदङ्गैः शंखभेर्यादिभिश्च । श्रुतिविहितवचोभिः पापठद्भिश्च विप्रैरशुभरहितशब्दंकेतुमुत्थापयीत ।।५९।। फलदधिघृतलाजाक्षौद्रपुष्पाग्रहस्तैः प्रणिपतितशिरोभिस्तुष्टुवद्भिश्च पोरैः। धृतमनिमिषभर्तुः केतुमीशःप्राजनामरिनगरनताग्रं कारयेद्विड्वधाय।।६०।। नातिद्रुतं न च विलम्बितमप्रकम्पमध्वस्तमाल्यपिटकादिविभूषणं च । उत्थानमिष्टमशुभं यदतोऽन्यथा स्यात् तच्छान्तिभिर्नरपतेः शमयत्पुरोधाः ।।६१।। क्रव्यादकौशिककपोतककाककंकैः केतुस्थितैर्महदुशन्ति भयं नृपस्य । चाषेण चापि युवराजभयं वदन्ति श्येनो विलोचनभयं निपतन् करोति ।।६२।। छत्रभङ्गपतने नृपमृत्युस्तस्करान्मधु करोति निलीनम् । हन्ति चाप्यथ पुरोहितमुल्का पार्थिवस्य महिषीमशनिश्च ।।६३।। राज्ञीविनाशं पतिता पताका करोत्यवृष्टिं पिटकस्य पातः। मध्याग्रमूलेषु च केतुभङ्गो निहन्ति मन्त्रिक्षितिपालपौरान् ।।६४।। धूमावृते शिखिभयं तमसा च मोहो व्यालैश्च भग्नपतितैर्न भवन्त्यमात्याः । ग्लायन्त्युदक्प्रभृति च क्रमशो द्विजाद्या भङ्गे च बंधकिवधः कथितः कुमार्याः ।।६५।। रज्जूसंगच्छेदने बालपीडा राज्ञो मातुः पीडनं मातृकायाः। यद्यत्कुर्युर्बालकाश्चारणा वा तत्तत्तादृग्भावि पापं शुभं वा।।६६।। दिनचतुष्टयमुत्थितमर्चितं समभिपूज्य नृपोऽहनि पञ्चमे । प्रकृतिभिः सह लक्ष्म विसर्जयेद्बलभिदःस्वबलाभिविवृद्धये ।।६७।। उपरिचरवसुप्रवर्तितं नृपतिभिरप्यनु सन्ततं कृतम् । विधिमिममनुमन्य पार्थिवो न रिपुकृतं भयमाप्नुयादिति ।।६७।।

इति श्रीवराहमिहिरकृतौ बृहत्सं० मिन्द्रध्वजसम्यपन्नाम त्रिचत्वारिंशोऽध्यायः।।४३।।

देवतालोगोंने ब्रह्माजीसे कहा था "हे भगवन् ! हममें इतनी सामर्थ्य नहीं है कि असुरलोगोंके साथ युद्ध करें, इस कारण हे शरण देनेवाले ! उनके साथ युद्ध करनेके लिये हम आपकी शरण लेते हैं" ।।१।। भगवान् ब्रह्माजीने देवताओंसे कहा कि "श्रीभगवान् केशवजी क्षीरसागरमें विराजमान हैं वह तुमको एक (झंडी) देंगे, उस केतुको देखकर फिर दैत्यलोग युद्धमें तुम्हारे सामने खडे नहीं रह सकेंगे" ।।२।। इस प्रकार इन्द्रके साथ वह सब देवता वर पाकर क्षीरसागरपर गये और श्रीवत्सके चिह्नसे युक्त

कौस्तुभमणिकी किरणोंसे जिनकी छाती प्रकाशमान हो रही है, अचिन्त्य (विचारमें न आनेके योग्य), समदर्शी सब प्राणियोंके अन्तरमें वास करनेवाले, सूक्ष्म, जिनकी सीमाका परिमाण नहीं, अनादि, परमात्मा, श्रीपति विष्णुजीकी स्तुति करने लगे ।।३।। जब इस प्रकारसे उन देवताओंने नारायणकी स्तुति की तो उन्होंने देवताओंके, देवताओंकी बहुओंके मुखरूपी कमलवनको सूर्य और राक्षसोंकी बहुओंके मुखरूपी कमलवनको चंद्रमाके समान एक ध्वज देकर संतुष्ट किया ।।५।। महाराज इन्द्र शरत्कालके सूर्यके समान प्रकाशमान, विष्णुजीके तेजसे उत्पन्न हुए, आठ पहियेदार, प्रकाशित, रत्नसे चित्रित रथमें स्थित उस ध्वजको पाकर हर्षित हुए ।।६।। किकणियोंके समूहसे भूषित, माला, छत्र, घंटा, पिटक (एक प्रकारका भूषण जो ध्वजामें लगाया जाता है) से युक्त और अति ऊंचे उस ध्वजसे महाराज इन्द्रने युद्धमें शत्रुकी सेनाका नाश किया ।।७।। देवताओंके राजा इन्द्रने चेदिके राजा उपरिचरवसुको यह बांसका बना हुआ दंड दिया था, राजाने भली भांतिसे उस दंडकी पूजा की ।।८।। इस उत्सवसे प्रसन्न होकर इन्द्रने कहा था कि जो राजा इस उपरिचरवसुके समान उत्सव करेंगे ग्रे वसुके समान वसुमान् होकर पृथ्वीमें सिद्धिके जानने-वाले होंगे, उनकी सब प्रजा संतुष्ट, भयरोगरहित और बहुतसे अन्नवाली होगी अर्थात् उनके घरमें बहुत नाज भरा रहेगा यह ध्वज ही जगत् में निमित्त करके संसारमें सत असत् फलका प्रकाश करेगा ।।९।।१०।। पहले इन्द्रकी आज्ञासे सेनाकी वृद्धि और जीतके चाहनेवाले राजाओं करके जिस प्रकार इन्द्रध्वजकी पूजा की हुई है सो यहां पर शास्त्रके अनुसार कहूंगा ।।११।। उस पूजाकी विधि यह है कि शुभ करण, दिवस, नक्षत्र और मंगल मुहूर्त यात्रा करनेके योग्य हो तो दैवज्ञ और सूत्रधार (बढई) को वनमें जाना चाहिये ।।१२।। फुलवाडी, देवस्थान पितृवन, वमई मार्ग और चिता तथा कुबडा, खडे २ ही सूख गये हों, कांटेदार, जिनपर वेल फैल रही हो तथा बंदा भी हो, जिसपर पक्षियोंके बहुतसे घोंसले हों या हवा और आगसे जो वृक्ष पीडित हों, अथवा जिन वृक्षोंका नाम स्त्रीके नामसा हो जैसे खिरनी सो ऐसे वृक्ष इन्द्रकेतुके अर्थ शुभ नहीं है ।।१३।।१४।। अर्जुन अश्वकर्ण, प्रियक, धव और गूलर यह पांच वृक्ष श्रेष्ठ हैं। यदि इसमें कोई भी वृक्ष न हो तो और कोई वृक्ष ग्रहण करलें तो भी अच्छा है ।।१५।। गौरवर्ण या कृष्ण वर्ण पृथ्वीपर उत्पन्न हुए वृक्षकी पहले यथाविधिसे पूजा करके ब्राह्मण रात्रिके समय मनुष्यरहित वनमें जाय और ऐसे वृक्षको छूकर यह मंत्र पढे,-"इस वृक्षपर जो प्राणी रहते हैं उनका शुभ हो, मैं उनको नमस्कार करता हूं। यह आहार ग्रहण करके वह प्राणी और कहीं वास करें। हे नगोत्तम! देवराजकी ध्वजाके लिये यह राजा तुमको पानेकी इच्छा करते हैं, तुम्हारा शुभ हो, इस पूजाको ग्रहण करो" ।।१६।। ।।१७।।१८।। इसके उपरांत प्रभातके समय उत्तर वा पूर्वमुख होकर वृक्षको काटे, उस समय वृक्षके काटनेसे जो जर्जर शब्द निकले तो वह अशुभ है, मनोहर और घने शब्दका निकलना शुभ है ।।१९।। विना टूटे हुए वृक्षका गिरना, टेढा न होना, दूसरे वृक्षसे लगकर न गिरे. पूर्व व उत्तर दिशाको गिरे तो राजाओंको जयदायी होता है। इन सबके अतिरिक्त गिरा हुआ वृक्ष विपरीत फलका देनेवाला है ।।२०।। अग्रसे चार अंगुल मूलसे आठ अंगुल काटकर काठको जलमें डाल देना फिर वृक्षको जलसे निकाल छकड़ेके द्वारा या आदमियोंसे उठवा-कर पुरके द्वारमें लाना चाहिये ।।२१।। लानेके समय छकड़ेका आरा टूट जाय तो सेनाका

भेद होता है, नेमिके टूटनेसे सेनाके नाशकी सूचना होती है। अक्ष (पहियेका धुरा) टूटनेसे धनका नाश और अणिके टूटनसे बढईका नाश हो जाता है ॥२२॥ भाद्रमासके शुक्लपक्षकी अष्टमी तिथिमें श्रेष्ठ वेषधारी नगरवासी, दैवज्ञ, मंत्री, कंचुकी, विप्रादिकोंके साथ राजा अखंडित वस्त्रोंसे ढके हुए और माल्य गंध धूपयुक्त इन्द्रध्वजको शंख तुरहीके शब्दके साथ पुरवासियोंसे उठवाकर पुरमें प्रवेश कराना चाहिये ॥२३॥ ॥२४॥ उस काल वह पुर मनोहर पताका तोरण और वनमालासे सजाया हुआ हो, वहांके सब मनुष्य हर्षित हो, भली भांतिसे झाड बुहार और जल छिडके चौराहोंसे युक्त व सुंदर वेष-वाली वेश्याओंसे सजाधजा हो ॥२५॥ सब दुकानें सजी सजाई हों, चारों ओर पुण्य शब्द और वेदध्वनि होती रहें ॥ नगरके चौराहे, नट, नचनइये और संगीतके जाननेवालोंसे भरे रहें ॥२६॥ ऐसे समय श्वेतपताका लगना विजयका कारण है, पीली पताका रोगदायी और अनेक रंगवाली पताका जयकी देनेवाली है, लाल रंगकी पताका शत्रुशस्त्रके कुपित होनेके कारण होती है ॥२७॥ दंडको नगरमें प्रवेश करानेके समय जो हस्ती आदि कोई जीव उसको गिरा दे तो भयका कारण होता है। जो बालकगण उस समय तालियां बजावें या किसी प्राणीका युद्ध होवे तो संग्रामका होना सूचित होता है ॥२८॥ फिर बढईको चाहिये कि दंडको विधिविधानसे छीलकर खरादपर चढावे, राजाको उचित है कि एकादशीके दिन जागरण करे ॥२९॥ श्वेत वस्त्र और पगडी बांधे हुए राजाका पुरोहित ऐन्द्र और वैष्णवमंत्रसे अग्निमें होम करे। दैवज्ञको उचित है कि संवत्सरके निमित्त (शकुन) सबको बतावे ॥३०॥ अभिलाषा किये हुए द्रव्यके समान आकारधारी, सुगन्धित, चिकना, घना और लपटदार अग्नि शुभकारी है इसके सिवाय और अग्नि वांछित फलका देनेवाला नहीं है। इसका वर्णन विस्तारसहित योगयात्रामें किया है ॥३१॥ देवताके लिये अग्निमें घृतकी आहुतिका देना, मंत्रजपके अन्तमें होमके अग्निका आपही आप उजली शिखावाला, चिकना, दक्षिणदिशासे घेरनेवाला हो तो गङ्गायमुनाके जलरूपकी सुंदर हार पहरनेवाली और समुद्ररूपी तगडीको जिसने पहर रक्खी है ऐसी पृथ्वी राजाके वशमें हो जायगी ॥३२॥ सुवर्ण, अशोक, कुरंटक, पद्म, वैदूर्य या नीले कमलके समान रंगवाला अग्नि हो तो अंधकार, रत्नकी ज्योतिसे पीडित होकर राजाके गृहमें अवकाशको नहीं प्राप्त होता अर्थात् अंधकार टिका नहीं रहता ॥३३॥ जो अग्निमें समुद्र, मेघ हाथी या नगाडेके समान शब्द हो तो जिस समय वह राजा युद्ध करनेको चले उस समय सब दिशाएँ मस्त हाथियोंके समूहसे भरी हुई अंधकारके समान काले रंगकी दिखाई देती हैं ॥३४॥ जो अग्नि ध्वज, घडा, घोडा और हाथियोंके समान हो तो उदय व अस्तपर्वतकी धारण करनेवाली हिमालय और विन्ध्यपर्वतरूप स्तनधारण करनेवाली पृथ्वी राजाके वशमें हो जाती है ॥३५॥ हाथीका मद, मही (पृथ्वी), पद्म (कमल), खीलें, घी या शहदके समान अग्निमें सुगंधी हो तो प्रणाम करते हुए राजाओंकी शिरके मुकुटमें जडी हुई मणियोंकी प्रभाके द्वारा राजसभा व्याप्त हो जाती है ॥३६॥ इन्द्रध्वजको उठानेके समय अग्निके स्वरूपसे जो शुभाशुभ कहे गये, वह जन्म, यज्ञ ग्रह शांति यात्रा और विवाहके समयमें इनका विचार करना चाहिये ॥३७॥ गुड या पिट्ठी, खीरादि और दक्षिणासे ब्राह्मणोंकी पूजा करके द्वादशीको श्रवण नक्षत्रमें, और तिथिको श्रवणनक्षत्रके समय ध्वजाको उठावे। ध्वजाके ऊपर पाँच या सात शक्रकुमारी बनावे ऐसा मनुजी महाराजने कहा है। जितनी ऊंचाई

ध्वजकी हो उसके चौथाई अंशके समान नंदा और आधेके तुल्य उपनन्दा नामवाली शक्रकुमारी बनावे, सोलहवें भागसे कुछ अधिक जय और विजय नामक दो वसुन्धर बनावे और बीचमें आठ अंशसे अधिक इन्द्रमाता बनावे, पहले देवताओंने हर्षित होकर इन्द्रध्वजको भूषण दिये थे इसमें वह समस्त भूषण और पिटक क्रमानुसार दान करे ॥३८॥३९॥ ॥४०॥४१॥ विश्वकर्माजीने लाल अशोकके समान चौकोन अलंकार (गहना) पहले दिया, दूसरा अनेक रंगवाली तगडी ब्रह्मा और शिवजीने दी, इंद्रजीने आठ कोनवाला नीले और लालरंगका तीसरा भूषण इन्द्रध्वजको दिया, यमराजने कान्तिमान् मसूरक नाम चौथा भूषण इन्द्रध्वजको दिया ॥४२॥४३॥ तिसके उपरांत वरुणजीने मंजीठके समान कांतिमान् जलतरंगके समान छः कोणवाला पांचवाँ गहना और पवन देवताने मोरके समान रंगवाला बादलके समान नीला छठा केयूर नामक गहना इन्द्रध्वजको दिया ॥४४॥ स्वामिकार्तिकने अनेक चित्रयुक्त अपना केयूर नामक सातवां गहना इन्द्रध्वजको दिया, होमके अग्निने ज्वालाके समान आठवां अलंकार दिया ॥४५॥ चंद्रमाने वैदूर्यमणिके समान-गरदनमें पहरनेके योग्य नवम अलंकार और त्वष्टा (सूर्य) ने रथके पहियेके समान प्रभा युक्त दशवां गहना इन्द्रध्वजको दिया ॥४६॥ विश्वेदेवताओंने कमलके समान ग्यारहवां अलङ्कार, मुनियोंने नीले कमलके समान निवंशनामक बारहवां अलकार और बृहस्पति व शुक्रने केतुके ऊपर कुछ नीचेसे ऊपर बना हुआ झुका हुआ विशाल महावरके रंगके समान तेरहवां अलङ्कार इन्द्रध्वजके मस्तकपर चढाया ॥४७॥४८॥ इन्द्रध्वजके लिये जिस २ देवताने जो जो गहने बनाये उन गहनोंके मालिक वही देवता हैं यह पंडित लोगोंको जानना चाहिये ॥४९॥ प्रथम पिटककी परिधि ध्वजाके परिमाणका एक तिहाई हिस्सा है, फिर पीछे की समस्त परिधि क्रमानुसार पहलेकी परिधिसे अष्टमांश न्यून हैं ॥५०॥ शास्त्रका जाननेवाला पुरुष चौथे दिन मंत्रसे इन्द्रध्वजको पूरण करे और आगमसे मनुजीके कहे हुए इन मंत्रोंको पढे ॥५१॥ महादेव, सूर्य, यम, इन्द्र, चन्द्र, कुबेर, अग्नि, वरुण, महर्षिगण सब दिशाएँ, अप्सराएँ, शुक्र, अंगिरा, कार्तिकेय, वायु और गणदेवता इन करके तेजकारी, बहुरूप, उदार भूषणोंसे जिस प्रकार आप पूजित हुए हैं, हे देव ! इस समय प्रसन्न होकर उन सब गहनोंको ग्रहण करो, हे देव ! तुम जन्मरहित, विकाररहित, नित्य और एकरूप हो, तुम ही अनादि पुरुष और ग्रह हो, तुम ही यम, तुम ही संहारकारी तुम ही अग्नि, तुम ही हजार मस्तकवाले, तुम ही पूज्य हो, कवि सप्तजिह्व, त्राता, सुरपति, अविता, वृत्रासुरके मारनेवाले शक और सुषेण नामक तुमको मैं आह्वान करता, हूं, हमारे सब वीर उत्तरमें विराजमान अर्थात् जयी हों ॥५२॥ ॥ ५३ ॥ ५४ ॥ ५५ ॥ इन्द्रध्वजका पूर्ण करना, उडाना, प्रवेश कराना, स्नान, माला पहराना और विसर्जनके समय राजा उपवास करके इन शुभ मंत्रोंको पढे ॥५६॥ छत्र, ध्वज, आदर्शफल, अर्द्धचंद्र, विचित्र माला, कदली, गन्ना, काला सर्प, सिंह पिटक, गवाक्ष और दिक्पालोंको इस ध्वजमें चारों ओर बनावे ॥५७॥ अखंडित वृक्षका बना हुआ, अखंडित रस्सीसे बँधा हुआ, कुमारिका जिसमें बनी हुई हों; यंत्र, अर्गल, पाद और तोरणयुक्त हजार नेत्रवाले इन्द्रका जो चिह्न है ऐसे ध्वजको राजा उठावे ॥५८॥ मङ्गल आशीर्वाद, प्रणाम, ढोल, मृदङ्ग, शंख, भेरी आदिका मधुर शब्द और वारंवार पढते हुए ब्राह्मणोंके वेदमें कहे हुए वाक्यसे मनुष्योंका शब्दसे युक्त और श्रेष्ठ शब्दवाले केतुको उठावे ॥५९॥ फल, दही

धी: खीलें, शहद और फूलोंको पहले हाथमें धारण करके मस्तक झुकाकर प्रणाम करते २ स्तुति पढनेवाले पुरवासियों करके इन्द्रध्वज धारण होनेपर शत्रुवधके लिये उसके शत्रु-नगरके तरफ उस ध्वजके अग्रभागको प्रजापति (राजा) झुकावै ।।६०।। जो ध्वज बहुत शीघ्र खडा हो जाय, कांपै नहीं, माला, पिटकादि भूषण उसके न गिरे तो उसका हित-कारी होता है, इसके सिवाय और भांतिका उठाना अशुभ है। राजाके पुरोहितको चाहिये कि शांति करके सब विघ्नोंको दूर करे ।।६६।। मांसको खानेवाले पक्षी, उल्लू, कबूतर, काग, गिद्ध जो इन्द्रध्वजपर बैठें तो राजाको अत्यन्त अशांति होती है और इन्द्रध्वज पर नीलकण्ठ बैठे तो युवराजको भय कहा जाता है। बाजपक्षीका इन्द्रध्वज पर गिरना नेत्र-भयको उत्पन्न करता है ।।६२।। छत्र भंग होकर ध्वजका गिरना राजाओंकी मृत्युको प्रकट करता है जो भौंरे इन्द्रध्वजपर शहदकी मुहाल लगा दें तो तस्करोंकी मृत्यु होती है। ध्वजपर उल्का गिरे तो पुरोहितकी और वज्र गिरे तो राजाकी रानीकी मृत्यु होती है ।।६३।। पताकाके गिरनेसे रानीका नाश और पिटकके गिरनेसे सूखा पडता है। बिचला, ऊपरका और जडका भाग इन्द्रध्वजका टूट जाय तो क्रमसे मंत्री राजा और पुरवासियोंका नाश करता है ।।६४।। इसपर धूम छा जाय तो मोह होता है, वीचमेंसे टूटकर गिर जाय तो मंत्रियोंका अभाव हुआ करता है। उत्तरादि चार दिशाओंमें टूटकर गिरे तो क्रमसे ब्राह्मण, क्षत्रिय, वैश्य और शूद्रको ग्लानि उत्पन्न करता है। कुमारियां कट फट जायँ तो व्यभिचारिणी स्त्रियां मरती हैं ।।६५।। इन्द्रध्वज उठानेके समय उसके रास्ते कहीं अटक जायँ तो बालकोंको पीडा होती है। तोरणकी बगलमें रक्खे हुए काठके टूट जानेसे राजमाताको पीडा होती, बालक या दूत इन्द्रध्वजके समीप जैसी २ चेष्टा करें वैसा ही (अशुभ कार्य होनेपर) पापकर या (शुभ, कार्यमें) शुभकारी होता है ।।६६।। उठें हुए और पूजित ध्वजकी भली भांतिसे चार दिन पूजा कर पांचवें दिन प्रजाको। साथ ले राजा उस इन्द्रध्वजको विसर्ज्जन करे तो राजाकी सेनाका बल बढ़ता है ।।६७।। उपरिचरवसुराजासे चलाई हुई, फिर राजाओंके द्वारा सदा की हुई इस विधिसे जो राजा इस प्रकारसे इन्द्रध्वजकी पूजा करेंगे, वे शत्रु लोगोंसे भयको प्राप्त नहीं होंगे ।।६८।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां त्रिचत्वारिंशोऽध्यायः ।। ४३ ।।

अथ चतुश्चत्वारिंशोऽध्यायः

नीराजनम्

भगवति जलधरपक्ष्मक्षपाकरार्के क्षणे कमलनाभं। उन्मीलयर्यति तुरङ्ग-मकरिनरनीराजनं कुर्यात् ।।१।। द्वादश्यामष्टम्यां कार्तिकशुक्लस्य पंचदश्यां वा। आश्वयुजे वा कुर्यान्नीराजनसंज्ञितां शांतिम् ।।२।। नगरोत्तरपूर्वदिशि प्रशस्तभूमौ प्रशस्तदारुमयम्। षोडशहस्तोच्छ्रायं दशविपुलं तोरणं कार्यम् ।। ३ ।। सर्जोदुम्बर शाखाककुभमयं शान्तिसद्म कुशबहुलम्। वंशविनिर्मितमत्स्यध्वजचक्रालंकृतद्वारम् ।।४।। प्रतिसरया तुरंगाणां भल्लातकशालिकुष्ठसिद्धार्थान्। कण्ठेषु निबध्नीयात्

पुष्टयर्थं शान्तिगृहगानाम् ॥ ५ ॥ रविवरुणविश्वदेवप्रजेशपुरुहूतवैष्णवैर्मन्त्रैः । सप्ताहं शान्तिगृहे कुर्याच्छान्तिं तुरङ्गाणाम् ॥ ६ ॥ अभ्यर्चिता न परुषं वक्तव्या नापि ताडनीयास्ते । पुण्याहशंखतूर्यध्वनिगीतरवैर्विमुक्तभयाः ॥७॥ प्राप्तेऽष्टमेऽह्नि कुर्यादुदङ्मुखं तोरणस्य दक्षिणतः । कुशचीरावृतमाश्रममग्निं पुरतोऽस्य वेद्यां च ॥८॥ चन्दनकुष्ठसमङ्गाहरितालमनःशिलाप्रियंगुवचाः । दन्त्यमृताञ्जनरजनीसुवर्णपुष्पाग्निमन्थाश्च ॥९॥ श्वेतां सपूर्णकोशां कटम्भरात्रायमाणसहदेवीः । नागकुसुमं स्वगुप्तां शतावरीं सोमराजीं च ॥१०॥ कलशेष्वेतान् कृत्वा संभारानुपहरेद्बलिं सम्यक् । भक्ष्यैर्नानाकारैर्मधुपायसयावकप्रचुरैः ॥११॥ खदिरपलाशोदुम्बरकाश्मर्यश्वत्थनिर्मिताः समिधः । स्रुक्कनकाद्रजताद्वा कर्त्तव्या भूतिकामेन ॥१२॥ पूर्वाभिमुखः श्रीमान् वैयाघ्रे चर्मणि स्थितो राजा । तिष्ठेदनलसमीपे तुरगभिषग्दैववित्सहितः ॥१३॥ यात्रायां यदभिहितं ग्रहयज्ञविधा महेन्द्रकेतौ च । वेदी पुरोहितानललक्षणमस्मिंस्तदवधार्यम् ॥१४॥ लक्षणयुक्तं तुरगं द्विरदवरं चैव दीक्षितं स्नातम् । अहतसिताम्बरगंधस्रग्धूपार्भ्यार्चितं कृत्वा ॥१५॥ आश्रमतोरणमूलं समुपनयेत्सान्त्वयञ्छनैर्वाचा । वादित्रशंखपुण्याहनिःस्वनापूरितदिगन्तम् ॥१६॥ यद्यानीतस्तिष्ठेद्दक्षिणचरणं हयः समुत्क्षिप्य । स जयति तदा नरेन्द्रः शत्रूनचिराद्विना यत्नात् ॥१७॥ त्रस्यन्नेष्टो राज्ञः परिशेषं चेष्टितं द्विपहयानाम् । यात्रायां व्याख्यातं तदिह विचिन्त्य यथायुक्ति ॥१८॥ पिण्डमभिमंत्र्य दद्यात् पुरोहितो वाजिने स यदि जिघ्रेत् । अश्नीयाद्वा जयकृद्विपरीतोऽतोन्यथाभिहितः ॥१९॥ कलशोदकेषु शाखामाप्लाव्यौदुम्बरीं स्पृशेत्तुरगान् । शांतिकपौष्टिकमंत्रैरेवं सेनां सनृपनागाम् ॥२०॥ शांतिं राष्ट्रविवृद्ध्यै कृत्वा भूयोऽभिचारकैर्मन्त्रैः । मृण्मयमरिं विभिन्द्याच्छूलेनोरःस्थले विप्रः ॥२१ । खलिनं हयाय दद्यादभिमन्त्र्य पुरोहितस्ततो राजा । आरुह्योदक्पूर्वां यायान्नीराजितः सबलः ॥ २२ ॥ मृदङ्गशंखध्वनिहृष्टकुञ्जरस्रवन्मदामोदसुगन्धिमारुतः । शिरोमणिव्रातचलत्प्रभाचयैर्ज्वलन्विवस्वानिव तोयदात्यये ॥ २३ ॥ हंसपंक्तिभिरितस्ततोऽद्रिराट् सम्पतद्भिरिवशुक्लचामरैः । मृष्टगन्धपवनानुवाहिभिर्धूयमानरुचिरस्रगम्बरः ॥ २४ ॥ नैकवर्णमणिवज्रभूषितैर्भूषितो मुकुटकुण्डलाङ्गदैः । भूरिरत्नकिरणानुरञ्जितः शक्रकार्मुकरुचं समुद्वहन् ॥२५॥ उत्पतद्भिरिव खं तुरङ्गमैर्दारयद्भिरिव दन्तिभिर्धराम् । निर्जितारिभिरिवामरैर्नरैः शक्रवत्परिवृतो व्रजेन्नृपः ॥२६॥ सवज्रमुक्ताफलभूषणोऽथवा सितस्रगुष्णीषविलेपनाम्बरः । धृतातपत्रो गजपृष्ठमाश्रितो घनोपरीवेन्दुतले भृगोः सुतः ॥२७॥ सम्प्रहृष्टनरवाजिकुञ्जरं निर्मलप्रहरणांशुभारम् । निर्विकारमरिपक्षभीषणं यस्य सैन्यमचिरात्स गां जयेत् ॥२८॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां नीराजनविधिर्नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

बादल जिसकी आँखोंके पलक हैं, चंद्रमा सूर्य जिसके दोनों नेत्र हैं वह भगवान् कमलनाभ जब नेत्र खोलते हैं अर्थात् जागते हैं तब घोडे, हाथी और मनुष्योंको नीराजन करना चाहिये ।।१।। कातिकके शुक्लपक्षकी पूर्णिमा, द्वादशी और अष्टमीमें या आश्विन-मासमें नीराजन संज्ञाकी शांति करे ।।२।। नगरकी उत्तर पूर्वदिशामें श्रेष्ठ भूमिके ऊपर अच्छे काठका सोलह हाथ ऊंचा और दश हाथ चौडा एक तोरण बनावे ।।३।। विजय-सारका वृक्ष, गूलर और अर्जुनवृक्षके काठका शांति-ग्रह बनावे, उसमें बहुतसे कुश भी रक्खे हों। इसके द्वारमें बांसके बने हुए मत्स्य, ध्वज और चक्र लगाये जायँ ।।४।। शांति-ग्रह और सबकी पुष्टिके लिये घोडोंके गलेमें प्रतिसिरामंत्रसे भिलावा, शट्ठीके धान्य, कूठ और सरसोंका बांधना उचित है ।।५।। सूर्य; वरुण, विश्वेदेव, प्रजापति, इन्द्र और विष्णुजीके मंत्रोंसे शांतिगृहमें एक सप्ताह तक घोडोंकी शांति करे ।।६।। वे घोडे पुण्याह, शंख, भेरीध्वनि और गीतध्वनिसे भयरहित और पूजित हों, कठोर बचनसे या और किसी प्रकारसे डराये धमकाये न जावें ।।७।। जब आठवां दिन प्राप्त हो तो कुश और चीरसे ढकी हुई आश्रमकी अग्निको तोरणकी दक्षिण ओरसे उत्तरकी ओर वेदीके ऊपर स्थापन करे ।।८।। चंदन, कूठ, मंजीठ, हरिताल, मैनशिल, कंगनी, वच, अमृत, अंजन, हलदी, सुवर्ण, फूल, गनियारी ।।९।। सफेद फटकरी, पूर्णकोशा, कुटकी, त्रायमान, सह-देवी बूंटी, श्वेतवर्ण पूर्णकोष, नागकेशर, कोंच, शतावर, और सोमवल्ली ।। १० ।। यह सब वस्तु बराबर लेकर कलशोंमें डाले और बहुतसा मधु खीर, यावकादि अनेक भांति पदार्थोंके साथ भलीभांति बलि देवे ।।११।। खैर, ढाक, गूलर, गंभारी और पीपलके काठकी समिधा बनावे, संपत्ति चाहने वालेको सोने या चांदीका स्रुवा बनाना चाहिये ।।१२।। व्याघ्रके चमडेपर स्थित हो पूर्वको मुख किये श्रीमान् राजा अश्व, वैद्य और दैवज्ञ लोगोंके साथ अग्निके समीप बैठे ।।१३।। ग्रह यज्ञकी विधिमें यात्राके विषयमें और महेन्द्र केतुके विषयमें वेदी, पुरोहित और अग्निके लक्षण जो कहे हैं वे सब इस विधानमें भी जानने चाहिये ।।१४।। उत्तम लक्षणवाले हाथी, घोडेको दीक्षा देकर न्हवाय, नवीन वस्त्र पहिराय फूलोंके हार और गंध धूपादिसे पूजन करें ।।१५।। मीठे वचन कह उसको समझाते बुझाते धीरे २ अनेक प्रकारके बाजे, शंख, पुण्ययुक्त शब्दोंसे जिसकी ध्वनि दिशामें भर गई है ऐसे आश्रमतोरण मूलके समीप उठाकर लावे ।।१६।। जो लाया हुआ घोडा पहले दायाँ चरण उठाकर खडा रहे तो वह राजा शीघ्र और विना परिश्रमके शत्रुओंको जीत लेगा, परंतु अश्वके भीत होनेसे राजाको भय होता है. हाथी, घोडोंकी बाकी चेष्टाका फल जो यात्राध्यायमें कहा है सो यहां पर यथायुक्तिसे विचारना चाहिये ।।१७।।१८।। पुरोहित मंत्र पढकर अश्वको भोजन करनेके लिये पिण्ड दे और घोडा उसको सूंघ ले या आहार कर ले तो जयदायी होता है. इससे विपरीतका होना अशुभ कहा है ।।१९।। गूलरकी शाखा कलशके जलसे भिगोकर राजा और हाथियोंसे युक्त सेना और घोडोंकी शांतिके लिये पौष्टिकमंत्रसे पुरोहित या ब्राह्मण स्पर्श करे और राज्यकी वृद्धिके लिये अभिचारके मंत्र पढ बारंबार शांति करे, पुरोहितको उचित है कि मृत्तकाकी शत्रुमूर्त्ति बनाय शूलसे उसकी छातीको फाडे ।।२०।।२१।। पुरोहित मंत्र पढकर लगामको घोडेके मुखमें दे, फिर राजा उस अश्वपर सवार हो नीराजित होकर सेनाके साथ उत्तर दिशामें जाय ।।२२।। वह मृदंग, शंखध्वनि और मद झरते हुए हर्षित हाथी की मदगंध से सुगं-

धित हुई पवन के सेवन से हर्षित हो मुकुट में जडी हुई मणियों की चञ्चल कांति से बादल फट जाने पर सूर्य के समान प्रकाशमान मूर्ति धारण करके शुद्ध गंधयुक्त पवन के पीछे बहते हुए गिरनेवाले श्वेत चामर से हंसावली से शोभायमान पर्वतराज के समान कम्पायमान, सुंदरमाला और सुंदर वस्त्र पहरकर शोभित हो ।।२३।।२४।। अनेक रंग के मणि और हीरों से भूषित, मुकुट, कुण्डल और बाजु धारण किये हुए राजा उस काल में अनेक रत्नों की किरणों से रंगे हुए इन्द्रधनुष के समान सुंदर रूप धारण करके आकाश में मानो उडते हुए घोडे, धरणी के विदारण करनेवाले हाथी और शत्रुको विजय करनेवाले मनुष्योंके साथ, देवताओं से घिरे हुए इन्द्र के समान गमन करे ।।२५।।२६।। अथवा हीरा, मोती, जडी श्वेतमाला, पगडी, उबटना या चंदनादि लगाय, वस्त्र पहर, छत्र धारण कर हाथी पर सवार हो, मेघ के ऊपर चंद्रमा के नीचे विराजमान शुक्र के समान गमन करे ।।२७।। उस काल में जिसकी सेना हर्षित हो और हर्षित हाथी, घोडे और मनुष्यों से युक्त है, निर्मल अस्त्र शस्त्रों की कांतिसे प्रकाशमान है, विकाररहित और शत्रुपक्षको भय उपजानेवाली होती है वह राजा शीघ्र ही पृथ्वीको जीत लेनेमें समर्थ होता है ।।२८।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां चतुश्चत्वारिंशोऽध्यायः ।।४४।।

अथ पंचचत्वारिंशोऽध्यायः

खञ्जनदर्शनम्

खञ्जनको नामायं यो विहगस्तस्य दर्शने प्रथमे । प्रोक्तानि यानि मुनिभिः फलानि तानि प्रवक्ष्यामि ।।१।। स्थूलोऽभ्युन्नतकण्ठः कृष्णगलो भद्रकारको भद्रः । आकण्ठमुखात् कृष्णः संपूर्णः पूरयत्याशाम् ।।२।। कृष्णो गलेऽस्य बिन्दुः सितकरटान्त : स रिक्तकृद्रिक्तः । पीतो गोपीत इति क्लेशकरः खञ्जनो दृष्टः ।।३।। अथ मधुर-सुरभिफलकुसुमतरुषु सलिलाशयेषु पुण्येषु । करितुरगभुजगमूर्ध्नि प्रासादोद्यान हर्म्येषु ।।४।। गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे । हस्तितुरङ्गमशाला-च्छत्रध्वजचामराद्येषु ।। ५ ।। हेमसमीपसिताम्बरकमलोत्पलपूजितोपलिप्तेषु । दधिपात्रधान्यकूटेषु च श्रियं खञ्जनः कुरुते ।।६।। पंके स्वाद्वन्नाप्तिर्गोरससंपच्च गोमयोपगते शाद्वलगे वस्त्राप्तिः शकटस्थे देशविभ्रंशः ।।७।। गृहपटलेऽर्थभ्रंशो वध्रे बन्धोऽशुचौ भवति रोगः । पृष्ठेत्वजाविकानां प्रियसंगममावहत्याशु ।।८।। महिषोष्ट्रगर्दभास्थिश्मशानगृहकोणशर्करान्द्रिस्थः । प्रकारभस्मकेशेषु चाशुभो मरण-रुग्भयदः ।।९।। पक्षौ धुन्वन्नशुभः शुभः । पिबन् वारि निम्नगासंस्थः । सूर्योदयेऽथ शस्तो नेष्टफलः खञ्जनोऽस्तमये ।। १० ।। नीराजने निवृत्ते यया दिशा खञ्जनं नृपो यान्तम् । पश्येत्तया गतस्य क्षिप्रमरातिर्वशमुपैति ।। ११ ।। तस्मिन्निधिर्भवति मैथुनमेत यस्मिन् यस्मिंस्तु छर्दयति तत्र तलेऽस्ति काचः । अङ्गारमप्युपदिशन्ति

पुरीषणेऽस्य तत्कौतुकापनयनाय खनेद्धरित्रीम् ।। १२ ।। मृतविकलविभिन्नरोगितः स्वतनुसमानफलप्रदः खगः । धनकृदभिनिलीयमानको वियति च बन्धुसमागमप्रदः ।। १३ ।। नृपतिरपि शुभं शुभप्रदेशे खमवलोक्य महीतले विदध्यात् । सुरभिकुसुमधूपयुक्तमर्घं शुभमभिनन्दितमेवमेति वृद्धिम् ।। १४ ।। अशुभमपि विलोक्य खञ्जनं द्विजगुरुसाधुसुरार्चने रतः । न नृपतिरशुभं समाप्नुयान्न यदि दिनानि च सप्त मांसभुक् ।। १५ ।। आवर्षात् प्रथमे दर्शने फलं प्रतिदिनं तु दिनशेषे । दिक्स्थानमूर्तिलग्नर्क्षशान्तदीप्तादिभिश्चोह्यम् ।। १६ ।।

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां खञ्जनदर्शनं नाम पञ्चचत्वारिंशोऽध्यायः ।। ४५ ।।

खञ्जन नामक पक्षीके प्रथम दर्शन से जिन फलोंका होना मुनि लोगों ने कहा है वह समस्त फल इस समय कहे जाते हैं ।।१।। स्थूल कंठके, ऊचे और काले गलेवाले खञ्जनको "भद्र" कहते हैं यह खञ्जन मङ्गलकारक है और मुखसे कंठतक काला हो तो इसका "संपूर्ण" नाम है। यह आशा का संपूर्ण करनेवाला खञ्जन होता है ।। २ ।। जिसके गलेमें काले बिन्दुके अंतपर सफेदी और कुसुम्भी रंग है उसको "रिक्त" कहते हैं, इसका फल निष्फल होता है, पीले रंग का खञ्जन "गोपीत" नामवाला है, इसका दर्शन क्लेशदायी है ।।३।। मधुर सुगन्धित फल और कुसुम युक्त वृक्ष, पवित्र जलाशय, हाथी, घोडे और सर्पों के मस्तक, महल, फुलवाडियें, अटारियें, गोठ, श्रेष्ठ समागम, यज्ञ, उत्सवगृह, राजा और द्विजातियों के निकट रहना, हस्तिशाला, अश्वशाला, छत्र, ध्वज और चामर, सुवर्ण, श्वेत वस्त्र, पद्म, उत्पल, पूजित और गोबर आदि से लिपे हुए स्थान, दहीके पात्र और धान्य के ढेरपर जो खञ्जन दिखाई दे तो लक्ष्मी की प्राप्ति होती है ।।४।।५।।६।। कीचड में खञ्जन बैठा हो तो स्वादिष्ट अन्न मिलता है, गोबर पर बैठा हो तो दुग्ध सम्पत्ति, हरी दूबपर बैठा हो तो वस्त्र की प्राप्ति और शकट पर स्थित हो तो देश का नाश होता है ।।७।। घर की छत्त पर जब खञ्जन बैठा हो तो धनका नाश होता है, छिद्रपर बैठा हो तो बंधन और अपवित्रस्थानमें दिखाई देनेसे रोग होता है, बकरी भेडादिके पलनेके स्थानपर बैठा हो तो शीघ्र प्रिय मनुष्यसे मिलाप हो ।।८।। भैंस, ऊंट, गधा, हड्डी, श्मशान, घरका कोना, शर्करा, पर्वत, प्राकार, भस्म और केशमें स्थित हो तो अशुभकारी और मरणभयदायी है ।।९।। दोनों पंखोंका फटकानेवाला खञ्जन अशुभकारी होता है, नदीमें जल पीता हुआ हो तो शुभकारी है । सूर्योदयके कालमें खञ्जनका दर्शन श्रेष्ठ है और अस्त समयमें वांछित फलकी प्राप्ति नहीं होती है ।।१०।। नीराजन हो जानेपर जिस दिशाके मुखसे सन्मुख गमन करता हुआ खञ्जन दिखाई दे और राजा उस दिशाकी ओर जाय तो शीघ्र ही उसके शत्रु उसके वशमें हो जाते हैं ।।११।। जिस स्थानमें खञ्जन मैथुन करता है वहां पर निधिकी प्राप्ति होती है, जहांपर खञ्जन वमन करे उस पृथ्वीके तले कांच रहता है, जहांपर विष्ठा त्याग करे वहां उसके नीचे कोयला रहता है । इस कोतुककी जाँच करनेके लिये पृथ्वीको खोदना चाहिये ।।१२।। मृतक, विकल अलग प्रकारका या रोगयुक्त खञ्जन पक्षी अपने शरीरके

अनुसार फल दिया करता है, आकाशमें उडता हुआ दिखाई देनेसे धनकारी और भाई बंधुसे मिलापका करनेवाला होता है ।।१३।। राजा भी शुभ देशमें शुभ खञ्जनको देखकर सुगन्धित फूल और धूपयुक्त शुभ वन्दन करनेके योग्य अर्घ्य पृथ्वीपर दे तो समस्त मङ्गलकी वृद्धि होवे ।।१४।। द्विज, गुरु, साधु और देवताओंके पूजनमें रत राजा अशुभ खञ्जन देखकर भी जो एक सप्ताहतक मांसका भोजन नहीं करते, उनको अशुभ फलकी प्राप्ति नहीं होती ।।१५।। खञ्जनके प्रथम दर्शनका फल एक वर्षमें होता है, परंतु जो इस समयके बीचमें फिर खञ्जनका दर्शन हो तो उसी दिन सूर्यास्त होनेतक उसका फल मिल जाता है परंतु पंडित लोग खञ्जनके देखनेके संबंधमें, समस्त फलाफल, स्थान, मूर्ति लग्न, नक्षत्र और शांति दीप्तादि दिशा आदि जानकर निर्णय करे ।।१६।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां पंचचत्वारिंशोऽध्यायः ।।४५।।

अथ षट्चत्वारिंशोध्यायः

उत्पातलक्षणम्

यानत्रेरुत्पातान् गर्गः प्रोवाच तानहं वक्ष्ये । तेषां संक्षेपोऽयं प्रकृतेरन्यत्वमुत्पातः ।। १ ।। अपचारेण नराणामुपसर्गः पापसञ्चयाद्भवति । संसूचयन्ति दिव्यान्तरिक्षभौमास्तदुत्पाताः ।। २ ।। मनुजानामपचारादपरक्ता देवताः सृजन्त्येतान् । तत्प्रतिघाताय नृपःशान्तिं राष्ट्रे प्रयुञ्जीत ।। ३ ।। दिव्यं ग्रहर्क्षवैकृतमुल्कानिर्घातपवनपरिवेषाः । गन्धर्वपुरपुरन्दरचापादि यदान्तरिक्षं तत् ।। ४ ।। भौमं चरस्थिरभवं तच्छान्तिभिराहतं शममुपैति । नाभसमुपैति मृदुतां शाम्यति नो दिव्यमित्येके ।। ५ ।। दिव्यमपि शममुपैति प्रभूतकनकान्नगोमहीदानैः । रुद्रायतने भूमौ गोदोहात् कोटिहोमाच्च ।। ६ ।। आत्मसुतकोशवाहनपुरोहितेषु लोकेषु । पाकमुपयाति दैवं परिकल्पितमष्टधा नृपतेः ।।७।। अनिमित्तभङ्गचलनस्वेदाश्रुनिपातजल्पनाद्यानि । लिङ्गार्चायतनानां नाशाय नरेशदेशानाम् ।। ८ ।। दैवतयात्राशकटाक्षचक्रयुगकेतुभङ्गपतनानि । सम्पर्यासनसादनसङ्गाश्च न देशनृपशुभदाः ।।९।। ऋषिधर्मपितृब्रह्मप्रोद्भूतं वैकृतं द्विजातीनाम् । यद्रुद्रलोकपालोद्भवं पशूनामनिष्टं तत् ।। १० ।। गुरुसितशनैश्चरोत्थं पुरोधसां विष्णुजं च लोकानाम् । स्कन्दविशाखसमुत्थं माण्डलिकानां नरेन्द्राणाम् ।। ११ ।। वेदव्यासे मन्त्रिणि विनायके वैकृतं चमूनाथे । धातरि सविश्वकर्मणि लोकाभावाय निर्दिष्टम् ।। १२ ।। देवकुमारकुमारीवनिताप्रेष्येषु वैकृतं यत्स्यात् । तन्नरपतेः कुमारककुमारिकास्त्रीपरिजनानाम् ।। १३ ।। रक्षःपिशाचगुह्यकनागानामेतदेव निर्देश्यम् । मासैश्चाप्यष्टाभिः सर्वेषामेव फलपाकः ।। १४ ।। बुद्ध्वाः देवविकारं शुचिः पुरोधास्त्र्यहोषितः स्नातः । स्नानकुसुमानुलेपनवस्त्रैरभ्यर्चयेत् प्रतिमाम्

।। १५ ।। मधुपर्केण पुरोधा भक्ष्यैर्बलिभिश्च विधिवदुपतिष्ठेत् । स्थालीपाकं जुहयाद्विधिवन्मन्त्रैश्च तल्लिङ्गैः ।। १६ ।। इति विबुधविकारे शान्तयःसप्तरात्रं द्विजविबुधगणार्चा गीतनृत्योत्सवाश्च । विधिवदवनिपालैर्यैः प्रयुक्ता न तेषां भवति दुरितपाको दक्षिणाभिश्च रुद्धः ।।१७।। इति लिङ्गवैकृतम् । राष्ट्रे यस्यानग्निः प्रदीप्यते दीप्यते च नेन्धनवान् । मनुजेश्वरस्य पीडा तस्य सराष्ट्रस्य विज्ञेयाः ।।१८।। जलमांसार्द्रज्वलने नृपतिवधःप्रहरणे रणो रौद्रः । सैन्यग्रामपुरेषु च नाशो वह्नेर्भयं कुरुते ।। १९ ।। प्रासादभवनतोरणकेत्वादिष्वनलेन दग्धेषु । तडिता वा षण्मासात् परचक्रस्यागमो नियमात् ।।२०।। धूमोऽनग्निसमुत्थो रजस्तमश्चाह्निजं महाभयदम् । व्यभ्रे निश्युडुनाशो दर्शनमपि चाह्नि दोषकरम् ।। २१ ।। नगर-चतुष्पादाण्डजमनुजानां भयङ्करं ज्वलनमाहुः । धूमाग्निविस्फुलिङ्गैः शय्याम्बर-केशगैर्मृत्युः ।।२२।। आयुधज्वलनसर्पणस्वनाः कोशनिर्गमनवेपनानि वा । वैकृतानि यदि वायुधेऽपराण्याशु रौद्ररणसंकुलं वदेत् ।। २३ ।। मन्त्रैर्वाह्नैः क्षीरवृक्षात्समि-द्भिर्होतव्योऽग्निः सर्षपैः सर्पिषा च । अग्न्यादीनां वैकृते शान्तिरेवं देयं चास्मिन् काञ्चनं ब्राह्मणेभ्यः ।। २४ ।। इत्यग्निवैकृतम् । शाखाभङ्गेऽकस्माद्वृक्षाणां निर्दि-शेद्रणोद्योगम् । हसने देशभ्रंशं रुदिते च व्याधिबाहुल्यम् ।।२५।। राष्ट्रविभेदस्त्वनृतौ बालवधोऽतीव कुसुमिते बाले । वृक्षात् क्षीरस्रावे सर्वद्रव्यक्षयो भवति ।। २६ ।। मद्ये वाहननाशः संग्रामः शोणिते मधुनि रोगः । स्नेहे दुर्भिक्षभयं महद्भयं निःसृते सलिले ।। २७ ।। शुष्कविरोहे वीर्यान्नसंक्षयः शोषणे च विरुजानाम् । पतिताना-मुत्थाने स्वयं भयं दैवजनितं च ।। २८ ।। पूजितवृक्षे ह्यनृतौ कुसुमफलं नृप-वधाय निर्दिष्टम् । धूमस्तस्मिन् ज्वालाथवा भवेन्नृपवधायैव ।। २९ ।। सर्पत्सु तरुषु जल्पत्सु वापि जनसंक्षयो विनिर्दिष्टः । वृक्षाणां वैकृत्ये दशभिर्मासैः फल-विपाकः ।। ३० ।। स्रग्गन्धधूपाम्बरपूजितस्य च्छत्रं निधायोपरिपादपस्य । कृत्वा शिवं रुद्रजपोऽत्र कार्यो रुद्रेभ्य इत्यत्र षडङ्गहोमः ।। ३१ ।। पायसेन मधुना च भोजयेद् ब्राह्मणान् घृतयुतेन भूपतिः । मेदिनी निगदितात्र दक्षिणा वैकृते तरुकृते महर्षिभिः ।। ३२ ।। इति वृक्षवैकृतम् । नालेऽब्जयवादीनामेकस्मिन् द्वित्रिसम्भवो मरणम् । कथयति तदधिपतीनां यमलं जातं कुसुमफलम् ।। ३३ ।। अतिवृद्धिः सस्यानां नानाफल-कुसुमभवो वृक्षे भवति हि यद्येकस्मिन् परचक्रागमो नियमात् ।।३४।। अर्धेन यदा तैलं भवति तिलानामतैलता वा स्यात् । अन्नस्य च वैरस्यं तदा च विद्याद्भयं सुमहत् ।।३५।। विकृतकुसुमं फलं वा ग्रामादथवा पुराद्बहिः कार्यम् । सौम्योऽत्र चरुः कार्यो निर्वाप्यो वा पशुः शान्त्यै ।। ३६ ।। सस्ये च दृष्ट्वा विकृतिं प्रदेयं तत् क्षेत्रमेव प्रथमं द्विजेभ्यः । तस्यैव मध्ये चरुमत्र भौमं कृत्वा न दोषान् समुपैति

तज्जान् ॥ ३७ ॥ इति सस्यवैकृतम् । दुर्भिक्षमनावृष्टयामतिवृष्टयां क्षुद्भयं सपरचक्रम् । रोगो ह्यनृतुभवायां नृपवधोऽनभ्रजातायाम् ॥ ३८ ॥ शीतोष्णविपर्यासे नो सम्यगृतुषु च सम्प्रवृत्तेषु । षण्मासाद्राष्ट्रभयं रोगभयं दैवजनितं च ॥ ३९ ॥ अन्यर्तौ सप्ताहं प्रबन्धवर्षे प्रधाननृपमरणम् । रक्ते शस्त्रोद्योगो मांसास्थिवसादिभिर्मरकः ॥४०॥ धान्यहिरण्यत्वक्फलकुसुमाद्यैर्वर्षितैर्भयं विद्यात् । अङ्गारपांशुवर्षे विनाशमायाति तन्नगरम् ॥ ४१ ॥ उपला विना जलधरैर्विकृता वा प्राणिनो यदा वृष्टाः । छिद्रं वाप्यतिवृष्टौ सस्यानामीतिसञ्जननम् ॥ ४२ ॥ क्षीरघृतक्षौद्राणां दध्नो रुधिरोष्णवारिणां वर्षे । देशविनाशो ज्ञेयोऽसृग्वर्षे चापि नृपयुद्धम् ॥ ४३ ॥ यद्यमलेऽर्कच्छाया न दृश्यते दृश्यते प्रतीपा वा । देशस्य तदा सुमहद्भयमायातं विनिर्देश्यम् ॥ ४४ ॥ व्यभ्रे नभसीन्द्रधनुर्दिवा यदा दृश्यतेऽथवा रात्रौ । प्राच्यामपरस्यां वा तदा भवेत् क्षुद्भयं सुमहत् ॥ ४५ ॥ सूर्येन्दुपर्जन्यसमीरणानां योगः स्मृतो वृष्टिविकारकाले । धान्यान्नगोकाञ्चनदक्षिणाश्च देयास्ततः शान्तिमुपैति पापम् ॥ ४६ ॥ इति वृष्टिवैकृतम् । अपसर्पणं नदीनां नगरादचिरेण शून्यतां कुरुते । शोषश्चाशोष्याणामन्येषां वा ह्रदादीनाम् ॥ ४७ ॥ स्नेहासृङ्मांसवहाः संकुलकलुषाः प्रतीपगाश्चापि । परचक्रस्यागमनं नद्यः कथयन्ति षण्मासात् ॥ ४८ ॥ ज्वालाधूमक्वाथा रुदितोत्क्रुष्टानि चैव कूपानाम् । गीतप्रजल्पितानि च जनमरकाय प्रदिष्टानि ॥ ४९ ॥ तोयोत्पत्तिरखाते गन्धरसविपर्यये च तोयानाम् । सलिलाशयविकृतौ वा महद्भयं तत्र शान्तिरियम् ॥ ५० ॥ सलिलविकारे कुर्यात् पूजां वरुणस्य वारुणैर्मन्त्रैः । तैरेव च जपहोमं शममेवं पापमुपयाति ॥ ५१ ॥ इति जलवैकृतम् । प्रसवविकारे स्त्रीणां द्वित्रिचतुःप्रभृतिसम्प्रसूतौ वा । हीनातिरिक्तकाले च देशकुलसंक्षयो भवति ॥ ५२ ॥ वडवोष्ट्रमहिषगोहस्तिनीषु यमलोद्भवे मरणमेषाम् । षण्मासात्सूतिफलं शान्तौ श्लोकौ च गर्गोक्तौ ॥ ५३ ॥ नार्यः परस्य विषये त्यक्तव्यास्ता हितार्थिना । तर्पयेच्च द्विजान् कामः शांतिं चैवात्र कारयेत् ॥ ५४ ॥ चतुष्पदाः स्वयूथेभ्यस्त्यक्तव्याः परभूमिषु । नगरं स्वामिनं यूथमन्यथा हि विनाशयेत् ॥ ५५ ॥ इति प्रसववैकृतम् । परयोनावभिगमनं भवति तिरश्चामसाधु धेनूनाम् । उक्षाणौ वान्योऽन्यं पिबति श्वा वा सुरभिपुत्रम् ॥ ५६ ॥ मासत्रयेण विद्यात् तस्मिन्निःसंशयं परागमनम् । तत्प्रतिघातायैतो श्लोकौ गर्गेण निर्दिष्टौ ॥ ५७ ॥ त्यागो विवासनं दानं तत्तस्याशु शुभं भवेत् । तर्पयेद्ब्राह्मणांश्चात्र जपहोमांश्च कारयेत् ॥ ५८ ॥ स्थालीपाकेन धातारं पशुना च पुरोहितः । प्राजापत्येन मन्त्रेण यजेद्बह्वन्नदक्षिणाम् ॥ ५९ ॥ इति चतुष्पदवैकृतम् । यानं वाहवियुक्तं यदि गच्छेन्न व्रजेच्च वाहयुतम् । राष्ट्रभयं भवति तदा चक्राणां सादभङ्गं च ॥६०॥ अनभिहततूर्यनादः

शब्दो वा ताडितेषु यदि न स्यात् । व्युत्पत्तौ वा तेषां परागमो नृपतिमरणं वा ।। ६१ ।। गीतरवतूर्यनादा नभसि यदा वा चरस्थिरान्यत्वम् । मृत्युस्तदा गदा वा विस्वरतूर्ये पराभिभवः ।। ६२ ।। गोलांगूलयोः सङ्गे दर्वीशूर्पाद्युपस्करविकारे । क्रोष्टुकनादे च तथा शस्त्रभयं मुनिवचश्चेदम् ।। ६३ ।। वायव्ययेष्वेषु नृपतिर्वायुं सक्तुभिरर्चयेत् । आ वायोरिति पञ्चर्चो जाप्याश्च प्रयतैर्द्विजैः ।। ६४ ।। ब्राह्मणान् परमान्नेन दक्षिणाभिश्च तर्पयेत् । बह्वन्नदक्षिणा होमाः कर्तव्याश्च प्रयत्नतः ।। ६५ ।। इति वायव्यवैकृतम् । पुरपक्षिणो वनचरा वन्या वा निर्भया विशन्ति पुरम् । नक्तं वा दिवसचराः क्षपाचरा वा चरन्त्यहनि ।। ६६ ।। सन्ध्याद्वयेऽपि मण्डलमाबध्नन्तो मृगा विहङ्गा वा । दीप्तायां दिश्यथवा क्रोशन्तः संहता भयदा ।। ६७ ।। श्वानः प्ररुदन्त इव द्वारे वसन्ति जम्बुका दीप्ताः । प्रविशेन्नरेंद्र भवने कपोतकःकौशिको यदि वा ।।६८।। कुक्कुटरुतं प्रदोषे हेमन्तादौ च कोकिलालापाः । प्रतिलोममण्डलचराः श्वेनाद्याश्चाम्बरे भयदाः ।। ६९ ।। गृहचैत्यतोरणेषु द्वारेषु च पक्षिसंघसम्पाताः । मधुवल्मीकाम्भोरुहसमुद्भवाश्चापि नाशाय ।।७०।। श्वभिरस्थिशवावयवप्रवेशनं मन्दिरेषु मरकाय । पशुशस्त्रव्याहारे नृपमृत्युर्मुनिवचश्चेदम् ।। ७१ ।। मृगपक्षिविकारेषु कुर्याद्धोमान् सदक्षिणान् । देवाः कपोत इति च जप्तव्याः पञ्चभिर्द्विजैः ।।७२।। सुदेवा इति चैकेन देया गावश्च दक्षिणा । जपेच्छाकुनसूक्तं वा मनोवेदशिरांसि च ।। ७३ ।। इति मृगपक्ष्यादिवैकृतम् । शक्रध्वजेन्द्रकीलस्तम्भद्वारप्रतापभङ्गेषु । तद्वत्कपाटतोरणकेतूनां नरपतेर्मरणम् ।। ७४ ।। सन्ध्याद्वयस्य दीप्तिर्धूमोत्पत्तिश्च काननेऽनग्नौ । छिद्राभावे भूमेर्दरणं कम्पश्च भयकारी ।। ७५ ।। पाषण्डानां नास्तिकानां च भवतः साध्वाचारप्रोज्झितः क्रोधशीलः । ईर्ष्युः क्रूरो विग्रहावततचेता यस्मिन् राजा तस्य देशस्य नाशः ।।७६।। प्रहर हर छिन्दि भिन्धीत्यायुधकाष्ठाश्मपाणयो बालाः । निगदन्तः प्रहरन्ते तत्रापि भयं भवत्याशु ।। ७७ ।। अङ्गारगैरिकाद्यैर्विकृतेप्रताभिलेखनं यस्मिन् । नायकचित्रितमथवा क्षये क्षयं याति न चिरेण ।। ७८ ।। लूतापटाङ्गशबलं न सन्ध्ययोः पूजितं कलहयुवतम् । नित्योच्छिष्टस्त्रीकं च यद्गृहं तत् क्षयं याति ।। ७९ ।। दृष्टेषु यातुधानेषु निर्दिशेन्मरकमाशु सम्प्राप्तम् । प्रतिघातायैतेषां गर्गः शान्ति चकारेमाम् ।। ८० ।। महाशान्त्योऽथ बलयो भोज्यानि सुमहान्ति च । कारयेत महेन्द्रं च माहेन्द्रीभिः समर्चयेत् ।। ८१ ।। इति शक्रध्वजेन्द्रकीलादिवैकृतम् । नरपतिदेशविनाशे केतोरुदयेऽथवा ग्रहेऽर्केन्द्वोः । उत्पातानां प्रभवःस्वर्तुभवश्चाप्यदोषाय ।। ८२ ।। ये च न दोषान् जनयन्त्युत्पातास्तानृतुस्वभावकृतान् । ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तः ।। ८३ ।। वज्राशनिमहीकम्पसन्ध्यानिर्घातनिःस्वनाः । परिवेषरजोधूमरक्तार्कास्त-

मनोदयाः ।। ८४ ।। द्रुमेभ्योऽन्नरसस्नेहबहुपुष्पफलोद्गमाः । गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे ।। ८५ ।। तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम् । अनग्निज्वलनस्फोटधूमरेण्वनिलाहतम् ।। ८६ ।। रक्तपद्मारुणं सान्ध्यं नभःक्षुब्धार्णवोपमम् । सरितांचाम्बु संशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् : ।।८७।। शक्रायुधपरिवेषविद्युच्छुष्कविरोहणम् । कम्पोद्वर्तनवैकृत्यं रसनं दरणं क्षितेः ।। ८८ ।। सरोनद्युदपानानां वृद्धचर्ध्वतरणप्लवाः सरणं चाद्रिगेहानां वर्षासु न भयावहम्।।८९।। दिव्यस्त्रीभूतगन्धर्वविमानाद्भुतदर्शनम् । ग्रहनक्षत्रताराणां दर्शनं च दिवाम्बरे ।। ९० ।। गीतवादित्रनिर्घोषा वनपर्वतसानुषु । सस्यवृद्धिरपां हानिरपापाः शरदि स्मृताः ।। ९१ ।। शीतानिलतुषारत्वं नर्दनं मृगपक्षिणाम् । रक्षोयक्षादिसत्वानां दर्शनं वागमानुषी ।। ९२ ।। दिशो धूमान्धकारा च सनभोवनपर्वताः । उच्चः सूर्योदयास्तौ च हेमन्ते शोभनाः स्मृताः ।। ९३ ।। हिमपातानिलोत्पाता विरूपाद्भुतदर्शनम् । कृष्णाञ्जनाभमाकाशं तारोल्कापातपिञ्जरम् ।। ९४ । चित्रगर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिषु । पत्रांकुरलतानां च विकाराः शिशिरे शुभाः ।। ९५ ।। ऋतुस्वभावजा ह्येते दृष्टाः स्वर्तौ शुभप्रदाः । ऋतोरन्यत्र चोत्पाता दृष्टास्ते भृशदारुणाः ।। ९६ ।। उन्मत्तानां गीतगाथाः शिशूनां भाषितं च यत् । स्त्रियो यच्च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः ।। ९७ ।। पूर्वं चरति देवेषु पश्चाद्गच्छति मानुषान् । नाचोदिता वाग्वदति सत्या ह्येषा सरस्वती ।। ९८ ।। उत्पातान् गणितविवर्जितोऽपि बुद्धा विख्यातो भवन्ति नरेन्द्रवल्लभश्च । एतत्तन्मुनिवचनं रहस्यमुक्तं यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी ।। ९९ ।।

इति श्रीवराहमिहिरकृतौ बृहत्संहितायामुत्पातलक्षणं नाम षट्चत्वारिंशोऽध्यायः ।। ४६ ।।

महर्षि गर्गजीने जिन उत्पातोंका वर्णन अत्रिजीसे किया है, इस समय उन्हीं उत्पातोंका, वर्णन यहांपर किया जाता है. स्वभावसे विपरीत होना ही उत्पात है. यही इसका संक्षेप अर्थ है ।।१।। मनुष्योंके अहिताचरण करनेसे जो पाप इकट्ठा होता है, उससे ही उपद्रव होता है। दिव्य अंतरिक्ष और समस्त भौम उत्पात उनकी भली भांतिसे सूचना करते हैं ।।२।। मनुष्योंके अव्यवहार करनेसे देवतालोग अप्रसन्न होकर इन उत्पातोंको उत्पन्न किया करते हैं उन उत्पातोंके दूर करनेके लिये राजाको अपने राज्यमें शांतिका कराना उचित है ।।३।। यहाँ नक्षत्रोंका विकार, उल्का, निर्घात, पवन और घेरा दिव्य उत्पात हैं, गधर्व पुरक इन्द्रधनुषादि अंतरिक्ष उत्पात कहे जाते है ।।४।। चर (चलायमान) व स्थिर (अचल) आदि पदार्थोंसे उत्पन्न हुए उत्पात भौम नाम से ख्यात है यह उत्पात शान्तिसे टकराये जाकर दूर हो जाते हैं. कोई कहते हैं कि आंतरिक्ष उत्पात शांति कर देनेसे हलके हो जाते हैं और दिव्य उत्पात कभी दूर नहीं होते ।।५।। परंतु शिवालयकी

भूमिमें गोदोहन और कोटि होम करनेसे, बहुतसा सुवर्ण, अन्न, गौ और पृथ्वीका दान करनेसे दिव्य उत्पात भी शांत हो जातें हैं ॥६॥ राजा अपनी देह, पुत्र, खजाना, सवारियें, पुर, स्त्री, पुरोहित और सब लोकमें आठ प्रकारसे कहे हुए दैव उत्पात पाकको प्राप्त होते हैं ॥७॥ शिवलिंग, देवताकी प्रतिमा या पवित्र गृहका अनिमित्त भंग होना, चलायमान होना, पसीना आना, आंसू गिरना और जल्पना आदि हो तो राजा और देशका नाश हो जाता है ॥८॥ जो देवतालोगोंकी यात्राके समय शकट, गाडीकी धुरी, पहिया, जुआ, इन्द्रध्वज टूट जाय या गिर पडे, उलट जाय, चिपट जाय, नाशको प्राप्त हो जाय या किसीसे मेल खा जाय तो देश और राजाका कल्याण नहीं होता ॥९॥ ऋषि, धर्मपिता और ब्रह्मासे उत्पन्न हुई विकृति द्विजाति, रुद्र व लोकपालोंसे उत्पन्न हुआ विकार पशुओंको अनिष्ट करनेवाला है ॥१०॥ बृहस्पति, शुक्र और शनिग्रहसे उत्पन्न हुए उत्पात पुरोहितका, विष्णुजीसे उत्पन्न हुए उत्पान सब लोकोंका स्कन्द और विशाखसे उत्पन्न हुए उत्पात मंडलीक राजाओंका अनभल करते हैं ॥११॥ वेदव्याससे उत्पन्न हुए उत्पात मंत्री, गणेशजीसे उत्पन्न हुए उत्पात सेनापति, विश्वकर्मा और धातासे उत्पन्न हुए उत्पात प्रजाका नाश करते हैं ॥१२॥ देवकुमार, देवकुमारी, देववनिता और देवदूतोंसे जो विकार होतें हैं सो राजकुमार, कुमारिका, स्त्री और परिजनोंके ऊपर फलते हैं और यक्ष, पिशाच गुह्यक व नागोंके उत्पात अनिष्टकारक होते हैं. आठ मासमें इन सब उत्पातोंका फल पकता है ऐसा कहा है ॥१३॥१४॥ पुरोहित देवविकारको जानकर तीन रात तक उपवास करके न्हाय धोय पवित्र होकर स्नानीय, फूल, अनुलेपन और वस्त्रसे प्रतिमाकी पूजा करे, मधुपर्क, भक्ष्य और पूजाके उपहारसे विविवत् पूजा करे और तिस लिंगके मंत्रसे विधिविधानपूर्वक स्थालीपाक और होम करे ॥१५॥१६॥ जिन राजाओं करके इस देवविकारमें ब्राह्मण और देवताओंकी पूजा, गीत, नाचका उत्सव और दक्षिणायुक्त शांति सात रात्रितक होती है उनके लिये इस पापका पाक रुक जाता है ॥ १७ ॥ इति लिंगवैकृत। जिस राज्यमें विना ही अग्निके द्रव्य जल जाय और इंधनयुक्त आग नहीं जले उस राज्यके राजाको पीडा होगी यह जानना चाहिये ॥१८॥ जल, मांस और गीले द्रव्यके जलनेसे राजाओंका वध होता है, शस्त्र चिह्नसे प्रचण्ड युद्ध और सेना ग्राम व पुरोंमें अग्निके नाशसे भय होता है ॥१९॥ प्रासाद, भवन, तोरण, केतु आदि अनल या बिजलीसे दग्ध हो जानेपर नियमके वशसे छ. मासमें वहांपर दूसरे राजाका राज्य होता है ॥ २० ॥ विना आगके धूमका निकलना, दिनमें धूरिका बरसना और अंधकार महाभयदायी होता है। रात्रिके समय मेघहीन आकाशमें नक्षत्रका नाश या दिनमें नक्षत्रका दर्शन दोषकारी है ॥ २१ ॥ जो अग्नि भयंकर हो तो नगर, चौपाये, अंडज और मनुष्योंके लिये भयंकर कहा जाता है सेज, अम्बर और बालोंमें गया हुआ धूम व अग्निकी चिनगारियोंसे मृत्यु ही प्रकट होती है ॥२२॥ सब अस्त्र शस्त्रोंका जलना, उनमेंसे शब्दका होना या म्यानसे निकल आना, कांपना अथवा जो और विकार शस्त्रोंमें देखे जायँ तो शीघ्र ही राज्यमें प्रचंड रण होता है ॥२३॥ दुधारे वृक्षोंसे उत्पन्न हुई समिध, सरसों और घृतसे वह्निमंत्रके द्वारा होम करे और इसमें ब्राह्मणोंको सुवर्णका दान करे। बस इससे ही अग्निविकृतिकी शांति हो जाती है ॥२४॥ इति अग्निवैकृत। अचानक वृक्षोंकी शाखा टूट जानेसे रणकी तैयारियाँ होती हैं ॥ वृक्षोंके हँसनेसे देशका ध्वंस और रुदन करनेसे रोगकी

अधिकाई होती है ।।२५।। अनऋतुमें फूलादिके फूलनेसे राज्यमें भेद पड जाता है, छोटे वृक्षोंके अत्यन्त फूलनेसे बालकका वध और वृक्षोंसे दूध निकलनेपर सब द्रव्योंका क्षय हो जाता है ।।२६।। वृक्षसे मद्य निकले तो वाहनोंका नाश, रुधिरके निकलनेसे संग्राम, शहदके निकलनेसे रोग, तेलके निकलनेसे दुर्भिक्षका भय और जल निकलनेसे महाभय होता है ।।२७।। अंकुर सूख जानेसे वीर्य और अन्नका भली भांतिसे क्षय होता है। रोगहीन वृक्ष विना कारणके सूख जायँ तो भी सेनाका और अन्नका क्षय होता है । आप ही वृक्ष खडे होकर उठ बैठे तो देवका भय होता है ।।२८।। प्रसिद्ध वृक्षमें कुऋतुमें फूलका आना राजाके वधका कारण कहा जाता है और इसमें ज्वाला (शिखा) अथवा धुएंके रहनेसे भी राजाके वधका कारण होगा ।।२९।। वृक्ष चलने लगें या कुछ बोलनेकेसा शब्द करने लगें तो भली भांतिसे मनुष्योंका क्षय होता है वृक्षोंके विकारका फल दश मासमें पकता है ।।३०।। माला, गंध, धूप और वस्त्र द्वारा वृक्षकी पूजा करके उसके ऊपर छत्र धारण करे। शिव बनाकर रुद्रका जप और "रुद्रेभ्य." इत्यादि मंत्रसे षडङ्ग होम करे ।।३१।। वृक्षोंमें विकार प्राप्त होनेपर राजाको उचित है कि घृतयुक्त पायस (खीर) और मधुसे ब्राह्मणका भोजन करावे और दक्षिणामें भूमिका दान करे. इस प्रकारकी विधि महर्षियोंने कही है ।।३२।। इति वृक्षवैकृत। कमल और जो आदिके एक नालमें दो या तीन बालकी उत्पत्ति या दो फूल या दो फलोंके उत्पन्न होनेसे उनके स्वामीका मरण प्रगट होता है ।।३३।। धान्यकी अतिवृद्धि हो और एक वृक्षमें अनेक प्रकारके फल फूल लगें तो नियमके वशसे निश्चय ही शत्रुकी सेना उस देशमें आवेगी ।।३४।। जब तिलवे आधे भागमें तेल हो या तिलमेंसे तेल न निकले तो अन्नकी विरसतासे बडा भारी भारी भय आ पडता है ।।३५।। विकारको प्राप्त हुए फूल या फलको गाम या पुरके वाहिर कर देना उचित है. इसकी शान्तिमें साम्य नामक चरु करे और पशु अर्थात् बकरा-भी शांतिके लिये देवे ।।३६।। जो खेती में विकार दिखाई दे तो प्रथम वह खेत ही ब्राह्मणोंको दान करे फिर उसमें भूमिदेवताका चरु करनेसे उससे उत्पन्न हुए दोष फिर नहीं हो सकते ।।३७।। इति सस्यवैकृत। अनावृष्टिसे दुर्भिक्ष, अतिवृष्टिसे पराई सेनाका आना और क्षुधाका भय, अनऋतुमें वर्षाके होनेसे रोग और विना मेघके वर्षनेसे राजाका वध होता है ।।३८।। शीत और ग्रीष्ममें अदल बदल होनेसे, सब ऋतुओंको वर्त्ताव भली भांति न होनेसे छः मासतक दैवभय, राज्यभय और रोगभय हुआ करता है ।।३९।। अनऋतुमें बराबर एक सप्ताहतक वर्षा होनेसे मुख्य राजाकी मृत्यु होती है, रुधिरकी वर्षा होनेसे शस्त्रका उद्योग और मांस, हड्डी, चर्बी आदिकी वर्षा होनेसे मरी पडती है ।।४०।। धान्य, सुवर्ण, छाल, फल और फूलादिकी वर्षा होनेसे भय होता है. जिस नगरमें कोयले और धूरिकी वर्षा हो उस नगरका नाश हो जाता है ।।४१।। बिना बादलके ओलोंका गिरना, गधे, ऊंट, बिलाव, गीदड आदि प्राणियोंका विकारयुक्त दिखाई देना अथवा अतिवृष्टिमें छिद्र (कहीं वर्षा हो कहीं न हो) ऐसा हो तो खेतीके लिये टीडी आदि भय उत्पन्न होते हैं ।।४२।। दूध, घी, शहद या गरम जलके वर्षनेसे देशका नाश और रुधिरकी वर्षा होनेसे राजाओंमें युद्ध हुआ करता है ।।४३।। जो निर्मल सूर्यमें छाया दिखाई न दे अथवा विपरीत छाया दिखाई दे तो कहना चाहिये कि देशमें महाभय होगा ।।४०।। जब दिन या रात्रिके समय मेघहीन आकाशमें पूर्व या पश्चिम दिशामें इन्द्रधनुष

दिखाई दे तो भारी दुर्भिक्ष पडता है ॥४५॥ वृष्टि विकारके कालमें सूर्य, चंद्रमा और पवनका यज्ञ करे उस समय धान्य, अन्न, गौ और सुवर्णकी दक्षिणा देनेसे पापकी शांति होगी ॥४६॥ इति वृष्टिवैकृत। जो नदियाँ नगरके नीचे बहतीं हों और वह नगरोंको छोडकर सरक जायँ या नगरके न सूखनेवाले स्थान कुंड इत्यादि सूख जायँ तो शीघ्र ही नगर सूना हो जाता है ॥४७॥ जो तेल, रुधिर या मांस नदियोंमें बहता हो, जल मलीन हो जाय, या उलटी बहने लगे तो छः मासके बीचमें शत्रुकी सेना नगर पर चढ आती है ॥४८॥ कुएँमें ज्वाला या धूप दिखाई दे, जल खौलने लगे, रोनेका शब्द गीत बकवाद सुनाई आवे तो इन बातोंका होना मरीका कारण है ॥४९॥ विना खोदे हुए जलका निकलना, जलकी गंध और रसका अदल बदल हो जाना, जलाशयका विकारको प्राप्त हो जाना बडे भारी भयका कारण है उसकी शांति इस प्रकारसे करनी चाहिये, जलविकारमें वारुणमंत्रसे वरुणजीकी पूजा और इसी मंत्रसे जप व होम करना चाहिये, इस प्रकारसे इस पापकी शांति होगी ॥५०॥ ५१॥ इति जलवैकृत। जो स्त्रियोंमें प्रसवविकार हो या उनके एक साथ दो तीन या चार बच्चे पैदा हों, प्रसवसमयके पीछे या पहले प्रसव हो तो देश और कुलका भली भांतिसे क्षय होता है ॥५२॥ घोडी, ऊंटनी, भैंस, गाय और हथिनीके एक साथ दो बच्चे पैदा हों तो इनकी ही मृत्यु होती है प्रसववैकृतका फल छः मासके पीछे होता है, इसकी शांतिके लिये गर्गजीने दो श्लोक कहे हैं, जिनके प्रसवमें विकार हुआ हो हितार्थी पुरुषको चाहिये कि इन स्त्रियोंको दूर देशमें छोड आवें। ब्राह्मणोंको उनकी इच्छाके अनुसार तृप्त करे और इसमें इस प्रकारसे शांति करावे, चौपायोंको अपने थलसे अलग करके दूसरेकी भूमिमें छोड आवे नहीं तो नगरस्वामी और अपने झुंडका नाश हो जाता है ॥५३॥५४॥५५॥ इति प्रसववैकृत। एक जातिका पशु दूसरी जातिके पशुसे मैथुन करे तो अमंगल होता है या दो बैल जो परस्पर थन पियें अथवा कुत्ता गायके बछड़ेका थन पियें तो अमंगल होता है ॥५६॥ ऐसा हो तो तीन मासमें निःसंदेह शत्रुकी सेना आती है, इसके रोकके लिये गर्गजीने यह दो शांतिकारी श्लोक कहे हैं–"उनको छोड देने, निकाल देने या दानकर देनेसे शीघ्र शुभ होता है, इस कारण ब्राह्मणोंको तृप्त करे और जप होम करावे। पुरोहितको उचित है कि प्रजापत्यमंत्रसे स्थालीपाक और पशुओंसे धाताका यजन करे और बहुतसे अन्नकी दक्षिणा दे" ॥५७॥५८॥५९॥ इति चतुष्पादवैकृत। रथ, बहली आदि सवारी जो विना ही घोडे बैलादिके जुते हुए चलने लगें या बैलादिसे जुती हुई सवारी गमन न करे और पहिया पृथ्वीमें गड जाय तो राज्यको भय होता है ॥६०॥ विना बजावे तुर्रहीका शब्द हो या बजाने से तुर्रही बजे नहीं या उसमें व्युत्पत्ति अर्थात् अनेक प्रकारके शब्द हों तों शत्रुकी सेनाका आगमन या राजाका मरण होता है ॥६१॥ जब आकाशमें प्रतिध्वनि हो, तुर्रही बजे या कर्कादि राशिका विपरीत घटन हो तो रोग या मृत्यु होती है। तुर्रहीका शब्द स्वरहीन हो तो शत्रुकी पराजय होती है ॥६२॥ बैल और हलका अचानक जुड जाना, दर्वी (चमचा) आदि घरकी सामग्रीमें किसी प्रकारका विकार आ जाना और शृंगालके शब्दका होना शस्त्रभयका कारण है। इसकी शांतिका होना मुनिजीने इस प्रकार कहा है–"इस वायव्य विकारमें राजा सत्तूसे पवनका पूजा कर और ब्राह्मणोंके द्वारा "आ वायोः" इस ऋक्पंचकका जप करावे, परमान्न और दक्षिणा देकर ब्राह्मणोंको

संतुष्ट कर, यत्नके सहित बहुतसा अन्न दक्षिणामें दे और होम करावे" ।।६३।।६४।।६५।। इति वायव्यवैकृत । घरके पाले हुए पक्षिगण वनचारी हो जांय या बनैले पक्षी निर्भय होकर पुरमें प्रवेश कर आवें, दिनके चरनेवाले रात्रिमें अथवा रात्रिके चरनेवाले दिनमें विचरण करें, दोनों संध्याओंमें मृग और पक्षी मंडल बांध २ कर बैठें, अथवा वह इकट्ठे हो सूर्यकी ओरको मुख करके चिल्लावें तो भय होता है ।।६६।।६७।। जो कुत्ते रोते २ द्वार पर डटे रहें, सूर्यकी ओरको मुख करके गीदड रोवें, जो कबूतर या उल्लू राजभवनमें प्रवेश करें, अथवा प्रदोषके समयमें मुरगा शब्द करे, हेमन्तादि ऋतुओंमें कोयल बोले, आकाशमें बाज आदि पक्षियोंका प्रतिलोम मंडल विचरण करे तो भयदायी होता है ।।६८।।६९।। घरमें, चैत्यमें, तोरण और द्वारपर पक्षियोंका झुंड गिरे और मधुका छत्ता वमई व कमलसे उत्पन्न हुए पदार्थ गिरें तो ऊपर कहे हुए स्थानोंका नाश होता है ।।७०।। जो हड्डीको कुत्ते घरमें ले आवें या मृतक अंगका कोई भाग ले आवें तो मरीका कारण है. पशु और शस्त्र मनुष्यकी भांति बोलें तो राजाकी मृत्यु होती है. इन बातोंकी शांतिके लिये मुनिजीने यह वचन कहा है-"मृगपक्षियोंके विकारमें दक्षिणाके साथ होम करे, पांच ब्राह्मणोंसे "देवाः कपोत" इस मंत्रका जप कराना चाहिये, और "सुदेवाः" मंत्रसे दक्षिणा देकर शाकुनसूक्तका जप करना उचित है अथवा "मनोवेदशिरांसि" यह मंत्र जपे ।।७१।।७२।।७३।। इति मृगपक्षिविकार । इन्द्रध्वज, इन्द्रकील, थंभ, द्वार, कपाट, तोरण केतु टूट जाय या गिर जाय तो राजाका मरण होता है ।।७४।। दोनों संध्याके समय तेजका होना अग्निरहित वनमें धूमका उत्पन्न होना, विना छेदके पृथ्वीका फट जाना और कांपना भयदायी होता है ।।७५।। जिस देशका राजा पाखण्डी और नास्तिकोंका भक्त होता है, साधुओंकेसे आचरण नहीं करता, क्रुद्धस्वभाव, ईर्षा करनेवाला, क्रूर विग्रहमें चित्तको लगानेवाला होता है उस देशका नाश हो जाता है ।।७६।। जब शस्त्र, काठ, पत्थर हाथमें लेकर बालकगण "मारो, छीन लो, काटो, तोड डालो" ऐसा कहते २ एक दूसरेको मारते हैं तब शीघ्र ही भय होता है ।।७७।। कोयले या गेरूसे जिस घरकी भीतोंपर मृतकोंके चित्र बनाये जायँ, अथवा विनाशके समय उसके स्वामीकी तसवीर बनाई जाय, वहाँ शीघ्र ही भय होता है ।।७८।। जिस घरमें मकरियोंके जाले पुरे रहें, दोनों संध्याओंमें जिसकी पूजा न हो, जहां नित्य क्लेश होता रहे और स्त्रियें जहां नित्य अपवित्र रहें वहां भी भय होता है ।।७९।। राक्षसोंका दिखाई देना शीघ्र चारों ओरसे मरीके होनेकी सूचना देता है, इसको रोकनेके लिये गर्गजीने इस प्रकार शांति कही है-"अच्छे २ भोजन योग्य पदार्थ और बलि देनेसे महाशांति होती है और महेन्द्रके समस्त मंत्रोंसे महेन्द्रको भली भांतिसे पूजन करना चाहिये" ।।८०।।८१।। इति शक्रध्वजेन्द्रकीलादिवैकृत । राजा और देशके विनाशमें, केतुके उदयमें, अथवा चंद्रमा सूर्यके ग्रहणमें विना ऋतुमें उत्पातकी उत्पत्तिका होना दोषका कारण नहीं है ।।८२।। जिन उत्पातोंसे दोष उत्पन्न नहीं होते, ऋषिपुत्रके कहे हुए इस समासमें दो श्लोकके बीच इनको ऋतुके स्वभावसे उत्पन्न हुए कहे हैं, "वज्र, अशनि (एक प्रकारकी बिजली), भूमिका कांपना, संध्या, टकरानेका शब्द, घेरा, धूरि, धूम, अस्त और उदयकालमें सूर्य लाल रंगका हो जाना, वृक्षमें अन्न, रस, स्नेह और बहुतसे फूलोंका उत्पन्न होना, गाय व पक्षियोंके मदका बढना चैत और वैशाखके महीनेमें मंगलका कारण है ।।८३।।८४।।८५।। तारा और उल्का-

पातसे उत्पन्न हुए चंद्रमा और सूर्यका कपिलमण्डल अग्निके विना ही ज्वालाकेसा शब्द होना, धुआं, धूरि पवनसे आहत, लाल कमलके समान रंगवाली लालीका संध्या समय होना, चलायमान समुद्र के समान आकाशका हो जाना, नदी के जलका सूख जाना, ग्रीष्म-काल में दिखाई देनेसे शुभ फल को उत्पन्न करता है ॥८६॥ ८७॥ इन्द्रधनुष, घेरा, बिजली, सूखे हुए वृक्ष में अंकुरों का निकलना, पृथ्वीका कांपना, उलट जाना, स्वरूप का बदल जाना, शब्द करना, फटजाना, सरोवर, नदी और कुओं का बढ जाना या किनारों पर आ जाना, जल का विप्लव होना, पर्वत और घरों का चलायमान होना वर्षाकालमें भयदायी नहीं है ॥८८॥८९॥ दिव्य स्त्री भूत, गंधर्व, विमान और अद्भुत दर्शन, आकाश में दिन के समय ग्रह, नक्षत्र और ताराओं का दिखाई देना, पर्वत तथा वन के कंगूरों में गीत और बाजोंकी ध्वनिका सुनाई देना, धान्य की वृद्धि और जलकी हानि का होना शरत्काल में शुभकारी कहा है ॥९०॥९१॥ वायु और तुषारों में शीतपन, मृग और पक्षियों का शब्द करना, राक्षस व यक्षादि प्राणियों का दर्शन, देववाणी, धूम या अंधकारमय आकाश, वन, पर्वत और दिशाओंका ढक जाना, उंचेमें सूर्यका उदय और अस्त हेमन्तमें शुभकारी कहा है ॥९२॥९३॥ बर्फका गिरना, पवनके उत्पात, विरूप और अद्भुतदर्शन, काले अञ्जनके समान आकाश, ताश या उल्कापातसे आकाशका चित्र-विचित्र होना, गाय, बकरी, घोडा, मृग, पक्षी और स्त्रियोंमें विचित्र, गर्भका उत्पन्न होना और पत्र, लता व अंकुरका विकार शिशिर ऋतुमें शुभदायी है ॥९४॥९५॥ इस ऋतुमें स्वभावसे उत्पन्न हुए विकार अपनी २ ऋतुमें दिखाई दे तो शुभदायी है, और ऋतुमें विकार दिखाई दें तो वह अत्यन्त दारुण होते हैं ॥९६॥ पागलोंका गीत और गाथा, बालकोंके वचन और जिसको स्त्री कहे उसका लंघन नहीं होता ॥९७॥ सत्यस्वरूप, अप्रेरित, वाग्रूपिणी यह सरस्वतीजी पहले सब देवताओंमें विचरण करती थी फिर मनुष्योंको प्राप्त हुई ॥९८॥ जो दैवज्ञ गणितके ज्ञानको नहीं जानता, वह भी जो उत्पातोंका ज्ञान भली भांतिसे करे तो वहभी विख्यात होकर राजाका प्यारा होता है. यह वही मुनिवचनका रहस्य कहा गया है कि जिसको जानकर मनुष्य त्रिकालदर्शी हो सकता है ॥९९॥

इतिश्रीवराहमिहिराचार्यविरचि० बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां षट्चत्वारिंशोऽध्यायः ॥४६॥

अथ सप्तचत्वारिंशोऽध्यायः

मयूरचित्रकम्

दिव्यान्तरिक्षाश्रयमुक्तमादौ मया फलं शस्तमशोभनं च । प्रायेण चारेषु समागमेषु युद्धेषु मार्गादिषु विस्तरेण ॥ १ ॥ भूयो वराहमिहिरस्य न युक्तमेतत् कर्तुं समासकृदसाविति तस्य दोषः ॥ तज्ज्ञैर्न वाच्यमिदमुक्तफलानुगीति यर्व्हाह चित्रकमिति प्रथितं वराङ्गम् ॥२॥ स्वरूपमेव तस्य तत् प्रकीर्तितानुकीर्तनम् । ब्रवीम्यहं न चेदिदं तथापि मेऽत्र वाच्यताम् ॥ ३ ॥ उत्तरवीथिगता द्युतिमन्तः क्षेमसुभिक्षशिवाय समस्ताः । दक्षिणमार्गगता द्युतिहीनाः क्षुद्भयतस्क-

रमृत्युकरास्ते ॥ ४ ॥ कोष्ठागारगते भृगुपुत्रे पुष्यस्थे च गिरां प्रभुविष्णौ । निर्वैराः क्षितिपाः सुखभाजः संहृष्टाश्च जना गतरोगाः ॥ ५ ॥ पीडयन्ति यदि कृत्तिकां मघां रोहिणीं श्रवणमैन्द्रमेव वा । प्रोज्झ्य सूर्यमपरे ग्रहास्तदा पश्चिमा दिगनयेन पीड्यते ॥ ६ ॥ प्राच्यां चेद्ध्यजवदवस्थिता दिनान्ते प्राच्यानां भवति हि विग्रहा नृपाणाम् । मध्ये चेद्भवति हि मध्यदेशपीडा रूक्षैस्तैर्न तु रुचिरैर्मयूखवद्भिः ॥ ७ ॥ दक्षिणा ककुभमाश्रितैस्तु तैर्दक्षिणापथपयोमुचां क्षयः । हीनरूक्षतनुभिश्च विग्रहः स्थूलदेहकिरणान्वितैः शुभम् ॥ ८ ॥ उत्तरमार्गे स्पष्टमयूखाः शान्तिकरास्ते तन्नृपतीनाम् । ह्रस्वशरीरा भस्मसवर्णा दोषकराः स्युर्देशनृपाणाम् ॥ ९ ॥ नक्षत्राणां तारकाः संग्रहाणां धूमज्वालाविस्फुलिङ्गान्विताश्चेत् । आलोकं वा निर्निमित्तं न यान्ति याति ध्वंसं सर्वलोकः सभूपः ॥१०॥ दिवि भाति यदा तुहिनांशुयुगं द्विजवृद्धिरतीव तदाशु शुभा । तदनन्तरवर्णरणोऽर्कयुगे जगतः प्रलयस्त्रिचतुःप्रभृति ॥११॥ मुनीनभिजितं ध्रुवं मघवतश्च भं संस्पृशन् शिखी घनविनाशकृत् कुशलकर्महा शोकदः । भुजङ्गममथ स्पृशेद्भवति वृष्टिनाशो ध्रुवं क्षयं व्रजति विद्रुतो जनपदश्च बालाकुलः ॥ १२ ॥ प्राग्द्वारेषु चरन् रविपुत्रो नक्षत्रेषु करोति च वक्रम् । दुर्भिक्षं कुरुते भयमुग्रं मित्राणां च विरोधमवृष्टिम् ॥ १३ ॥ रोहिणीशकटमर्कनन्दनो यदि भिनत्ति रुधिरोऽथवा शिखी । किं वदामि यदनिष्टसागरे जगदशेषमुपयाति संक्षयम् ॥ १४ ॥ उदयति सततं यदा शिखी चरति भचक्रमशेषमेव वा । अनुभवति पुराकृतं तदा फलमशुभं सचराचरं जगत् ॥१५॥ धनुःस्थायी रूक्षो रुधिरसदृशः क्षुद्भयकरो बलोद्योगं चेन्दुः कथयति जयं ज्यास्य च यतः । अवाक्यभृङ्गो गोघ्नो निधनमपि सस्यस्य कुरुते ज्वलन्धूमायन् वा नृपतिमरणायैव भवति ॥१६॥ स्निग्धः स्थूलः समभृङ्गो विशालस्तुङ्गश्चोदग्विचरन्नागवीथ्याम् । दृष्टः सौम्यैरशुभैर्विप्रयुक्तो लोकानन्दं कुरुतेऽतीव चन्द्रः ॥१७॥ पित्र्यमैत्रपुरुहूतविशाखात्वाष्ट्रमेत्य च युनक्ति शशाङ्कः । दक्षिणेन न शुभो हितकृत्स्याद्यद्युदक् चरति मध्यगतो वा ॥१८॥ परिघ इति मेघरेखा या तिर्यग्भास्करोदयेऽस्ते वा । परिधिस्तु प्रतिसूर्यो दण्डस्त्वृजुरिन्द्रचापनिभः ॥१९॥ उदयेऽस्ते वा भानोर्ये दीर्घा रश्मयस्त्वमोघास्ते । सुरचापखण्डमृजु यद्रोहितमैरावतं दीर्घम् ॥ २० ॥ अर्धास्तमयात्सन्ध्या व्यक्तीभूता न तारका यावत् । तेजःपरिहानिमुखाद् भानोरर्धोदयं यावत् ॥ २१ ॥ तस्मिन् सन्ध्याकाले चिह्नैरेतैः शुभाशुभं वाच्यम् । सर्वैरेतैः स्निग्धैः सद्योवर्षं भयं रूक्षैः ॥२२॥ अच्छिन्नः परिघो वियच्च विमलं श्यामा मयूखा रवेः स्निग्धा दीधितयः सितं सुरधनुर्विद्युच्च पूर्वोत्तरा । स्निग्धो मेघतरुर्दिवाकरकरालिङ्गितो वा यदा वृष्टिः स्याद्यदि वार्कमस्तसमये मेघो महांश्छादयेत् ॥२३॥ खण्डो वक्रः कृष्णो ह्रस्वः काकाद्यैर्वा चिह्नैर्विद्धः । यस्मि-

न्देशे रूक्षश्चार्कस्तत्राभावः प्रायो राज्ञः ॥२४॥ वाहिनीं समुपयाति पृष्ठतो मांसभुक्खगगणो युयुत्सतः । यस्य तस्य बलविद्रवो महानग्रगैस्तु विजयो विहङ्गमैः ॥ २५ ॥ भानोरुदये यदि वास्तमये गन्धर्वपुरप्रतिमा ध्वजिनी । बिम्बं निरुणद्धि तदा नृपतेः प्राप्तं समरं सभयं प्रवदेत् ॥२६॥ शस्ता शान्तद्विजमृगघुष्टा सन्ध्या स्निग्धा मृदुपवना च । पांशुध्वस्ता जनपदनाशं धत्ते रूक्षा रुधिरनिभा वा ॥२७॥ यद्विस्तरेण कथितं मुनिभिस्तदस्मिन् सर्वं मया निगदितं पुनरुक्तवर्जम् । श्रुत्वापि कोकिलरुतं बलिभुग्विरौति यत्तत्स्वभावकृतमस्य पिकं न जेतुम् ॥ २८ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां मयूरचित्रकं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

ग्रहचार, समागम, युद्ध और वीथि आदि में बहुधा दिव्य और अन्तरिक्ष विषयाश्रयी, समस्त शुभाशुभ फल हमने निरूपण किये ॥१॥ वराहमिहिरके लिये इन बातोंका वारंवार करना ठीक नहीं है क्योंकि उनका दोष यही है कि वह संक्षेपकारी हैं परंतु यह फलदायी मयूरचित्रक नामक श्रेष्ठ अङ्ग बनानेसे मयूरचित्रकके जाननेवाले पंडित लोग उनकी कुछ भी निन्दा न करेंगे ॥२॥ (पहले मेघके विषयमें) वही मयूरचित्रका स्वरूप है इस कारण फिर उनका वर्णन नहीं करना चाहिये परंतु वर्णन न करने पर भी निन्दा न छूटेगी ॥३॥ जो उत्तर मार्गमें ग्रह गमन करें और प्रकाशमान हो तो कुशल, सुभिक्ष और मंगल होता है, दक्षिणमार्गमें जाय और प्रकाशहीन हो तो अकाल, तस्करभय और मृत्युकारक होते हैं ॥४॥ शुक्र ग्रह कोष्ठागारमें अर्थात् मघा नक्षत्र पर हो और बृहस्पति पुष्यनक्षत्रमें विराजमान हो तो राजा लोग शत्रुरहित होते हैं, प्रजा सुखी, हर्षित और रोगहीन रहती है ॥५॥ यदि सूर्यके अतिरिक्त ग्रहगण कृत्तिका, मघा, रोहिणी, श्रवण और ज्येष्ठा नक्षत्रको पीडित करें तो अनीतिसे पश्चिमदिशाको पीडा होती है ॥६॥ जो संध्याकालके समय पूर्वदिशामें ध्वजाकी नाई ग्रहगण विराजमान होते हों तो पूर्वदिशाके रहनेवाले राजाओंमें युद्ध होता है, यदि आकाशके मध्यभागमें ऐसा हो तो मध्यदेश पीडित होता है, परंतु यह रूखे मनोहर अथवा किरणदार हो तो मध्यदेशको पीडा नहीं होती ॥७॥ जो दक्षिणदिशामें ग्रह हों तो दक्षिणापथ और मेघोंका क्षय होता है जो इस समयमें ग्रह हीन शरीर और रूखी देहवाले हों तो विग्रह होता है, परंतु बडी देहवाले और किरणदार हों तो शुभ होता है ॥ ८ ॥ वे उत्तरमार्गमें स्पष्ट किरणोंसे झलकते हों तो वहांके राजाओंमें शांति करनेवाले होते हैं, छोटे शरीरवाले और भस्मके समान रंगवाले हों तो देश और राजाओंके दोषकारी होते हैं ॥९॥ जो ग्रह और नक्षत्रोंके तारे धुएंकी लपट और चिनगारियोंसे युक्त हों या विनाही कारणके उनमें प्रकाश न हो तो राजाके साथ सब लोकका ध्वंस होता है ॥१०॥ जब आकाशमें दो चंद्रमा दीप्तिमान होते हैं, तब ब्राह्मणोंका अत्यन्त शुभ होता है, दो सूर्यके दिखाई देनेसे क्षत्रियादिकोंका युद्ध होता है और तीन चार इत्यादि अनेक चंद्रसूर्यके निकलने से जगत् में प्रलय होती है। ॥११॥ शिखी अर्थात् केतु यदि सप्तर्षिमण्डल, अभिजित् ध्रुव और ज्येष्ठानक्षत्रको स्पर्श करे तो बादलोंका नाश, कुशल कर्ममें हानि और शोकदायी होता है, जो श्लेषा नक्षत्रको

स्पर्श करे तो निश्चयही वृष्टिका नाश और रेतेसे युक्त जनपदमें उपद्रव होकर वह शीघ्र नाशको प्राप्त हो जाता है ॥१२॥ शनि पूर्वद्वार अर्थात् कृत्तिकादि सप्त नक्षत्रमें विचर कर वक्री होनेसे दुर्भिक्ष, भय, मित्रोंका विरोध करता है और वर्षाको नहीं करता है ॥१३॥ जो शनि, मंगल या केतु रोहिणी शकटको भेद करे तो समस्त जगत् का इस प्रकार अनभल होता है कि कुछ कहा नहीं जाता ॥१४॥ जब केतु सदा उदय होता है या बहुतसे नक्षत्रोंके चक्रमें विचरण करता है तो बराबर जगत् अपने किये हुए समस्त अशुभ फलोंका अनुभव करता है ॥१५॥ धनुषके समान आकारवाला, रूखा और रुधिरके समान रंगवाला हो तो क्षुधा और भयका उपजानेवाला होत है और इन चंद्रमाकी मौर्वी जिस ओरको होती है वहांपर सेनाका उद्योग और जयकी सूचना होती है. चंद्रमाका शृंग नीचे हो तो धान्य और गायोंका नाश होता है और लपट व धुएँका विस्तार करे तो राजाओंके मरणका कारण होता है ॥१६॥ चिकना, स्थूल, बराबर शृंगवाला, विशाल और ऊंचा चंद्रमा उत्तरदिशामें नागवीथिमें विचरण करे, अशुभ ग्रह से अलग और शुभ ग्रहसे देखा जाय तो मनुष्योंको अत्यन्त आनन्द देता है ॥१७॥ जो चंद्रमा मघा, अनुराधा, ज्येष्ठा, विशाखा और चित्रा नक्षत्रको प्राप्त होकर दक्षिणमें जाय तो शुभ फल नहीं होता, यदि उत्तरदिशामें वा मध्यमें हो तो हितकारी होता है ॥१८॥ सूर्यके उदय या अस्तकालमें जो मेघकी रेखा हो, उसका ही "परिघ" नाम है–यह तिरछी हो तो "परिधि" सूर्यके समान वस्तु हो तो "प्रतिसूर्य" और इन्द्रके धनुषके समान सरल मेघको "दंड" कहते हैं सूर्यकी लंबी किरणको "अमोघ" कहते हैं और लम्बे व सीधे इन्द्रधनुषको "ऐरावत" कहते हैं ॥१९॥२०॥ जब सूर्य आधा छिप गया हो, तारे प्रकाशित न हुए हों और तेजहानिके आरंभसे जबतक सूर्यका आधा उदय हो तबतक संध्या कहाती है ॥२१॥ उस संध्याकालमें इन चिह्नोंको देखकर शुभ अशुभ फल कहना चाहिये, यह समस्त चिकने हों तो शीघ्र वर्षा और रूखे हों तो भय होता है ॥२२॥ साबत परिघ, विमल आकाश, सूर्यकी श्याम किरणें, स्निग्ध दीधिति, श्वेतवर्णका देवताओंका धनुष, पूर्वोत्तर दिशामें बिजली विराजमान हो अथवा जब बादरवृक्ष सूर्यकी किरणोंके पडनेसे चिकना हो जाता है या सूर्यको छिपनेके समय महामेघ ढक लेता है तो वर्षा होती है ॥२३॥ जिस देशमें सूर्य टुकडेदार, टेढा, काला, छोटा, काकादि चिह्नसे बिंधा हुआ और रूखा हो वहांपर अकसर राजाका अभाव होता है ॥२४॥ जिन युद्ध करनेकी इच्छा किये राजाओंके पीछेसे मांस खानेवाले पक्षियोंके साथ सेनाका समागम होता है, उनको सेनाका बडा भारी भय होता है परंतु विहंगगण आगे २ चलें तो विजय होती है ॥२५॥ सूर्यके उदय या अस्तसमयमें ध्वजासे युक्त गंधर्वपुरकी प्रतिमा जो सूर्यको रोक ले तो यह प्रगट करती है कि राजाको भययुक्त समरकी प्राप्ति होगी ॥२६॥ चिकने और मधुर पवनवाली संध्या पूर्वदिशामें पक्षी और मृगगणोंका शब्द होना अच्छा है और संध्या धूरिसे ध्वंसको प्राप्त हुई या रुधिरके समान रूखी हो तो जनपदका नाश हो ॥२७॥ मुनिलोगोंने जिसको विस्तारसे कहा है, मैंने उसको उन समस्त पुनरुक्तियोंको छोडकर इस शास्त्रमें कहा है, कोयलकी कूक सुनकर काकका शब्द करना उसका स्वभावही है, वास्तवमें कागका शब्द करना कोयलको जीतनेके लिये नहीं है ॥२८॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां सप्तचत्वारिंशोऽध्यायः ॥४७॥

अथाष्टचत्वारिंशोऽध्यायः

पुष्यस्नानम्

मूलं मनुजाधिपतिः प्रजातरोस्तदुपघातसंस्कारात् । अशुभं शुभं च लोके भवति
यतोऽतो नृपतिचिन्ता ॥१॥ या व्याख्याता शान्तिःस्वयम्भुवा सुरगुरोर्महेन्द्रार्थे ।
तां प्राप्त वृद्धगर्गः प्राह यथा भागुरेः शृणुत ॥२॥ पुष्यस्नानं नृपतेः कर्तव्यं दैव-
वित्पुरोधाभ्याम् । नातः परं पवित्रं सर्वोत्पातान्तकरमस्ति ॥ ३ ॥ श्लेष्मातकाक्ष-
कण्टकिकटुतिक्तविगन्धिपादपविहीने । कौशिकगृध्रप्रभृतिभिरनिष्टविहगैः परि-
त्यक्ते ॥४॥ तरुणतरुगुल्मवल्लीलताप्रतानावृत्ते वनोद्देशे । निरुपहतपत्रपल्लवम-
नोज्ञमधुरद्रुमप्राये ॥५॥ कृकवाकुजीवजीवकशुकशिखिशतपत्रचाषहारीतैः । क्रकर-
चकोरकपिञ्जलवञ्जुलपारावतश्रीकैः ॥६॥ कुसुमरसपानमत्तद्विरेफपुंस्कोकिला-
दिभिश्चान्यैः । विरुते वनोपकण्ठे क्षेत्रागारे शुचावथवा ॥ ७ ॥ ह्रदिनीविला-
सिनीनां जलखगनखविक्षतेषु रम्येषु । पुलिनजघनेषु कुर्यादृङ्मनसोः प्रीतिजनेषु ॥८॥
प्रोत्प्लुतहंसच्छत्रे कारण्डवकुररसारसोद्गीते । फुल्लेन्दीवरनयने सरसि सहस्राक्षका-
न्तिधरे ॥९॥ प्रोत्फुल्लकमलवदनाः कलहंकलस्वनप्रभाषिण्यः । प्रोत्तुङ्गकुंडलकुचा
यस्मिन्नलिनीविलासिन्यः ॥ १० ॥ कुर्याद्गोरोमन्थजफेनलवशकृत्खुरक्षतोपचिते ।
अचिरप्रसूतहंकृतवल्गितवत्सोत्सवे गोष्ठे ॥११॥ अथवा समुद्रतीरे कुशलागतपोत
रत्नसम्बाधे । घननिचुललीनजलचरसितखगशबलीकृतोपान्ते ॥ १२ ॥ क्षमया
क्रोध इव जितः सिंहों मृग्याभिभूयते यत्र । दत्ताभयखगमृगशावकेषु तेष्वाश्रमेष्व-
थवा ॥१३॥ काञ्चीकलापनूपुरगुरुजघनोद्वहनविघ्नितपदाभिः । श्रीमति मृगेक्षणा-
भिर्गृहेऽन्यभृतवल्गुवचनाभिः ॥ १४ ॥ पुण्येष्वायतनेषु च तीर्थेषूद्यानरम्यदेशेषु ।
पूर्वोदक्प्लवभूमौ प्रदक्षिणाम्भोवहायां च ॥ १५ ॥ भस्माङ्गारास्थ्यूषरतुषकेशश्व-
भ्रकर्कटावासैः । श्वाविन्मूषकविवरैर्वल्मीकैर्या च सन्त्यक्ता ॥ १६ ॥ धात्री घना
सुगन्धा स्निग्धा मधुरा समा च विजयाय । सेनावासेऽप्येवं योजयितव्या यथायोगम्
॥१७॥ निष्क्रम्य पुरान्नक्तं दैवज्ञामात्ययाजकाः प्राच्याम् । कौबेर्यां वा कृत्वा बलिं
दिशीशाधिपायां वा ॥१८॥ लाजाक्षतदधिकुसुमैः प्रयतः प्रणतः पुरोहितः कुर्यात् ।
आवाहनमथ मन्त्रस्तस्मिन्मुनिभिः समुद्दिष्टः ॥ १९ ॥ आगच्छन्तु सुराः सर्वे
येऽत्र पूजाभिलाषिणः । दिशो नागा द्विजाश्चैव ये चान्येऽप्यंशभागिनः ॥ २० ॥
आवाह्यैवं ततः सर्वानेवं ब्रूयात् पुरोहितः । श्वः पूजां प्राप्य यास्यन्ति दत्त्वा शांति
महीपतेः ॥२१॥ आवाहितेषु कृत्वा पूजां तां शर्वरीं वसेयुस्ते । सदसत्स्वप्ननिमित्तं
यात्रायां स्वप्नविधिरुक्तः ॥२२॥ अपरेऽहनि प्रभाते सम्भारानुपहरेद्यथोक्तगुणान् ।
गत्वावनिप्रदेशे श्लोकाश्चाप्यत्र मुनिगीताः ॥२३॥ तस्मिन् मण्डलमालिख्य
कल्पयेत्तत्र मेदिनीम् । नानारत्नाकरवतीं स्थानानि विविधानि च ॥२४॥ पुरोहितो

यथास्थानं नागान्यक्षान् सुरान् पितॄन् । गंधर्वाप्सरसश्चैव मुनीन् सिद्धांश्च विन्यसेत् ॥२५॥ ग्रहांश्च सह नक्षत्रै रुद्रांश्च सह मातृभिः । स्कन्दं विष्णुं विशाखं च लोकपालान् सुरस्त्रियः ॥ २६ ॥ वर्णकैर्विविधैः कृत्वा हृद्यैर्गन्धगुणान्वितैः । यथास्वं पूजयेद्विद्वान् गन्धमाल्यानुलेपनैः ॥२७॥ भक्ष्यैरन्यैश्च विविधैःफलमूलामिषैस्तथा । पानकैर्विविधैर्हृद्यैः सुराक्षीरासवादिभिः ॥२८॥ कथयाम्यतः परमहं पूजामस्मिन् यथाभिलिखितानाम् । ग्रहयज्ञे यः प्रोक्तो विधिर्ग्रहाणां स कर्तव्यः ॥२९॥ मांसौदनमद्याद्यैः पिशाचदितितनयदानवाः पूज्याः । अभ्यञ्जनाञ्जनतिलःपितरो मांसौदनैश्चापि ॥३०॥ सामयजुर्भिर्मुनयस्त्वृग्भिर्गन्धैश्च धूपमाल्ययुतैः । अश्लेषकवर्णैस्त्रिमधूरेण चाभ्यर्च्चयेन्नागान् ॥३१॥ धूपाज्याहुतिमाल्यैर्विबुधान् रत्नैः स्तुतिप्रणामैश्च । गन्धर्वानप्ससरसो गन्धैर्माल्यैश्च सुसुगंधैः ॥३२॥ शेषांस्तु सार्ववर्णिकबलिभिः पूजां न्यसेच्च सर्वेषाम् । प्रतिसरवस्त्रपताकाभूषणयज्ञोपवीतानि ॥३३॥ मण्डलपश्चिमभागे कृत्वाग्नि दक्षिणेऽथवा वेद्याम् । आदद्यात्सम्भारान्दर्भान्दीर्घान्निगर्भाश्च ॥३४॥ लाजाज्याक्षतदधिमधुसिद्धार्थकगन्धसुमनसो धूपान् । गोरोचनाञ्जनतिलान् स्वर्तुजमधुराणि च फलानि ॥३५॥ सघृतस्य पायसस्य च तत्र शरावाणि तैश्च सम्भारैः । पश्चिवेद्यां पूजां कुर्यात् स्नानस्य सा वेदी ॥ ३६ ॥ तस्याः कोणेषु दृढान् कलशान् सितसूत्रवेष्टितग्रीवान् । सक्षीरवृक्षपल्लवफलापिधानान् व्यवस्थाप्य ॥ ३७ ॥ पुष्यस्नानविमिश्रेणापूर्णानिम्भसा सरत्नांश्च । पुष्यस्नानद्रव्याणादद्याद्गर्गगीतानि ॥३८॥ ज्योतिष्मतीं त्रायमाणामभयामपराजिताम् । जीवां विश्वेश्वरी पाठां समङ्गां विजयां तथा ॥३९॥ सहां च सहदेवीं च पूर्णकोशां शतावरीम् । अरिष्टिकां शिवां भद्रां तेषु कुम्भेषु विन्यसेत् ॥४०॥ ब्राह्मीं क्षेमामजां चैव सर्वबीजानि काञ्चनम् । मङ्गल्यानि यथालाभं सर्वोषध्यो रसांस्तथा॥४१॥ रत्नानि सर्वगन्धांश्च बिल्वं च सविकङ्कतम् । प्रशस्तनाम्नयश्चौषध्यो हिरण्यं मङ्गलानि च ॥४२॥ आदावनडुहश्चमं जरया संहृतायुषः । प्रशस्तलक्षणभृतः प्राचीनग्रीवमास्तरेत् ॥४३॥ ततो वृषस्य योधस्य चर्म रोहितमक्षतम् । सिंहस्याथ तृतीयं स्याद् व्याघ्रस्य च ततः परम् ॥४४॥ चत्वार्येतानि चर्माणि तस्यां वेद्यामुपास्तरेत् । शुभे मुहूर्ते सम्प्राप्ते पुष्ययुक्ते निशाकरे ॥४५॥ भद्रासनमेकतमेन कारितं कनकरजतताम्राणाम् । क्षीरतरुनिर्मितं वा विन्यस्यं चर्मणामुपरि ॥४६॥ विविधस्तस्योच्छ्रायो हस्तः पादाधिकोऽर्द्धयुक्तश्च । माण्डलिकानन्तरजित् समस्तराजार्थिनां शुभदः ॥४७॥ अन्तर्धाय हिरण्यं तत्रोपविशेन्नरेश्वरः सुमनाः । सचिवाप्तपुरोहितदैवपौरकल्याणनामवृतः ॥४८॥ बन्दिजनपौरविप्रप्रघुष्टपुण्याहनिर्घोषैः । समृदङ्गशंखतूर्यैर्मङ्गलशब्दैर्हृतानिष्टः ॥४९॥ अहतक्षौमनिवसनं पुरोहितः कम्बलेन सञ्छाद्य । कृतबलिपूजं कलशैरभिषिञ्चेत्सर्पिषापूर्णैः

॥५०॥ अष्टावष्टाविंशतिरष्टशतं वापि कलशपरिमाणम् । अधिकेऽधिके गुणोत्तरमयं च मंत्रोऽत्र मुनिगीतः ॥५१॥ आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम् । आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः ॥५२॥ भौमान्तरिक्षं दिव्यं च यत्ते किल्बिषमागतम् । सर्वं तदाज्यसंस्पर्शात्प्रणाशमुपगच्छतु ॥५३॥ कम्बलमपनीय ततः पुष्यस्नानाम्बुभिः सफलपुष्पैः । अभिषिञ्चेन्मनुजेन्द्रं पुरोहितोऽनेन मंत्रेण ॥५४॥ सुरास्त्वामभिषिञ्चन्तु ये च सिद्धाः पुरातनाः । ब्रह्मा विष्णुश्च शम्भुश्च साध्याश्च समरुद्गणा ॥५५॥ आदित्या वसवो रुद्रा अश्विनौ च भिषग्वरौ । अदितिर्देवमाता च स्वाहा सिद्धिः सरस्वती ॥५६॥ कीर्तिर्लक्ष्मीर्धृतिः श्रीश्च सिनीवाली कुहूस्तथा । दनुश्च सुरसा चैव विनता कद्रुरेव च ॥५७॥ देवपत्न्यश्च या नोक्ता देवमातर एव च । सर्वास्त्वामभिषिञ्चन्तु दिव्याश्चाप्सरसां गणाः ॥५८॥ नक्षत्राणि मुहुर्ताश्च पक्षाहोरात्रसन्धयः । संवत्सरा दिनेशाश्च कला काष्ठाः क्षणा लवाः ॥५९॥ सर्वे त्वामभिषिञ्चन्तु कालस्यावयवाः शुभाः । वैमानिकाः सुरगणा मनवः सागरैः सह ॥६०॥ सप्तर्षयः सदाराश्च ध्रुवस्थानानि यानि च । मरीचिरत्रिः पुलस्त्यः क्रतुरङ्गिराः ॥ ६१ ॥ भृगु सनत्कुमारश्च सनकोऽथसनन्दनः । सनातनश्च दक्षश्च जैगीषव्यो भगन्दरः ॥६२॥एकतश्च द्वितश्चैव त्रितो जाबालिकश्यपौ । दुर्वासा दुर्विनीतश्च कण्वः कात्यायनस्तथा ॥ ६३ ॥ मार्कण्डेयो दीर्घतपाः शुनःशेफो विदूरथः । ऊर्वः संवर्तकश्चैव च्यवनोऽत्रिः पराशरः ॥६४॥ द्वैपायनो यवक्रितो देवराजः सहानुजः । एते चान्ये च मुनयो वेदव्रतपरायणाः ॥६५॥ सशिष्यास्तेऽभिषिञ्चन्तु सदाराश्च तपोधना । पर्वतास्तरवो वल्लयः पुण्यान्यायतनानि च ॥६६॥ सरितश्च महाभागा नागाः किम्पुरुषास्तथा । वैखानसा महाभागा द्विजा वैहायसाश्च ये ॥६७॥ प्रजापतिर्दितिश्चैव गावो विश्वस्य मातरः । वाहनानि च दिव्यानि सर्वलोकाश्चराचराः ॥६८॥ अग्नयः पितरस्तारा जीमूताः खं दिशो जलम् । एते चान्ये च बहवः पुण्यसङ्कीर्तनाः शुभाः ॥६९॥ तोयैस्त्वामभिषिञ्चन्तु सर्वोत्पातनिबर्हणैः । कल्याणं ते प्रकुर्वन्तु आयुरारोग्यमेव च ॥७०॥ इत्येतैश्चान्यैश्चाप्यथर्वकल्पविहितैः सरुद्रगणैः । कौष्माण्डमहारौहिणकुबेरहृद्यैः समृद्धया च ॥७१॥ आपो हिष्ठा तिसृभिर्हिरण्यवर्णेति चतसृभिर्जप्तम् कार्पासिकवस्त्रयुगं बिभृयात्स्नातो नराधिपतिः ॥७२॥ पुण्याहशंखशब्दैराचान्तोऽभ्यर्च्य देवगुरुविप्रान् । छत्रध्वजायुधानि च ततः स्वपूजां प्रयुञ्जीत ॥७३॥ आयुष्यं वर्चस्यं रायस्पोषाभिर्ऋग्भिरेताभिः । परिजप्तं वैजयिकं नवं विदध्यादलंकारम् ॥७४॥ गत्वा द्वितीयवेदीं समुपविशेच्चर्मणामुपरि राजा । देयानि चैव चर्माण्युपर्युपर्येवमेतानि ॥७५॥ वृषस्य वृषदंशस्य रुरोश्च पृषतस्य च । तेषामुपरि सिंहस्य व्याघ्रस्य च ततः परम् ॥७६॥ मुख्यस्थाने जुहुयात् पुरोहितोऽग्निं समित्ति-

लघृताद्यैः । त्रिनयनशक्रबृहस्पतिर्नारायणनित्यगतिऋ॑ग्भिः ॥ ७७ ॥ इन्द्रध्वजनिर्दिष्टान्यग्निनिमित्तानिदैवविद्ब्रूयात् । कृत्वाशेषसमाप्ति पुरोहितः प्राञ्जलिर्ब्रूयात् ॥७८॥ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवात् । सिद्धिं दत्त्वा सुविपुलां पुनरागमनाय वै ॥ ७९ ॥ नृपतिरतो दैवज्ञं पुरोहितं चार्चयेद्धनैर्बहुभिः । अन्यांश्च दक्षिणीयान् यथार्हतः श्रोत्रियप्रभृतीन् ॥८०॥ दत्त्वाभयं प्रजानामाघातस्थानगान्विसृज्य पशून् । बन्धनमोक्षं कुर्यादाभ्यन्तरदोषकृद्वर्जम् ॥८१॥ एतत् प्रयुज्यमानं प्रतिपुष्यं सुखयशोऽर्थवृद्धिकरम् । पुष्यं विनार्धफलदा पौषी शांतिः पुरा प्रोक्ता ॥८२॥ राष्ट्रोत्पातोपसर्गेषु राहोः केतोश्च दर्शने । ग्रहावमर्दने चैव पुष्यस्नानं समाचरेत् ॥८३॥ नास्ति लोके स उत्पातो यो ह्यनेन न शाम्यति । मङ्गलं चापरं नास्ति यदस्मादतिरिच्यते ॥८४॥ अधिराज्यार्थिनो राज्ञः पुत्रजन्म च कांक्षतः। तत्पूर्वमभिषेके च विधिरेष प्रशस्यते ॥८५॥ महेन्द्रार्थमुवाचेदं बृहत्कीर्तिबृ॑हस्पतिः । स्नानमायुः प्रजावृद्धिसौभाग्यकरणं परम् ॥८६॥ अनेनैव विधानेन हस्त्यश्वं स्नापयीत यः । तस्याभयविनिर्मुक्तं परां सिद्धिमवाप्नुयात् ॥८७॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां पुष्यस्नानं नामाष्टचत्वारिंशोऽध्यायः॥४८॥

राजा प्रजारूपी वृक्षके लिये जडरूप है, प्रजाके ऊपर उपघात संस्कारके लिये अशुभ और शुभ फल होता है; इसलिये राजाके मङ्गलविषयमें सदा चिन्ता करनी चाहिये ॥१॥ स्वयं ब्रह्माजीने महेन्द्रके लिये बृहस्पतिजीसे जो शांति कही थी, वृद्धगर्गजीने उसको प्राप्त हो भागुरिसे जो कहा है उसको श्रवण करो ॥२॥ ज्योतिषी और पुरोहितगणोंके द्वारा राजाको पुष्यस्नान करना उचित है. इसके अतिरिक्त पवित्र और सर्व प्रकारके उत्पातोंका नाश करनेवाला दूसरा कोई नहीं है ॥३॥ श्लेष्मातक (लसोडा), अक्ष (बहेडा), कंटकी (खैर), चरपरे, कडुवे व गंधहीन वृक्ष और उल्लू व शकुनि आदि अनिष्टकारी पक्षियों करके छोडे हुए, तरुण वृक्ष, लता, गुल्म, वल्ली और वेलसे झांदेरदार किये हुए साबत पत्ते और कोपलोंसे मनोहर और मधुर बहुतसे वृक्षवाले वनमें पुष्यस्नान करना उचित है. जिस स्थानमें कृकवाकु (गिरगिट), जीवक (चकोर), तोता मोर, शतपत्र (खुटबढई) चाष (नीलकंठ), हारीत (परेवा), ऋकर (केकडा), कपिञ्जल (चातक), वंजुल (पक्षिविशेष) और कबूतर और फूलोंका मधुपान करनेमें मतवाले भ्रमरगण और कोयलादि पक्षियोंका मनोहर शब्द होता है, वनके समीप ऐसे पवित्र क्षेत्रागारमें इस शांतिको करना चाहिये ॥४॥५॥६॥७॥ अथवा नयन मनको प्रसन्न करनेवाले जलचारी पक्षियोंके नखविक्षत नदीरूप कामिनी पुलिनरूप मनोहर जांघोंपर यह शांति करनी चाहिये ॥८॥ या खिले हुए कमलरूप वदनवाली, कलहंसकी कलनादरूप वाक्यवाली और पद्मके मुकुल (कली) रूप ऊंचे रतनवाली नलिनीरूप विलासिनियें जहांपर वर्तमान हैं, उडते हुए हंसही जिसका छत्र है, कारण्डव कुरर और सारस पक्षियोंकी ध्वनिसे जो गानेके युक्त हैं, प्रफुल्ल इन्दीवर रूपवाले, अतएव सहस्राक्ष इन्द्रके समान रूपधारी पवित्र सरोवरके तीरपर शांति करनी चाहिये ॥९॥१०॥ अथवा गायोंके जुगारनेसे फेन गिरा है, खुरोंसे ताडित होकर

जहांपर चारों ओर गोबर पडा है, जहांपर नये पैदा हुए बछडोंके हुंकार और कूदने फांदनेमें उत्सव हो गया है, ऐसे गोगोठमें पुष्यस्नान करना चाहिये ।।११।। अथवा जहां-पर कुशलसे आये हुए जहाज और रत्नोंके ढेर और घने निचुल (जलवेंत) वृक्ष और जलचर, श्वेत पक्षियोंके लीन होनेसे जहांका किनारा अनेक रंगका हो गया है, उस समुद्रके तीरपर पुष्यस्नान करना चाहिये ।।१२।। जिस प्रकार क्षमासे क्रोध जीत लिया जाता है, वैसेही जिस स्थानमें मृगीगण करके सिंह गिरता है, जहां पर पक्षी और मृगोंक बच्चे निडर होकर घूमते हैं वैसे आश्रयमें अथवा कांचीकलाप, नूपुर, बडे २ नितम्बों करके जिनके पाव फिसल रहे हैं अर्थात् मंदगतिशालिनी और कोयलके कूकनेके समान मधुर भाषण करनेवाली मृगनयनी ललनाओंसे श्रीमान् गृहमें यह शांति करनी चाहिये ।।१३।। ।।१४।। अथवा पवित्र देवमंदिरमें, तीर्थ या उद्यानके रमणीय स्थानमें या परिक्रमाकी रीति जिसका जल बहता हो, पूर्व व उत्तरकी ओरको बहती हुई, क्रमसे नीचेकी भूमिमें पुष्य-स्नान करना चाहिये ।।१५।। राख, कोयला, हड्डी, ऊषर, तुष, केश, गढा, जहां कांकडा रहता हो, हत्यारे जंतु और चूहोंके मदक जहां नहीं हों, जहांपर वमई न हो, जिस स्थानकी भूमि घनी, सुगन्धित, चिकनी, मधुर और बराबर हो वही भूमि विजयकी कारण है; छावनीमेंभी इसकी यथायोग्यसे योजना करनी चाहिये ।।१६।।१७।। दैवज्ञ, मंत्री और याजक लोग पुरसे निकलकर इन स्थानोंकी पूर्व उत्तर दिशामें या ईशानकोणमें जांय, उसके उपरान्त पुरोहित प्रणाम करके खीलें, अक्षत, दही और फूलोंसे बलिदान करे. इसका आवाहन मंत्र मुनियों ने इस प्रकारसे कहा है–"जो देवता लोग इसमें पूजा चाहते हैं, जो दिशा नाग ब्राह्मण व और जो कोई अंशके भागी हों, वह सबही आगमन करे" ।। १८ ।। १९ ।। २० ।। इसके उपरान्त पुरो-हित इस प्रकार सबको बुलाय ऐसा कहे,–" आप लोग आनेवाले कलको शुभ पूजा प्राप्त कर राजा को शांति दे चले जाय" ।। २१ ।। बुलाए देवताओंको पूजा करके सबको वह रात्रि वहीं पर बितानी चाहिये, रात्रिमें जो स्वप्न दिखाई दे, उसका शुभाशुभ फल निरूपण करना चाहिये यह विषय यात्राध्यायमें कहा है ।।२२।। दूसरे दिन प्रभातको कहे हुए द्रव्य लाय, उस पृथ्वीमें जाय जो जो करना चाहिये उस विषयमें मुनिके गाये ये श्लोक हैं–"विद्वान् पुरोहित वहांपर मंडल खेंचकर उसमें अनेक रत्नोंकी खानिवाली पृथ्वीको खैंच और विविध स्थानोंकी कल्पना करे और यथास्थानमें नाग, यक्ष, पितृ, गन्धर्व, अप्सरा मुनि और सिद्धोंको धरे. नक्षत्रोंके ग्रह, मातृ-काओंके साथ रुद्र, स्कन्द, विष्णु, विशाखा और लोकपालोंको व देवताओंकी स्त्रियोंको उचित स्थानमें बनावे, फिर उनको अनेक प्रकारके रंगोंसें रंगकर सुगन्धित और डोरेवाली मनोहर माला चन्दनादि मूल, मांसादि विविध भक्ष्य और शराब, दूध, आसवादि विविध मनोहर जलके पदार्थों से रीतिपूर्वक पूजा करे ।। २३ ।। २४ ।। २५ ।। २६ ।। २७ ।। २८ ।। इसमें अभिलषित देवताओंकी जैसे पूजा करनी चाहिये, सो मैं कहता हूँ, ग्रहयज्ञमें ग्रहों की पूजामें जो विधि कही है, यहांपर वही कर्तव्य है ।। २९ ।। उसमें मांस, पका हुआ अन्न और मत्स्यादिसे पिशाच, दैत्य और दानवोंकी पूजा करनी चाहिये, अभ्यञ्जन, अञ्जन, तिल मांस और रंधे हूए अन्नसे पितरोंकी पूजा करनी चाहिये ।। ३० ।। साम, यजु और ऋङमन्त्रसे गन्धयुक्त धूप और मालासे मुनिगण और अनेक वर्ण व त्रिमधुसे नागकी पूजा करनी चाहिये ।। ३१ ।। धूप घीकी आहुति, माला, रत्न स्तुति व प्रणाम करके देवताओंको व अत्युत्तम गन्धयुक्त गन्धद्रव्य और मालसे गन्धर्व और अप्स-राओंकी पूजा करे ।।३२।। शेष सबकी सार्ववर्णिक बलिसे पूजा करे, प्रतिसर (हारकी लकडी),

वस्त्र, पताका, भूषण और यज्ञोपवीत सबको ही अर्पण करे ॥ ३३ ॥ मण्डलके पश्चिमभागमें अथवा दक्षिणदिशामें वेदीके ऊपर अग्नि स्थापन करके कुश और सब सामग्रीका दान करे खीलें घी, चावल, दही, मधु, सिद्धर्थक, फूलमाला, धूप, गोरोचन अञ्जन, तिल, ऋतुके उत्पन्न हुए मधुर फल और घी व खीरसे भरी हुई सरइयोंको इस समस्त सामग्रीके साथ अर्पण करे, प्रधान-वेदीके पश्चिममें जो वेदी हो उसकी ही पूजा करनी चाहिये, वही वेदी स्नानवेदी है ॥ ३४ ॥ ॥ ३५ ॥ ३६ ॥ समस्त मजबूत कलशोंके गलेमें सूत बांध, दुधारे वृक्षके पत्ते और फलसे ढककर उस वेदीके चारों कोनोंमें व्यवस्थासे रक्खे, सब कलशोंके पुष्यस्नानके विधानमें कहे हुए पदार्थों से मिले जलसे भरकर उसमें सब रत्न डाले, गर्गमुनिने जो पुष्यस्नानकी सामग्री कही है वह यह है-"कंगनी, त्रायमाण, अभया (हर्र) अपराजिता (कोयल), जीवा (वच), विश्वेश्वरी (सोंठ), पाठा (पाढ,) समंगा (परसन), (कोयल) भंग, सहा (ककुडी) (सहदेवी) (सह-देई), पूर्णकोशा (नागरमोथा), शतावरी, अरिष्टिका (रीठा), शिवा, भद्रा (मोथा), अजा (औषधिविशेष), क्षेमा (चोरनामक गन्धद्रव्य), ब्राह्मी (विमी), सर्वबीज, सुवर्ण, मंगलके द्रव्य, सब प्रकारकी औषधियें, रस, रत्न, सब प्रकारके गन्धद्रव्य, बैल, विकंकत (कंधी), प्रशस्त, नामक औषधि, सुवर्ण और मंगलमय जो कुछ द्रव्य पाये जांय वह समस्त इन कलशोंमें डालने चाहिये ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ जो बैल बहुत बूढा होकर मरा है, ऐसे उत्तम लक्षणवाले बैलके चर्मकी गर्दन पूर्वकी ओर करके प्रथम बिछावै ॥ ४३ ॥ फिर योद्धा बैलके लाल साबत चमडे बिछावे. उसके ऊपर सिंहका और उसके ऊपर व्याघ्रका चमडा बिछावे. जब पुष्य नक्षत्र और श्रेष्ठ मुहुर्त आवे तब यह चार प्रकारके चर्म उस वेदीपर बिछावे ॥ ४४ ॥ ४५ ॥ सुवर्ण, चांदी और तांवेका बना हुआ सुन्दर आसन या दुधारे वृक्षके काठका बना हुआ हुआ सुन्दर आसन इन चमडोंके ऊपर बिछावे. इस आसनकी ऊँचाई तीन प्रकारकी होती है- एक हाथ, सवा हात और डेढ हाथ सब आसन इस प्रकार कहे अनुसार ऊँचे हों और बिछे तो राज्य के चाहनेवाले समस्त राजाओंको माण्डलिकान्तरजित् अर्थात् जयशील और शुभदायी होते हैं ॥ ४६ ॥ ४७ ॥ श्रेष्ठ मनवाला राजा स्वर्णसे ढककर सचिव, आप्त, पुरोहित, दैव, पौर और कल्याण नामसे घिरकर उस आसनपर बैठे ॥ ४८ ॥ बन्दिजन, और पुरवासियोंकी उत्सव-ध्वनि, ब्राह्मणोंके द्वारा उच्चारण किया हुआ पुण्यशब्द और मृदंग, शंख व तुर्रहीका मंगलशब्द राजाके अनिष्टका नाश करता है ॥ ४९ ॥ फिर साबत रेशमीन वस्त्र पहरनेवाले बलिदान और पूजाकारी राजाको कम्बलसे भली भांति ढककर, घृतपूर्ण कलशसे पुरोहित राजाको अभिषेक करे ॥ ५०॥ आठ अट्ठाईस या एक सौ आठ कलश हों कलश जितने अधिक होंगे उतनाही गुण अधिक बढेगा, इस विषयमें मुनिका कहा हुआ यह मंत्र है,-"आज्य (घी) ही परम तेज है, आज्यही, श्रेष्ट और पापका नाश करनेवाला है, आज्यही देवताओंका आहरा और समस्त लोक आज्यमें ही प्रतिष्ठित हो रहे हैं, हे राजन ! भौम, आन्तरिक्ष और दिव्य जो समस्त पाप आपको उपर स्थित हुए हैं, वह समस्त आज्यको छूकर नाशको प्राप्त होते हैं" ॥ ५१ ॥ ५२ ॥ ५३ ॥ फिर पुरोहित राजाके शरीरसे कम्बलको उतारकर फल और पुष्ययुक्त पुष्यस्नानके जलमें राजाका अभिषेक करे, उस विषयका मंत्र यह है-"ब्रह्मा, विष्णु, शम्भु, मरुद्गण, साध्य और जो देवता सिद्ध व पुरातन है वह तुम्हारा अभिषेक करे, आदित्य, वशु, रुद्र, वैद्योंमें श्रेष्ठ दोनों अश्विनी-कुमार, देवताओंकी माता अदिति, स्वाहा, सिद्धि, सरस्वती, कीर्ति, लक्ष्मी, धृति, श्री, सिनी-वाली, कुहू, दनु, सुरसा, विनता, कद्रु, देवताओंकी मातायें और दिव्य अप्सरायें यह सब तुम्हारा

अभिषेक करें, नक्षत्र, मुहुर्त, पक्ष, दिवा, रात्रि, सन्ध्या, संवत्सर, श्रेष्ठ दिन, कला, काष्ठा, क्षण और लव आदि कालके शुभ अंग तुम्हारा अभिषेक करें, विमानमें बैठनेवाले देवतागण, सागर, मनु, स्त्रियोंके साथ सातों ऋषि, समस्त ध्रुवस्थान, मरीचि, अत्रि, पुलह पुलस्त्य, ऋतु, अंगिरा भृगु, सनत्कुमार, सनक, सनन्दन, सनातन, दक्ष, जैगीषव्य, भगन्दर, एकत, द्वित, त्रित, जाबालि, कश्यप, दुर्विनीत, दुर्वासा, कण्व, कात्यायन, दीर्घतपा, मार्कण्डेय, शुनःशेफ, विदूरथ, ऊर्ध्व, संवर्त्तक, च्यवन, अत्रि, परासर, द्वैपायन, यवक्रीत, अनुजके साथ देवराज, शिष्य और भार्याके साथ और वेद पढनेवाले मुनिगण जो तपस्वी हैं समस्त पर्वत और वृक्ष, बेलें और पवित्र देवमन्दिर तुम्हारा अभिषेक करें। महाभागा नदी, नाग, किम्पुरुषगण, वानप्रस्थ धर्मावलम्बी और आकाशवासी महाभागवाले द्विजगण, प्रजापति, दिति, दैत्यकी माता, सब गायें, समस्त दिव्य वाहन, समस्त चराचर लोक, अग्निगण, पितृ, तारा, समस्त मेघ, आकाश, सब दिशायें, जल और बहुपुण्यसंकीर्तन, शुभदायी सर्व प्रकारके उत्पातोंको दूर करनेवाले जल तुम्हारा अभिषेक करें और तुमको कल्याण, आयु और आरोग्य दान करें" ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ ६६ ॥ ६७ ॥ ६८ ॥ ६९ ॥ ७० ॥ रुद्रों करके युक्त कौष्माण्ड, महारौहिण, कुबेरादि, मनोहर अथर्वकल्पके कहे हुए मंत्र यह मंत्र व और सब समृद्धियोंसे अभिषेक करें, "आपोहिष्ठा" आदि तीन ऋक्, और "हिरण्यवर्णादि" चार रुक् जप करे. फिर राजा स्नान करके दो कपासी वस्त्रोंको पहिरे ॥ ७१ ॥ ७२ ॥ उसके उपरान्त राजा पुण्याहवाचन और शंखशब्दसे आचमन करके देव, गुरु और ब्राह्मणोंकी पूजा करनेके पश्चात् छत्र, ध्वज और समस्त शस्त्रोंका अपनी पूजामें करे ॥ ७३ ॥ "आयुष्यं वर्च्चस्यं रायस्पोषाः" अलंकारोंपर इन ऋचोंका जप करनेसे राजा विजयके नये अलंकार धारण करे ॥ ७४ ॥ फिर राजा दूसरी वेदीमें जाकर पहले कहे हूए सब चमडोंके ऊपर बैठे. आगे कहे हुए चर्म ऊपर ऊपर देना चाहिये ॥ ७५ ॥ बैल, बिलाव, रुरु; पृषत् (हरिण), सिंह और व्याघ्रका चर्म एकके ऊपर एक इस प्रकारसे रखे ॥ ७६ ॥ पुरोहितको चाहिये कि वेदीके मध्यमें शम्भु, इन्द्र, बृहस्पति, नारायण और वायुके ऋक् करके समिध तिल और घृतकी अग्निसे आहुति दे ॥ ७७ ॥ इन्द्रध्वजके अध्यायमें कहे हुए अग्निके सब निमित्त दैवज्ञ कहे और सबको समाप्त करके पुरोहित हाथ जोड़कर कहे–"हे देवताओं ! आप सब देवता राजासे पूजा प्राप्त करके महान् सिद्धि देकर पुनः आगमनके लिये गमन करें" ॥ ७८ ॥ ७९ ॥ फिर राजाको चाहिये कि दैवज्ञ और पुरोहितको बहुतसा धन देकर पूजा करे, दक्षिणा योग्य और श्रोतिय आदिको यथायोग्य पूजे ॥ ८० ॥ प्रजाओंको अभय आघात (वधके) स्थानमें गये हूए पशुओंको छोड़कर, अभ्यन्तर दीष करनेवालेके सिवाय और सबके बन्धन छोडकर देवे ॥ ८१ ॥ हरेक पुष्यनक्षत्रमें सुख, यश और धनकी बढानेवाली यह शान्ति करनी चाहिये. जो पूषमासकी पूर्णिमामें पुष्य नक्षत्र न हो तो वह आधे फलकी देनेवाली है. इसमें जो शान्ति करनी चाहिये सो पहिले कही है ॥ ८२ ॥ राज्यमें उत्पात या और प्रकारके उपसर्ग हों अथवा राहु केतुके दर्शनसे या ग्रहोंके सतानेपर पुष्यस्नान करना चाहिये ॥ ८३ ॥ इस पृथ्वीमें ऐसा कोई उत्पात नहीं है, जो इस शान्तिसे दूर न हो जाय और ऐसा अमंगलभी नहीं, है, जो इस शान्तिको लांघनेमें समर्थ होवे ॥ ८४ ॥ इस कारण राज्यपर बैठनेकी इच्छा करनेवाले, पुत्रका जन्म चाहनेवाले राजाके लिये अभिषेककी यह विधिही सबसे पहले श्रेष्ठ है ॥ ८५ ॥ बडी कीर्तिवाले बृहस्पतिजीने इन्द्रके लिये इसको कहा है. यह उत्तम पुष्यस्नानविधि आयुः-

प्रजाको बढानेवाली और सौभाग्यकी बढानेवाली है ।। ८६ ।। जो राजा इस विधानसे हाथी और घोडोंको स्नान कराता है, पाप छूटकर उसको श्रेष्ठ सिद्धि प्राप्त होती है ।। ८७ ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायामष्टचत्वारिंशोऽध्यायः ।।४८।।

अथैकोनपंचाशत्तमोऽध्यायः

पट्टलक्षणम्

विस्तरशो निर्दिष्टं पट्टानां लक्षणं यदाचार्यैः । तत्संक्षेपः क्रियते मयात्र सकलार्थसम्पन्नः ।।१।। पट्टः शुभदो राज्ञां मध्येऽष्टावंगुलानि विस्तीर्णः । सप्त नरेन्द्रमहिष्याः षड् युवराजस्य निर्दिष्टः ।।२।। चतुरंगुलविस्तारः पट्टः सेनापतेर्भवति मध्ये । द्वे च प्रसादपट्टः पञ्चैते कीर्तिताः पट्टाः ।।३।। सर्वे द्विगुणायामा मध्यादर्धेन पार्श्वविस्तीर्णाः । सर्वे च शुद्धकाञ्चनविनिर्मिताः श्रेयसो वृद्ध्यै ।।४।। पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजपार्थिवमहिष्योः । एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया ।।५।। क्रियमाणं यदि पत्रं सुखेन विस्तारमेति पट्टस्य । वृद्धिजयौ भूमिपतेस्तथा प्रजानां च सुखसम्पत् ।।६।। जीवितराज्यविनाशं करोति मध्ये व्रणः समुत्पन्नः । मध्ये स्फुटितस्त्याज्यो विघ्नकरः पार्श्वयोः स्फुटितः ।।७।। अशुभनिमित्तोत्पत्तौ शास्त्रज्ञः शान्तिमादिशेद्राज्ञः । शस्तनिमित्तः पट्टो नृपराष्ट्रविवृद्धये भवति ।।८।। इति श्रीवराहमिहिरकृतौबृहत्सं० पट्टलक्षणंनामैकोनपञ्चाशत्तमोऽध्यायः ।।४९।।

आचार्योंने विस्तारसे पट्टके जो लक्षण कहे हैं, सर्व अर्थवाले वही लक्षण संक्षेपसे कहे जाते हैं ।। १ ।। बीचसे आठ अंगुलके विस्तारवाला मुकुट राजाओंको शुभदायी होता है; सात अंगुल विस्तारवाला हो तो रानीको और छः अंगुलके विस्तारवाला हो तो युवराजको शुभ होता है ।। २ ।। बीचमें चार अंगुलके विस्तारवाला मुकुट सेनापतिको शुभदायी होता है, दो अंगुलके विस्तारवाला पट्ट प्रसाद-मुकुट कहा जाता है. यह पांच प्रकारके मुकुट कहे गये ।। ३ ।। समस्त मुकुटही विस्तारसे दूने दीर्घ हों और उनका पार्श्व विस्तारसे आधा हो, समस्त शुद्ध कांचनके बने हों तो शुभको बढाते हैं ।। ४ ।। पांच शिखावाला मुकुट राजाको, तीन शिखावाला मुकुट युवराज और रानीको और एक शिखावाला मुकुट सेनापतिको शुभदायी है और विना शिखा का प्रसाद-मुकुट भी शुभदायी होता है ।।५।। जो मुकुट के बनाये हुए पत्र सुखसे फैल जायँ तो राजाकी वृद्धि व जय और प्रजाको सुख सम्पत्तिकी प्राप्ति होती है ।। ६ ।। पत्रमें दाग हों तो जीव और राज्यका नाश हो और बीचमें फूटा हुआ हो तो त्याग कर देना उचित है, उसकी दोनों बगलें फटीं हों तो विघ्नकारी होता है ।। ७ ।। इस प्रकार अशुभ निमित्तकी उत्पत्तिमें शास्त्रके जाननेवाले शान्तिकी आज्ञा दें, जिस मुकुटमें किसी प्रकारके अशुभ चिह्न नहीं होते, उसके धारण करनेसे राजाका राज्य बढता है ।। ८ ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्ररचितायां हिन्दीटीकायांमेकोनपंचाशत्तमोऽध्यायः ।। ४९ ।।

अथ पंचाशत्तमोऽध्यायः

खड्गलक्षणम्

अंगुलशतार्धमुत्तम ऊनः स्यात्पञ्चविंशति खड्गः। अंगुलमानाज्ज्ञेयो व्रणोऽशुभो विषमपर्वस्थः ॥१॥ श्रीवृक्षवर्द्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम्। सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानां च ॥२॥ कृकलासकाककङ्ककव्यादकबन्धवृश्चिकाकृतयः। खड्गे व्रणा न शुभदा वंशानुगाः प्रभूताश्च ॥३॥ स्फुटितो ह्रस्वः कुण्ठो वंशच्छिन्नो न दृङ्मनोऽनुगतः। अस्वन इति चानिष्टः प्रोक्तविपर्यस्त इष्टफलः ॥४॥ क्वणितं मरणायोक्तं पराजयाय प्रवर्तनं कोशात्। स्वयमुद्गीर्णे युद्धं ज्वलिते विजयो भवति खड्गे ॥५॥ नाकारणं विवृणुयान्न विघट्टयेच्च पश्येन्न तत्र वदनं न वदेच्च मूल्यम्। देशं न चास्य कथयेत् प्रतिमानयेच्च नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम् ॥६॥ गोजिह्वासंस्थानो नीलोत्पलवंशपत्रसदृशश्च। करवीरपत्रशूलाग्रमण्डलाग्राः प्रशस्ताः स्युः ॥७॥ निष्पन्नो न च्छेद्यो निकषैः कार्यः प्रमाणयुक्तः सः। मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने ॥८॥ यस्मिन्त्सरुप्रदेशे व्रणो भवेत्तद्वदेव खड्गस्य। वनितानामिव तिलको गुह्ये वाच्यो मुखे दृष्टा वा ॥९॥ अथवा स्पृशति यदङ्गं प्रष्टा निस्त्रिंशभृत्तदवधार्य। कोशस्थस्यादेश्यो व्रणोऽस्ति शास्त्रं विदित्वेदम् ॥१०॥ शिरसि स्पृष्टे प्रथमेऽङ्गुले द्वितीये ललाटसंस्पर्शे। भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे च ॥११॥ नासोष्ठकपोलहनुश्रवणग्रीवांसकेषु पञ्चाद्याः। उरसि द्वादशसंस्थस्त्रयोदशे कक्षयोर्ज्ञेयः ॥१२॥ स्तनहृदयोदरकुक्षीनाभीषु चतुर्दशादयो ज्ञेयाः। नाभीमूले कट्यां गुह्ये चैकोनविंशतितः ॥१३॥ ऊर्वोर्द्वाविंशे स्यादूर्वोर्मध्ये व्रणस्त्रयोविंशे। जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च ॥१४॥ जङ्घामध्ये गुल्फे पार्ष्ण्यां पादे तदंगुलीष्वपि च। षड्विंशतिकाद्यावत्त्रिंशदिति मतेन गर्गस्य ॥१५॥ पुत्रमरणं धनाप्तिर्धनहानिः सम्पदश्च बंधश्च। एकाद्यंगुलसंस्थैर्व्रणैः फलं निर्दिशेत् क्रमशः ॥१६॥ सुतलाभः कलहो हस्तिलब्धयः पुत्रमरणधनलाभौ। क्रमशो विनाशवनिताप्तिचित्तदुःखानि षट्प्रभृति ॥१७॥ लब्धिर्हानिस्त्रीलब्धयो वधो वृद्धिमरणपरितोषाः। ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात् ॥१८॥ वित्ताप्तिरनिर्वाणं धनागमो मृत्युसंपदोऽस्वत्वम्। ऐश्वर्यमृत्युराज्यानि च क्रमात्त्रिंशदिति यावत् ॥१९॥ परतो न विशेषफलं विषमसमुत्थास्तु पापशुभफलदाः। कैश्चिदफलाः प्रदिष्टास्त्रिंशत्परतोऽग्रमिति यावत् ॥२०॥ करवीरोत्पलगजमदघृतकुंकुमकुन्दचम्पकसगन्धः। शुभदोऽनिष्टो गोमूत्रपङ्कमेदःसदृशगन्धः ॥२१॥ कूर्मवसासृक्क्षारोपमश्च भयदुःखदो भवति गन्धः। वैदूर्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकरः ॥२२॥ इदमौशनसं च शस्त्रपानं रुधिरेण श्रियमिच्छतः प्रदीप्ताम्। हविषा गुणवत्सुताभिलिप्सोः सलिलेनाक्षयमिच्छतश्च वित्तम् ॥२३॥ वडवोष्ट्रकरे-

णुदुग्धपानं यदि पापेन समीहतेऽर्थसिद्धिम् । झषपित्तमृगाश्ववस्तुदुग्धैः करिहस्तच्छिदये सतालगर्भैः ॥२४॥ आर्कंपयो हुडुविषाणमषीसमेतं पारावताखुशकृता च युतं प्रलेपः । शस्त्रस्य तैलमथितस्य ततोऽस्य पानं पश्चाच्छितस्य न शिलासु भवेद्विघातः ॥२५॥ क्षारे कदल्या मथितेन युक्ते दिनोषिते पायितमायसं यत् । सम्यक् छितं चाश्मनि नैति भङ्गं न चान्यलोहेष्वपि तस्य कौण्ठ्यम् ॥२६॥

इति श्रीवराहमिहिरकृतौ बृहत्सं० खङ्गलक्षणं नाम पञ्चाशत्तमोऽध्यायः ॥५०॥

पचास अंगुलके प्रमाणका खङ्ग उत्तम है, पच्चीस अंगुलके परिणामका खङ्ग अधम है. अंगुलिके परिमाणसे इसमें व्रणको जानना चाहिये, यदि विषम अंगुलिके परिमाणमें अर्थात् ३।५।७।९ आदिमें व्रण हो तो अशुभ है ॥ १ ॥ श्रीवृक्ष, वर्द्धमान, आतपत्र, शिवलिङ्ग, कुंडल, कमल, ध्वज, आयुध और स्वस्तिकका समान दाग शुभदायी है ॥ २ ॥ गिरगिट, काक, गिद्ध, क्रव्याद, कबन्ध वा बिच्छूके आकारका अथवा बांसके समान बहुतसे दागवाला खङ्ग शुभदायी नहीं होता ॥ ३ ॥ फूटा हुआ, छोटा, खुटला, वंशछिन्न, दृष्टि और मनको न अच्छा लगने वाला और शब्दरहित खङ्ग अनिष्टकारी है, इससे विपरीत हो तो इष्टफलका देनेवाला है ॥४॥ अचानक खङ्गमेंसे शब्द हो तो मरणका कारण है, म्यानसे खटखटाने पर पराजय, स्वयं म्यानसे निकल पडे तो युद्ध और प्रकाशमान हो तो विजय होती है ॥ ५ ॥ राजाको चाहिये कि वृथा खङ्गको न म्यानसे निकाले या न हिलावे डुलावे, उसमें मुख न देखे, उसका मूल्य न कहे इसकी उत्पत्तिका देश न बतावे और अपवित्र होकर उसको नहीं छुए ॥ ६ ॥ गायकी जीभके समान आकारवाला, नीले कमल और वंशके पत्रके समान, कनेरके पत्तेके समान, शूलाग्र और मंडलाग्र यही सब खड्ग अच्छे हैं ॥ ७ ॥ ऊपर कहे हुए प्रमाणवाले खड्गोंका कसौटीसे परीक्षा करना या काटना उचित नहीं है, खङ्गकी नोक टूट जाय तो खङ्गके स्वामीकी और मूठ टूट जाय तो खड्ग के मालिककी माता मरे ॥ ८ ॥ जिस प्रकार स्त्रियों के मुखपर तिल देखकर उनके गुप्तस्थानमें भी तिल कहे जा सकते हैं, वैसेही खड्गकी मूठमें हुए दागोंको देखकर खड्गमें व्रण कहे जा सकते हैं ॥ ९ ॥ खड्गधारी पूछनेवाला (इस खड्गके किस स्थानमें व्रण है बताओ ऐसा पूछकर) जिस अंगको छुए दैवज्ञ उसका निश्चय करके इस शस्त्रज्ञानके शास्त्रके अनुसार स्थानमें पडे हुए खङ्गमें कहां २ व्रण हैं सो बता सकेगा ॥ १० ॥ जो पूछनेके समय प्रश्नका करनेवाला मस्तकको छुए तो कहना चाहिये कि खङ्गके प्रथम अंगुलमें व्रण है, ललाट छुए तो दूसरे अंगुलमें, भौंवोके बीचमें छुए तो तीसरे अंगुलमें, नेत्रोंको छुए तो चौथे अंगुलमें व्रणका होना कहना चाहिये ॥ ११ ॥ जो प्रश्न करनेवाला नासिका ओठ, गाल, ठोडी, कान, गरदन या अंसकन्ध स्थानोंको छुए तो क्रमसे पांचवें, छठे, सातवें, आठवें, नववें, दशवें और ग्यारहवें अंगुलमें व्रणका होना बताना चाहिये, उसके छूनेसे बारह अंगुलमें और दोनो कोखोंके छूनेसे तेरह अंगुलके स्थानमें व्रणका होना बतावे ॥ १२ ॥ स्तन, हृदय, उदर, कोख या नाभीका स्पर्श करने से क्रमानुसार चौदहसे लेकर अठारह अंगुलतकके स्थानमें व्रण बतावे. नाभिकी जडमें, कमर या गुह्यस्थानके स्पर्श करनेसे क्रमानुसार उन्नीस वीस और इक्कीस अंगुलमें व्रण होता है ॥ १३ ॥ दोनों ऊरुके स्पर्श करनेसे २२ वें अंगुल में और दोनों ऊरुओंका मध्य स्थान स्पर्श करनेसे २३ वें अंगुलमें व्रण होता है, जानुके स्पर्शसे २४ और जंघाके स्पर्शसे २५ अंगुलमें व्रण होता है ॥ १४ ॥ उस कालमें जो पूछनेवाला दो जांघोंके मध्यमें, टंकना, एडी पांव और पांवोंकी अंगुली इनमेंसे किसी अंगको स्पर्श करे तो क्रमानुसार

छब्बीस अंगुलसे लेकर तीस अंगुलतकके स्थानमें व्रणका होना निरूपण करे, यह गर्गाचार्यका मत कहा गया ।। १५ ।। जो खड्गका व्रण एक अंगुलसे लेकर पांच अंगुलतक हो तो क्रमानुसार यह फल होता है,—पुत्रमरण, धनलाभ, धनहानि, सम्पत्ति और बन्धन ।। १६ ।। पुत्रलाभ, क्लेश, हस्तिलाभ, पुत्रमरण धनलाभ, विनाश, स्त्रीप्राप्ति और चित्तको दुःख यह क्रमानुसार षडादि अंगुलके व्रणका फल है ।। १७ ।। लाभ, हानि, स्त्रीलाभ, वध, वृद्धि, मरण और संतोष यह फल क्रमानुसार चौदहसे लेकर २० अंगुलमें व्रण हो तो उसके फल जानने चाहिये, २१ अंगुल में व्रण होनेसे धनकी हानि होती है ।। १८ ।। धनकी प्राप्ति, अनिर्वाण, धनागम, मृत्यु, सम्पत्ति, निर्धनता, ऐश्वर्य, मृत्यु और राज्य यह फल क्रमशः बीस अंगुलसे लेकर तीस अंगुलि तक नौ अंगुलवाले व्रणका फल है ।। १९ ।। इसके पीछे और कोई फल नहीं कहा है तोभी विषम अंगुलमें व्रणका होना अशुभ फल और सममें होनेसे शुभ फल देता है और कोई कहते हैं कि तीस अंगुलके पश्चात् शेषतक किसी स्थानमें व्रण हो तो किसी प्रकारका विशेष फल नहीं होता ।। २० ।। कनेर, उत्पल, हाथीका मद, घी, कुंकुम, कुन्द, या चम्पाके समान गन्धवाला खड्ग हो तो शुभ फलदायी होता है, परन्तु गोमूत्र पंक, या मेदकी समान गन्ध आती हो तो अनिष्टकारी होता है ।। २१ ।। कूर्म, बसा, रक्त या क्षारके समान गन्ध आनेसे भय और दुःखका देनेवाला होता है जो खड्गमें बैदूर्य, सुवर्ण और बिजलीके समान चमक हो तो जय और आरोग्यका बढानेवाला होता है ।। २२ ।। जिनको लक्ष्मी प्राप्त करनेकी इच्छा है, उनको अपने शस्त्रोंका रुधिरसे पान देना चाहिये । गुणवान पुत्र प्राप्त करनेकी इच्छा करनेवालेके शस्त्रपर घृतसे पान देने और अक्षय वित्त चाहनेवालेके खड्गपर जलका पान होना चाहिये ऐसा शुक्राचार्यके बनाये शास्त्र-का मत है ।। २३ ।। जो घोडी, ऊंटनी और हथनीके दूधसे पान दी जाय तो पापकार्यसे भली भांति अर्थकी सिद्धि होती है, मत्स्यपित्त, मृग, अश्व और छाग दुग्धके साथ तालमेथीके रसमें पान देनेसे हाथीकी शुंडभी काट डाली जा सकती है ।। २४ ।। पहिले शस्त्रपर तेल मले फिर आग वृक्षका गोंद, मेषके सींगकी भस्म और कबूतर व चूहेके बीट मिलाकर शस्त्रके ऊपर लेप करे, फिर उसको तेज करके पत्थरके भी ऊपर मारे तो भी उसकी धार नहीं टूटती है ।। २५ ।। कदली वृक्षका (मूलका) क्षार और मट्ठा मिलाकर एक दिन रख छोडे फिर लोहेका बना हुआ खड्ग उसको पिये, फिर उस खड्गको शान देकर पत्थर पर भी मारे तो वह नहीं टूटेगा और लोहे पर भी मारनेसे वह खड्ग खुटला नहीं होगा ।। २६ ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिंन्दीटीकायां पंचाशत्तमोऽध्यायः ।। ५० ।।

अथैकपंचाशत्तमोऽध्यायः

अंगविद्या[1]

दैवज्ञेन शुभाशुभं दिगुदितस्थानाहृतानीक्षता वाच्यं प्रष्टृनिजापराङ्गघटनां चालोक्य कालं धिया। सर्वज्ञो हि चराचरात्मकतयासौ सर्वदर्शी विभुश्चेष्टाव्याहृतिभिः शुभाशुभफलं सन्दर्शयत्यर्थिनाम् ॥१॥ स्थानं पुष्पसुहासिभूरिफलभृत्सुस्निग्धकृत्तिच्छदासत्पक्षिच्युतशस्तसंज्ञिततरुच्छायोपगूढं समम्। देवर्षिद्विजसाधुसिद्धनिलयं सत्पुष्पसस्योक्षितं सत्स्वादूदकनिर्मलत्वजनिताह्लादं च सच्छाड्वलम् ॥२॥ छिन्नभिन्नकृमिखातकण्टकिप्लुष्टरूक्षकुटिलैर्न सत् कुजैः। क्रूरपक्षियुतनिन्द्यनामभिः शुष्कशीर्णबहुपर्णमर्मभिः ॥३॥ श्मशानशून्यायतनं चतुष्पथं तथा मनोज्ञं विषमं सदोषरम्। अवस्कराङ्गारकपालभस्मभिश्चितं तुषैः शुष्कतृणैर्न शोभनम् ॥४॥ प्रव्रजितनग्नापितरिपुबन्धनसूनिकैस्तथा श्वपचैः। कितवयतिपीडितैर्युतमायुधमाध्वीकविक्रयैर्न शुभम् ॥५॥ प्रागुत्तरेशाश्च दिशः प्रशस्ताः प्रष्टुर्न वाय्वम्बुयमाग्निरक्षः। पूर्वाह्णकालेऽस्ति शुभं न रात्रौ सन्ध्याद्वये प्रश्नकृतोऽपराह्णे ॥६॥ यात्राविधाने हि शुभाशुभं यत् प्रोक्तं निमित्तं तदिहापि वाच्यम्। दृष्ट्वा-पुरो वा जनताहृतं वा प्रष्टुः स्थितं पाणितलेऽथ वस्त्रे ॥७॥ अथाङ्गान्यूर्वोष्ठस्तनवृषणपादं च दशना भुजौ हस्तौ गण्डौ कचगलनखांगुष्ठमपि यत्। सशंखंकक्षांसश्रवणगुदसंधीति पुरुषे स्त्रियां भ्रूनासास्फिग्वलिकटिसुलेखांगुलिचयम् ॥८॥ जिह्वा ग्रीवा पिण्डिके पार्ष्णियुग्मं जंघे नाभिः कर्णपाली कृकाटी। वक्त्रं पृष्ठं जत्रुजान्वस्थिपार्श्वं हृत्ताल्वक्षी मेहनोरस्त्रिकं च ॥९॥ नपुंसकाख्यं च शिरो ललाटमास्याद्यसंज्ञेरपरैश्चिरेण। सिद्धिर्भवेज्जातु नपुंसकैर्नो रूक्षक्षतैर्भग्नकृशैश्च पूर्वैः ॥१०॥ स्पष्टे वा चालिते वापि पादांगुष्ठेऽक्षिरुग्भवेत्। अंगुल्यां दुहितुः शोकं शिरोघाते नृपाद्भयम् ॥११॥ विप्रयोगमुरसि स्वगात्रतः कर्पटाहृतिरनर्थदा भवेत्। स्यात्प्रियाप्तिरभिगृह्य कर्पटं पृच्छतश्चरणपादयोजितुः ॥१२॥ पादांगुष्ठेन विलिखेद्भूमिं क्षेत्रोत्थचिन्तया। हस्तेन पादौ कण्डूयेत्तस्य दासीमया च सा ॥१३॥ तालभूर्जपटदर्शनेऽशुकं चिन्तयेत्कचतुषास्थिभस्मगम्। व्याधिराश्रयति रज्जुजालकं वल्कलं च समवेक्ष्य बंधनम् ॥१४॥ पिप्पलीमरिचशुण्ठिवारिदै रोध्रकुष्ठवसनाम्बुजीरकैः। गन्धमांसिशतपुष्पया वदेत् पृच्छतस्तगरकेण चिन्तनम् ॥१५॥ स्त्रीपुरुषदोषपीडितसर्वाध्वसुतार्थधान्यतनयानाम्। द्विचतुष्पदक्षिणीतीनां विनाशतः कीर्तितैर्दृष्टैः ॥१६॥

---

१ अंगविद्यापिटकलक्षणं चेतिद्वावध्यायौ न सर्वदादिसम्मतौ। यतोऽङ्गविद्याप्रारंभे, अतः केचिदङ्गविद्यां पठन्ति। आचार्येण प्रागेवोक्तं 'वास्तुविद्याङ्गविद्येति' तस्मादस्माभिर्व्याख्यायते' इति, पिटकलक्षणप्रारंभे च "–अतः परमपि केचित् पिटकलक्षणं पठन्ति। तदप्यस्माभिर्व्याख्यायते' इति टीकाकृता महोत्पलेनोक्तम्। तेनाध्यायसंख्या च न कृता।

न्यग्रोधमधुकतिन्दुकजम्बूप्लक्षाम्रबदरिजातिफलैः । धनकनकपुरुषलोहांशुकरूप्योदुम्बराप्तिरपि करगैः ॥१७॥ धान्यपरिपूर्णपात्रं कुम्भः पूर्णः कुटुम्बवृद्धिकरौ। गजगोशुनां पुरीषं धनयुवतिसुहृद्विनाशकरम् ॥१८॥ पशुहस्तिमहिषपङ्कजरजतव्याघ्रैर्लभेत सन्दृष्टैः। अविधननिवसनमलयजकौशेयाभरणसंघातम् ॥१९॥ पृच्छा वृद्धश्रावकसुपरिव्राड्दर्शने नृभिर्विहिता। मित्रद्यूतार्थंभवा गणिकानृपसूतिकार्थंकृता ॥ २० ॥ शाक्योपाध्यायार्हतनिर्ग्रन्थनिमित्तनिगमकैवर्तैः। चौरचमूपतिवणिजां दासीयोद्धापणस्थवध्यानाम् ॥२१॥ तापसे शौण्डिके दृष्टे प्रोषितः पशुपालनम्। हृद्गतं पृच्छकस्य स्यादुञ्छवृत्तौ विपन्नता ॥२२॥ इच्छामि प्रष्टुं भण पश्यत्वार्य समादिशेत्युक्ते। संयोगकुटुंबोत्था लाभैश्वर्योद्गता चिन्ता ॥ २३ ॥ निर्दिशेति गदिते जयाध्वगा प्रत्यवेक्ष्य मम चिन्तितं वद। आशु सर्वजनमध्यगं त्वया दृश्यतामिति बन्धुचौरजा ॥२४॥ अन्तःस्थेऽङ्गे स्वजन उदितो बाह्यजे बाह्य एवं पादांगुष्ठांगुलिकलनया दासदासीजनः स्यात्। जंघे प्रेष्यो भवति भगिनी नाभितो हृत्स्वभार्या पाष्र्ण्यंगुष्ठांगुलिचयकृतस्पर्शने पुत्रकन्ये ॥२५॥ मातरं जठरे मूर्ध्नि गुरुं दक्षिणवामकौ। बाहू भ्राताथ तत्पत्नी स्पृष्ट्वैवं चौरमादिशेत् ॥२६॥ अन्तरङ्गमवमुच्य बाह्यांगस्पर्शनं यदि करोति पृच्छकः। श्लेष्ममूत्रशकृतस्त्यजन्नधः पातयेत्करतलस्थवस्तु चेत् ॥२७॥ भृशमवनमिताङ्गपरिमोटनतोऽप्यथवाजनधृतरिक्तभाण्डमवलोक्य च चौरजनम्। हृतपतितक्षतास्मृतविनष्टभग्नगतोन्मुषितमृताद्यनिष्टरवतो लभते न हृतम् ॥ २८ ॥ निगदितमिदं यत्तत्सर्वं तुषास्थिविषादिकैः सह मृतिकरं पीडार्तानां समं रुदितक्षुतैः। अवयवमपि स्पृष्टवान्तःस्थं दृढं मरुदाहरेदतिबहु तदा भुक्त्वान्नं संस्थितः सुहितो वदेत् ॥ २९ ॥ ललाटस्पर्शनाच्छूकदर्शनाच्छालिजौदनम्। उरःस्पर्शात् षष्टिकान्नं ग्रीवास्पर्शे च यावकम् ॥३०॥ कुक्षिकुचजठरजानुस्पर्शे माषाः पयस्तिलयवाग्वः। आस्वादयतश्चौष्ठौ लिहतो मधुरं रसं ज्ञेयम् ॥३१॥ विस्पृक्के स्फोटयेज्जिह्वामाम्ले वक्त्रं विकूणयेत्। कटुतिक्तकषायोष्णैर्हिक्केत् ष्ठीवेच्च सैन्धवे ॥३२॥ श्लेष्मत्यागे शुष्कतिक्तं तदल्पं श्रुत्वा क्रव्यादं प्रेक्ष्य वा मांसमिश्रम्। भ्रूगण्डौष्ठस्पर्शने शाकुनं तद् भुक्तं तेनेत्युक्तमेतन्निमित्तम् ॥३३॥ मूर्द्धगलकेशहनुंशंखकर्णजङ्घं बस्तिं च स्पृष्ट्वा। गजमहिषमेषशूकरगोशशमृगमांसयुग्भुक्तम् ॥३४॥ दृष्टे श्रुतेऽप्यशकुने गोधामत्स्यामिषं वदेद्भुक्तम्। गर्भिण्या गर्भस्य च निपतनमेवं प्रकल्पयेत्प्रश्ने ॥३५॥ पुंस्त्रीनपुंसकाख्ये दृष्टेऽनुमिते पुरःस्थिते पृष्ठे। तज्जन्म भवति पानान्नपुष्पफलदर्शने शुभम् ॥३६॥ अंगुष्ठेन भ्रूदरं वागुलिं वा स्पृष्ट्वा पृच्छेद्गर्भचिन्ता तदा स्यात्। मध्वाज्याद्यैर्हेमरत्नप्रवालैरप्रस्थैर्वा मातृधात्र्यात्मजैश्च ॥३७॥ गर्भयुता जठरे करगे स्याद् दुष्टनिमित्तवशात्तदुदासः। कर्षति तज्जठरं यदि पीठोत्पीडनतः करगे च करेऽपि॥३८॥घ्राणाया

दक्षिणे द्वारे स्पृष्टे मासोत्तरं वदेत् । वामे द्वौ कर्णं एवं वा द्विचतुर्थः श्रुतिस्तने ॥३९॥ वेणीमूले त्रीन् सुतान् कन्यके द्वे कर्णे पुत्रान् पञ्च हस्ते त्रयं च । अगुष्ठान्ते पञ्चकं चानुपूर्व्या पादांगुष्ठे पार्ष्णियुग्मेऽपि कन्याम् ॥४०॥ सव्यासव्योरुसंस्पर्शे सूते कन्ये सुतद्वयम् । स्पृष्टे ललाटमध्यान्ते चतुस्त्रितनया भवेत् ॥४१॥ शिरोललाटभ्रू कर्णगण्डहनुरदा गलम् । सव्यापसव्यस्कन्धश्च हस्तौ चिबुकनालकम् ॥ ४२ ॥ उरः कुचं दक्षिणमप्यसव्यं हृत्पार्श्वमेवं जठरं कटिश्च । स्फिक्पायुसन्ध्यूरुयुगं च जानुजंघेऽथ पादाविति कृत्तिकादौ ॥४३॥ इति निगदितमेतद्गात्रसंस्पर्शलक्ष्म प्रकटमभिमताप्त्यै वीक्ष्य शास्त्राणि सम्यक् । विपुलमतिरुदारो वेत्ति यः सर्वमेतन्नरपतिजनताभिः पूज्यतेऽसौ सदैव ॥४४॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायामङ्गविद्यानामैकपञ्चाशत्तमोऽध्यायः ॥५१॥

शास्त्रोंमें कहा हुआ दिशाओंका ज्ञान लाये हुए पदार्थोंके देखनेवाले ज्योतिषीलोग प्रश्न करनेवालेका अंग, अपना अंग और दूसरेके अंगोंकी घटना देखकर बुद्धिसे शुभ व अशुभ फलको कह सकते हैं. स्थावर जङ्गमादि पदार्थोंका जिनको भलीभांतिसे ज्ञान है, इससे दैवज्ञ सर्वज्ञानी, सब कुछ देखनेवाला, विभु अर्थात् नारायणजीके समान है. क्योंकि इसी चेष्टा और सम्भाषणके करनेसे अर्थ चाहनेवाले पुरुषोंके शुभाशुभ फल दिखाते हैं ॥ १ ॥ जो स्थान फूलरूपी सुन्दर मुसुकाने युक्त है, बहुतसे फलोंसे भरा हुआ, चिकनी छालवाले, बुरे पक्षियोंसे शून्य, श्रेष्ठ नामको प्राप्त हुए वृक्षोंसे युक्त है, बराबर है, जो देवता, ऋषि, द्विज और सिद्धोंके रहनेकी वासभूमि है, जहांपर श्रेष्ठ पुरुष और धान्य व्याप्त हैं, स्वादिष्ट जलकी निर्मलता करके उत्पन्न हुए हर्षसे युक्त सुन्दर नवीन तिनकोंके लगे रहनेसे हरे वर्णवाला स्थानही प्रश्न करनेके लिये शुभदायी है ॥ २ ॥ जिस स्थानमें छिन्नभिन्न कीडोंके खाये, कांटेदार, जले हुए, रूखे और कुटिल वृक्ष लगे हों, जो स्थान क्रूर पक्षिओंसे घिरा हुआ हो, बुरे नामवाले, दुबले, बहुत सारे पत्तेही हैं मानों जिनका मर्म ऐसे वृक्ष लगे हों, वह स्थान अशुभ है ॥ ३ ॥ जो स्थान चौराहा मसानके समान सूने गृहसे युक्त, मनको न भानेवाला, टेढा, सदा ऊपर रहनेवाला, जहाँ किसीका वास न हो, कोयला, आदमीकी खोपडी और सूखे तिनकोंसे व्याप्त है सो शुभदायी नहीं होता है ॥ ४ ॥ गोसांई, नागा, नाई, शत्रु, बन्धन, कसाई, चाण्डाल, शठ, यति और पीडित लोगोंसे जो स्थान युक्त है और आयुध और मद्यकी विक्रीका जो स्थान है सो शुभकारी नहीं है ॥ ५ ॥ पूर्व, उत्तर, ईशानकोण प्रश्न करनेवालेके लिये श्रेष्ठ हैं, परन्तु वायु, पश्चिम, दक्षिण और नैर्ऋत दिशा अच्छी नहीं है. रात्रिकाल, दोनों सन्ध्या और अपराह्णमें प्रश्न करना शुभ नहीं होता ॥ ६ ॥ यात्राकी विधिमें जो शुभाशुभ निमित्त कहे गये हैं, पूछनेवालेके सामने लाये हुए, या उनके हाथ वस्त्रके चिह्न देखकर उनका शुभाशुभ करना चाहिये ॥७॥ ऊरु, होंठ, स्तन, अंडकोश, पांव, दांत, भुजा, हाथ, कपोल, केश, गला, नख, अंगूठा, शंख, कन्धा, कान, गुदा जोडके स्थान यह पुरुषसंज्ञावाची शब्द हैं. भौं, नासिका. स्फिक् (कमरका मांस पिंड), कमर और सुन्दर रेखावाली अंगुलियें स्त्रीनामवाची हैं और जीभ, गर्दन, पिंडिक (पिंडलिये), एडियें, जांघ, नाभि, कर्णपाली, कृकाटी (घेंटू) घोंटी, वदन, पीठ, हँसली, जानु, अस्थिपार्श्व, हृदय, तालु, नेत्र, लिंग, छाती त्रिक (कमरके) बांसके नीचेकी तीन हड्डियां, मस्तक और ललाट यह अंग नपुंसकसंज्ञावाची हैं, आस्यादि

(मुखादि) छुए जांय तो विलम्बसे सिद्धि होती है, जो पहले कहे हुए अंग रूखे, क्षत, टूटे हुए या, दुबले हों तो इनके छुए जाने और नपुंसक अंगोंके छुए जानेसे कदापि सिद्धि नहीं होती ॥ ८॥ ९ ॥ १० ॥ पांवका अंगूठा छुआ जाय या हिलाया जाय तो प्रश्न करनेवालेको नेत्ररोग हो, अंगुलिके आघात करे तो बेटीको शोक और शिरपर आघात होनेसे नृपभय होता है ॥११॥ प्रश्न करने-वाला छातीको छुए तो प्रियवियोग होता है, अपने अंगसे कोई वस्त्र उतार ले तो अनर्थ होता है, परन्तु यदि उससे वस्त्र ग्रहण करके पीछेकी ओरको जाय (पीछेको) तो उसको प्यारेकी प्राप्ति हो ॥ १२ ॥ खेतकी चिन्ता हो तो प्रश्न करनेवाला पांवके अंगूठेसे पृथ्वीपर कुरेदे और दोनों पांवोंको खुजावे तो उसको दासीकी चिन्ता होगी ॥ १३ ॥ ताल या भोजपत्रके देखनेसे अथवा केश, तुषा, अस्थि व भस्मागत द्रव्योंको देखनेसे वस्त्रकी चिन्ता होती है, रस्सीका जाल देखनेसे व्याधि होती है, वल्कल देखनेसे बन्धन होता है ॥ १४ ॥ जो प्रश्न करनेके समय पीपल, मिर्च, सोंठ, मोथा, लोध, कूट, वस्त्र, नेत्रवाला, जीरा, बालछड. सोंफ और तगरका फूल कहा जाय या इनमेंसे किसीका दर्शन हो तो क्रमानुसार स्त्रीदोषनाश, पुरूषदोषनाश, पीडितनाश, सत्यानाश, मार्गका नाश, सुतका नाश, धनका नाश, धान्यका नाश, पुत्रनाश, दुपायोंका नाश, चौपायोंका और पृथ्वीके नाशकी चिन्ता कहनी चाहिये ॥ १५ ॥ १६ ॥ जो प्रश्न करनेके समय प्रश्नकर्त्ता के हाथमें बड, महुआ, तेन्दू, जामन, पिपलखन, आम, बेर और जायफल हो तो क्रमानुसार धन, सुवर्ण, पुरुष, लोह, वस्त्र, चांदी और तांबे की प्राप्ति होती है ॥ १७ ॥ धान्यपरिपूर्ण पात्र और भरे हुए घडेके देखनेसे कुटुम्ब बढ़ता है. हाथीकी लीद, गायका गोबर और कुत्तोंकी विष्ठा देखने-से धन, युवति और सुहृदोंका विनाशकारी प्रश्न जानना चाहिये ॥ १८ ॥ उस कालमें पशु, हाथी, महिष, पंकज, चांदी और व्याघ्रके दिखाई देनेसे क्रमानुसार मेष, धन, भेडके ऊनका बना हुआ कंबल, चन्दन, रेशमी वस्त्र और गहनोंके लाभकी चिन्ता होती है ॥ १९ ॥ वृद्धश्रावक (जैनसंन्यासी) का दर्शन होनेसे मनुष्योंको मित्र, द्यूत और धनकी चिन्ता, संन्यासीका दर्शन पानेमे वेश्या, राजा, बच्चा और धनकी चिन्ता कहनी चाहिये ॥ २० ॥ शाक्य, उपाध्याय, अर्हत, निर्ग्रन्थ, निमित्त, निगम और धीवरके दिखाई देनेसे क्रमानुसार चोर, सेनापति, वणिक्, दासी, योद्धा, दुकानदारीके द्रव्य और वधसम्बन्धी चिन्ता जाननी चाहिये ॥ २१ ॥ तापस या कलालके दिखाई देनेसे प्रश्नकारीको परदेशमें गये हुए पुरुषकी और पशुपालनकी चिन्ता होती है और उंछ (भूमिपर गिरे हुए एक २ दानेके इकट्ठे करनेका नाम उंछ है) वृत्तिसे जीवन धारण करनेवाले मुनि आदि दिखाई दें तो विपत्ति पडनेकी चिन्ता होती है ॥ २२ ॥ 'मैं पूछनेकी इच्छा करता हूँ" "कहिये" "दर्शन कीजिये" और "आप भली भांति से आज्ञा दीजिये" यह वाक्य कहे जानेपर संयोग, कुटुम्बसे उत्पन्न हुआ लाभ और धनकी चिन्ता होती है ॥ २३ ॥ "भली भांतिसे विचारकर मेरा मनोरथ कहिये" और "बताइये" यह कहे जानेसे जय और मार्गकी चिन्ता होती है. और "आप शीघ्रही देखिये" यह बात सब आदमियोंके बीचमें बैठे हुए ज्योतिषीसे कहो जाय तो बंधु और चोरकी चिन्ता होती है ॥ २४ ॥ भीतरका अंगस्पर्श किया जाय तो स्वजनकी चिन्ता कही जाती है, बाहरका अंगस्पर्श करे तो बाहरके मनुष्यकी चिन्ता होती है. पांवका अंगूठा या पांवकी अंगुलियां छुई जायँ तो दासदासीजनकी चिन्ता होती है, जंघाके स्पर्श से प्रेक्षणीय पुरुष, नाभिके स्पर्शसे बहन, हृदयके स्पर्शसे भार्या, हाथके अंगूठे या ऊँगलीके स्पर्शसे पुत्र व कन्याकी चिन्ता होती है। प्रश्नकर्त्ता पेट छुए तो माता, मस्तक छुए तो गुरु, दांया या बांया हाथ छुए तो भ्राता और उसकी भार्याको चोरीके विषयमें बतावे ॥ २५ ॥ २६ ॥ जो पूछने-

वाला भीतरके अंग छोडकर बाहिरी अंगोंको छुए अथवा श्लेष्म, मूत्र और विष्ठा त्याग करते२ हाथमेंकी वस्तुको नीचे गिरा देवे, शरीरको बहुत झुकावे या आलस्यमें आकर तोडे, किसी मनुष्यके हाथमें रीता बर्त्तन देखे, चोरको देखे अथवा प्रश्नके समय हर लिया, गिर गया, कट गया, भूल गया, नष्ट हो गया, टूट गया, चोरी गया और मर गया आदि बुरे शब्द उत्पन्न हों तो चोरी गई वस्तु फिर नहीं मिलती ।। २७ ।। २८ ।। यह जो समस्त चिह्न कहे गये जो इन सबके साथ भुस, हड्डी, विष आदि देखनेके साथ रोने या छींकका शब्द हो तो रोगियोंका मरण होता है, जो पूछनेवाला भीतरके दृढ अंगको छूकर श्वास लेवे तब भोजन बहुत करनेसे प्रश्न करनेवाला तृप्त हो रहा है, इस बातको दैवज्ञ प्रकाश करे ।। २९ ।। पूछनेवाला माथेको स्पर्श करे और शूकधान्यका दर्शन करे तो शाँठीका चावल इसने खाया है ऐसा कहे, छाती स्पर्श करनेसे शाँठी ओर गर्दन स्पर्श करनेसे जौका अन्न खाया है ।।३०।। कोंख, स्तन, उदर और जानुको प्रश्न करनेवाला, छुए तो क्रमानुसार उरद, दूध, तिल व दालका भोजन करना बतावे. दोनों ओठोंके चाटनेसे मधुर रसको जाने ।।३१।। जो पूछनेवाला विष्टम्भी हो या जीभसे ओठोंके स्थानको चाटे अथवा वदनको सकोडे तो उसने खट्टा खाया है और कटु, तिक्त, कषाय व गरम द्रव्य खानेसे हिचकी उत्पन्न होती है, सेंधा नोन खानेसे थूकता है ।। ३२ ।। जो प्रश्न करनेके समय कफको त्याग करे, थोडा सूखा, तीखा पदार्थ और मांस खानेवाले पक्षीको देखे या उसका नाम सुने तो उसने मांसका मिला हुआ अन्न भक्षण किया है. भौं, गाल और ओठके स्पर्श करनेसे उस करके (नीचे लिखे अनुसार) शाकुन पक्षीका मांस खाया गया है यह कहे ।। ३३ ।। मस्तक, गला, केश, ठोडी, कनपटी, जांघ और बस्तिके स्पर्श करनेसे क्रमानुसार गज, महिष मेष, शूकर, गाय, खरगोक्ष, मृग इनका मांस प्रश्नकर्त्ताने भक्षण किया है ।। ३४ ।। दुष्टशकुन दर्शन और श्रवण करनेसे गोह और मछलीके मांसका खाना कहा जायगा प्रश्न करनेपर गर्भिणीका गर्भनिपातभी इससे प्रगट हो जाता है ।।३५।। गर्भप्रश्नसे पुरुष, स्त्री या नपुंसक अंग या कुछ दीखे अनुमानसे ज्ञात हो पुरस्थित जो स्पर्शित हो उस गर्भसे उसका जन्म होता है. परन्तु पान, अन्न, पुष्प और फलका दर्शन करना शुभ है ।।३६।। अंगूठे से भौं उदर या उंगली स्पर्श करके पूछे तो पूछनेवालेको गर्भकी चिन्ता होती है. शहद, घी आदि वा सुवर्ण, रत्न, मूंगा अथवा माता, धाई और पुत्र यह आगे खडे हुए दिखाई दे तोभी गर्भकी ही चिन्ताको प्रगट करे।।३७।। पेटपर हाथ रक्खे हो अर्थात् स्पर्श किये हो तो गर्भिणी गर्भयुक्त होती है परन्तु दुष्ट निमित्त दिखाई देनेसे गर्भका नाश हो जाता है, जो पूछनेवाला दबाकर पेटको खैंचे या हाथसे हाथ मलकर प्रश्न करे तोभी गर्भका नाश हो जाता है।।३८।। गर्भग्रहण प्रश्नमें प्रश्न करनेवाला जो नासिकाके दाहिने द्वारको स्पर्श करे तो एक मासके पीछे गर्भ धारण होगा, वाम नासिका और बायें कानको स्पर्श करे तो चार मासके पीछे गर्भ धारण होगा ।।३९।। चोटीकी जडको स्पर्श करनेसे तीन पुत्र और दो कन्या उत्पन्न होंगी, कानको स्पर्श करनेसे पांच पुत्र और हाथ स्पर्श करनेसे तीन पुत्र जन्म लेंगे, जो प्रश्नकर्ता प्रश्न करनेके समय पांवका अंगूठा अथवा दोनों एडी स्पर्श करे तो एक कन्या उत्पन्न होती है, ऐसेही कनकी उंगलीके स्पर्शसे पांच कन्या, अनामिकाके स्पर्शसे चार, मध्यमाके स्पर्शसे तीन और तर्जनीके स्पर्शसे दो कन्या होंगी ।। ४० ।। दाहिनी छाती स्पर्श करनेसे दो कन्या और बायां ऊरु स्पर्श करनेसे दो पुत्र जन्म लेते हैं, माथेका मध्यभाग स्पर्श करनेसे चार और माथेकी शेष सीमा स्पर्श करनेसे तीन कन्या जन्म लेंगी ।। ४१ ।। माथा, ललाट, भौं, कान, गाल, ठोडी, दांत, गला, दाहिना कन्धा, बांया कन्धा, दोनों हाथ ठोडी, नाल, उदर, कुच हृदयके बीचमें और दोनों पार्श्व, जठर, कमर, स्फिक (कमर

का मांसपिंड), गुदा, सन्धि, ऊरुयुगल, दो जानु दोनों छावा और पांव दोनोंमें क्रमानुसार कृत्तिका-से लेकर सब नक्षत्र विराजमान रहते हैं ॥ ४२ ॥ ४३ ॥ सब शास्त्रोंको भली भांति विचार कर पंडितोंकी संतुष्टताके लिये यह गात्रस्पर्शलक्षण भलीभांतिसे कहा गया, जो अत्यंत बुद्धिमान् और उदार स्वभाववाला दैवज्ञ उसको भलीभांतिसे जान लेगा तो वह, राजा और प्रजासे सदा पूजित होगा ॥ ४४ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबाद–वास्तव्य–पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायामेकपंचाशत्तमोऽध्यायः ॥ ५१ ॥

अथ द्विपंचाशत्तमोऽध्यायः

पिटकलक्षणम्

सितरक्तपीतकृष्णा विप्रादीनां क्रमेण पिटका ये । ते क्रमशः प्रोक्तफला वर्णानामग्रजादीनाम् ॥१॥ सुस्निग्धव्यक्तशोभाः शिरसि धनचयं मूर्ध्नि सौभाग्य-माराद् दौर्भाग्यं भ्रूयुगोत्थाः प्रियजनघटनामाशु दुःशीलतां च । तन्मध्योत्थाश्च शोकं नयनपुटगता नेत्रयोरिष्टदृष्टिं प्रव्रज्यां शंखदेशेऽश्रुजलनिपतनस्थानगाश्चाति-चिन्ताम् ॥२॥ घ्राणागण्डे वसनसुतदाश्चोष्ठयोरन्नलाभं कुर्युस्तद्वच्चिबुकतलगा भूरि वित्तं ललाटे । हन्वोरेवं गलकृतपदा भूषणान्यन्नपाने श्रोत्रे तद्भूषणगणमपि ज्ञानमात्मस्वरूपम् ॥३॥ शिरःसन्धिग्रीवाहृदयकुचपार्श्वोरसि गता अयोघातं घातं सुततनयलाभं शुचमपि । प्रियप्राप्तिं स्कन्धेऽप्यटनमथ भिक्षार्थमसकृद्विनाशं कक्षोत्था विदधति धनानां बहुसुखम् ॥४॥ दुःखशत्रुनिचयस्य विघातं पृष्ठबाहुयुगजा रचयन्ति । संयमं च मणिबन्धनजाता भूषणाद्यमुपबाहुयुगोत्थाः ॥५॥ धनाप्तिं सौभाग्यं शुचमपि करांगुल्युदरगाः सुपानान्नं नाभौ तदध इह चौरैर्धनहृतिम् । धनं धान्यं बस्तौ युवतिमथ मेढ्रे सुतनयान् धनं सौभाग्यं वा गुदवृषणजाता विदधति । ऊर्वोर्यानाङ्गनालाभं जान्वोः शत्रुजनात् क्षतिम् । शस्त्रेण जंघयोर्गुल्फेऽध्वबन्धक्लेश-दायिनः ॥७॥ स्फिक्पार्ष्णिपादजाता धननाशागम्यगमनमध्वानम् । बंधनमंगुलि-निचयेऽङ्गुष्ठे च ज्ञातिलोकतः पूजाम् ॥८॥ उत्पातगण्डपिटका दक्षिणतो वामतस्त्व-भिघाताः । धन्या भवन्ति पुंसां तद्विपरीतास्तु नारीणाम् ॥९॥ इति पिटकविभागः प्रोक्त आमूर्द्धतोऽयं व्रणतिलकविभागोऽप्येवमेव प्रकल्प्यः । भवति मशकलक्ष्मावर्त-जन्मापि तद्वन्निगदितफलकारि प्राणिनां देहसंस्थम् ॥१०॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां पिटकलक्षणं नाम द्विपञ्चाशत्तमोऽध्यायः ॥५२॥

ब्राह्मण, क्षत्री, वैश्य और शूद्रोंके क्रमानुसार सफेद, लाल, पीली और काले रंगकी (फुनसी)

चिकनी और रमणीय हों तो वह क्रमानुसार द्विजादि[1] वर्णोंके सम्बन्धमें फल प्रकाशित करती है, अन्यथा निष्फल है, अर्थात् सफेद रंगकी फुनसी ब्राह्मणोंको फलदायी हैं क्षत्रियोंके लिये लालरंग की फुनसी फलदायी हैं ।। १ ।। शिरमें फुनसी हो तो धन पास आता है, मस्तकपर होनेसे सौभाग्यकी प्राप्ति, दोनों भौंहोंमें हो तो दुर्भगता और प्यारे मनुष्यका समागम होता है, दोनों भौंहोंके बीचमें हो या नेत्रपुटमें हो तो शोक होता है, दोनों नेत्रोंमें हो तो इष्टदृष्टि, कनपटीमें हो तो संन्यासी करता है, आंसू गिरनेके स्थानमें हो तो चिन्ता उत्पन्न होती है ।। २ ।। नासिका और गालमें हो तो वसन और सुतदायी होता है, दोनों अधरमें हो तो अन्न लाभ होता है, ठोडीके तले हो तो अन्नकी प्राप्ति होती है, कपारमें हो तो बहुत धनका लाभ होता है, दोनों ठोडीमें हो तोभी बहुत धनका लाभ होता है, गलेमें हो तो भूषण, अन्न और पानका लाभ होता है, कानमें उत्पन्न हो तो कर्णभूषण और अपने स्वरूपका ज्ञान प्राप्त हो जाता है ।। ३ ।। मस्तकसन्धि, गरदन, हृदय, कुच, पार्श्व और छातीमें पिटक उत्पन्न हो तो क्रमानुसार शस्त्रघात, आघात सुतलाभ, शोक और प्रियकी प्राप्ति होती है कन्धेमें होनेसे वारंवार भिक्षाके लिये भ्रमण और विनाश होता है कोखमें हो तो धन करके बहुतसे सुख प्राप्त होते हैं ।। ४ ।। पीठ या दोनों बाहुओंमें उत्पन्न हो तो दुःख और शत्रुओंका नाश होता है, मणिबन्धमें हो तो संयम और दोनों बाहोंके निकट हो तो भूषणादिकी प्राप्ति होती है ।। ५ ।। हाथमें, अंगुलीमें या उदरमें फुनसी हो तो क्रमानुसार धनकी प्राप्ति, सौभाग्य और शोक होता है, नाभिमें हो तो उत्तमपान व अन्नकी प्राप्ति होती है और उसके नीचे हो तो चोरों करके धनकी हानि होती है, बस्तिमें हो तो धनधान्य, मेढ्रमें हो तो युवति व सुन्दर पुत्र और गुह्य या अंडकोशके ऊपर हो तो धन और सौभाग्यका विधान करता के ।। ६ ।। दोनों ऊरुमें हो तो सवारी और स्त्रीकी प्राप्ति होती है, दोनों जानुमें हो तो शत्रुओं-से हानि उठानी पडती है, दोनों छावामे शस्त्रका घाव और गुल्फमें हो तो मार्ग और बन्धनका क्लेश होता है ।। ७ ।। परन्तु स्फिक (कमरका मांसपिंड), एडी और पांवोंमें हो तो धनका नाश, अयोग्य स्त्रीसे गमन और मार्गका लाभ होता है, अंगुलियोंके समूहमें हो तो बन्धन और अंगूठेमें हो तो जातिवाले लोगोंसे पूजाकी प्राप्ति होती है ।। ८ ।। पुरुषके दाहिने भागमें जो पिटक होता है, उसको "उत्पातगण्ड" कहते हैं, वाम भागमें पिटकको "आभिघात" पिटक कहते हैं, ऐसें अर्थात् दक्षिण भागमें पिटकवाले आदमीके घान्य होता है, परन्तु स्त्रियोंके उलटे अंगमें होनेसे फल होता है अर्थात् स्त्रियोंके दाहिने भागके पिटकको "अभिघात" बांए भागके पिटकको "उत्पातगण्ड" कहते हैं, यही वामभागले स्त्रियोंके शुभकारक हैं, अन्यथा इनका अशुभ फल होता है ।।९।। मस्तक से आरंभ करके समस्त अंगके पिटकका विभाग अर्थात् फल यह कहा गया. व्रण या तिल (काले रंगका एक तिल होता है) इन दोनोंका फल इसी तरह जानना और मशक या आवर्त नामक जो दो प्रकारके चिह्न हैं, वे चिह्न यदि प्राणियोंकी देहमें हों वह भी ऐसेही फल देते हैं ।। १० ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबाद-वास्तव्य-पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां द्विपंचाशत्तमोऽध्यायः ।। ५२ ।।

---

१ जातिमात्रके ब्राह्मणादि यहांपर द्विजातिपदके वाच्य नहीं हैं. जन्मराशिके अनुसार जो ब्राह्मणादि चार वर्ण निश्चय हुए हैं, उनकोही समझना चाहिये ।

अथ त्रिपंचाशत्तमोऽध्यायः

वास्तुविद्या.

वास्तुज्ञानमथातः कमलभवान्मुनिपरम्परायातम् । क्रियतेऽधुना मयेदं विदग्ध-सांवत्सरप्रीत्यै ॥१॥ किमपि किल भूतमभवद् रुन्धानं रोदसी शरीरेण । तदमरगणेन सहसा विनिगृह्याधोमुखं न्यस्तम् ॥ २ ॥ यत्र च येन गृहीतं विबुधेनाधिष्ठितः स तत्रैव । तदमरमयं विधाता वास्तुनरं कल्पयामास ॥३॥ उत्तममष्टाभ्यधिकं हस्तशतं नृपगृहं पृथुत्वेन । अष्टाष्टोनान्येवं पञ्च सपादानि दैर्घ्येण ॥४॥ षड्भिःषड्भिर्हीना सेनापतिसद्मनां चतुःषष्टिः । पञ्चैव विस्तारात्षड्भागसमन्विता दैर्घ्यम् ॥५॥ षष्टिश्चतुर्विहीना वेश्मानि भवन्ति पञ्च सचिवस्य । स्वाष्टांशयुता दैर्घ्यं तदर्धतो राजमहिषीणाम् ॥६॥ षड्भिःषड्भिश्चैवं युवराजस्यापवर्जिताशीतिः । त्र्यंशान्विता च दैर्घ्यं पञ्च तदर्धैस्तदनुजानाम् ॥७॥ नृपसचिवान्तरतुल्यं सामन्तप्रवरराज-पुरुषाणाम् । नृपयुवराजविशेषः कञ्चुकिवेश्याकलाज्ञानाम् ॥ ८ ॥ अध्यक्षाधि-कृतानां सर्वेषामेव कोशरतितुल्यम् । युवराजमन्त्रिविवरं कर्मान्ताध्यक्षदूतानाम् ॥९॥ चत्वारिंशद्धीना चतुश्चतुर्भिस्तु पञ्च यावदिति । षड्भागयुता दैर्घ्यं दैवज्ञ-पुरोधसोर्भिषजः ॥१०॥ वास्तुनि यो विस्तारः स एव चोच्छ्रायनिश्चयः शुभदः । शालैकेषु गृहेष्वपि विस्तराद्द्विगुणितं दैर्घ्यम् ॥११॥ चातुर्वर्ण्यव्यासो द्वात्रिंशत्स्या-च्चतुर्हीनः । आषोडशादिति परं न्यूनतरमतीव हीनानाम् ॥१२॥ सदशांशं विप्राणां क्षत्रस्याष्टांशसंयुतं दैर्घ्यम् । षड्भागयुतं वैश्यस्य भवति शूद्रस्य पादयुतम् ॥१३॥ नृपसेनापतिगृहयोरन्तरमानेन कोशरतिभवने । सेनापतिचातुर्वर्ण्यविवरतो राज-पुरुषाणाम् ॥१४॥ अथ पारसवादीनां स्वमानसंयोगादलसमं भवनम् । हीनाधिकं स्वमानादशुभकरं वास्तु सर्वेषाम् ॥१५॥ पशवाश्रमिणाममितं धान्यायुधवह्निर-तिगृहाणां च । नेच्छन्ति शास्त्रकारा हस्तशतादुच्छ्रितं परतः ॥१६॥ सेनापति-नृपतीनां सप्ततिसहिते द्विधाकृते व्यासे । शाला चतुर्दशहृते पञ्चत्रिंशद्धृतेऽलिन्दः ॥१७॥ हस्तद्वात्रिंशादिषु चतुश्चतुस्त्रित्रिकत्रिकाः शालाः । सप्तदशत्रितयति-थित्रयोदशकृतांगुलाभ्यधिकाः ॥१८॥ त्रित्रिद्विद्विद्विसमाः क्षयक्रमादंगुलानि चैतेषाम् । व्येका विंशतिरष्टौ विंशतिरष्टादश त्रितयम् ॥१९॥ शाला त्रिभागतुल्या कर्तव्या वीथिका बहिर्भवनात । यद्यग्रतो भवति सा सोष्णीषं नाम तद्वास्तु ॥२०॥ सायाश्रयमिति पश्चात् सावष्टम्भं तु पार्श्वसंस्थितया । संस्थितमिति च समन्ताच्छा-स्त्रज्ञैः पूजिताः सर्वाः ॥२१॥ विस्तारषोडशांशः सचतुर्हस्तो भवेद्गृहोच्छायः । द्वादशभागेनोनो भूमौ भूमौ समस्तानाम् ॥२२॥ व्यासात् षोडशभागः सर्वेषां सद्मनां भवति भित्तिः ॥ पक्वेष्टकाकृतानां दारुकृतानां तु सविकल्पः ॥२३॥ एकादशभागयुतः ससप्ततिर्नृपवलेशयोर्व्यासः । उच्छ्रायोंऽगुलतुल्यो द्वार

स्यार्धेन विष्कम्भः ।।२४।। विप्रादीनां व्यासात् पञ्चांशोऽष्टादशांगुलसमेतः । साष्टांशो विष्कम्भो द्वारस्य द्विगुण उच्छ्रायः ।।२५।। उच्छ्रायहस्तसंख्यापरिमाणान्यंगुलानि बाहुल्यम् । शाखाद्वयेऽपि कार्यं सार्द्धं तत्स्यादुदुम्बरयोः ।।२६।। उच्छ्रायात् सप्तगुणादशीतिभागः पृथुत्वमेतेषाम् । नवगुणितेऽशीत्यंशः स्तम्भस्य दशांशहीनोऽग्रे ।।२७।। समचतुरस्रो रुचको वज्रोऽष्टाश्रिर्द्विवज्रको द्विगुणः । द्वात्रिंशता तु मध्ये प्रलीनको वृत्त इति वृत्तिः ।।२८।। स्तम्भं विभज्य नवधा वहनं भागो घटोऽस्य भागोन्यः । पद्मं तथोत्तरोष्ठं कुर्याद्भागेन भागेन ।।२९।। स्तम्भसम बाहुल्यं भारतुलानामुपर्युपर्यासाम् । भवति तुलोपतुलानामूनं पादेन पादेन ।।३०।। अप्रतिषिद्धालिन्दं समन्ततो वास्तु सर्वतोभद्रम् । नृपतिबुधसमूहानां कार्यं द्वारैश्चर्भिरपि ।।३१।। नन्द्यावर्तमलिन्दैः शालाकुड्यात् प्रदक्षिणान्तरगतैः । द्वारं पश्चिममस्मिन् विहाय शेषाणि कार्याणि ।।३२।। द्वारालिन्दोऽन्तगतः प्रदक्षिणोऽन्यः शुभस्ततश्चान्यः । तद्वच्च वर्द्धमाने द्वारं तु न दक्षिणं कार्यम् ।।३३।। अपरोऽन्तगतोऽलिन्दः प्रागन्तगतौ तदुत्थितौ चान्यौ । तदवधिविवृतश्चान्यः प्राग्द्वारं स्वस्तिकेऽशुभदम् ।।३४।। प्राक्पश्चिमावलिन्दावन्तगतौ तदवधिस्थितौ शेषौ । रुचके द्वारं न शुभदमुत्तरतोऽन्यानि शस्तानि ।।३५।। श्रेष्ठं नन्द्यावर्तं सर्वेषां वर्द्धमानसंज्ञं च । स्वस्तिकरुचके मध्ये शेषं शुभदं नृपादीनाम् ।।३६।। उत्तरशालाहीनं हिरण्यनाभं त्रिशालकं धन्यम् । प्राक्शालया वियुक्तं सुक्षेत्रं वृद्धिदं वास्तु ।।३७।। याम्याहीनं चुल्लीत्रिशालकं वित्तनाशकरमेतत् । पक्षघ्नमपरया वर्जितं सुतध्वंसवैरकरम् ।।३८।। सिद्धार्थमपरयाम्ये यमसूर्यं पश्चिमोत्तरे शाले । दण्डाख्यमुदक्पूर्वे वाताख्यं प्राग्युता याम्या ।।३९।। पूर्वापरे तु शाले गृहचुल्ली दक्षिणोत्तरे काचम् । सिद्धार्थेऽर्थावाप्तिर्यमसूर्ये गृहपतेर्मृत्युः ।।४०।। दण्डवधो दण्डाख्ये कलहोद्वेगः सदैव वाताख्ये । वित्तविनाशश्चुल्ल्यां ज्ञातिविरोधाः स्मृतः काचे ।।४१।। एकाशीतिविभागे दश दश पूर्वोत्तरायता रेखाः । अन्तस्त्रयोदश सुरा द्वात्रिंशद्बाह्यकोष्ठस्थाः ।।४२।। शिखिपर्जन्यजयन्तेन्द्रसूर्यसत्या भृशोऽन्तरिक्षश्च । ऐशान्याद्याः क्रमशो दक्षिणपूर्वेऽनिलः कोणे ।।४३।। पूषा वितथबृहत्क्षतयमगन्धर्वाख्यभृंगराजमृगाः । पितृदौवारिकसुग्रीवकुसुमदत्ताम्बुपत्यसुराः ।।४४।। शोषोऽथ पापयक्ष्मा रोगः कोणे ततोऽहिमुख्यौ च । भल्लाटसोमभुजगास्ततोऽदितिर्दितिरिति क्रमशः ।।४५।। मध्ये ब्रह्मा नवकोष्ठकाधिपोऽस्यार्यमा स्थितः प्राच्याम् । एकान्तरात् प्रदक्षिणमस्मात्सविता विवस्वांश्च ।।४६।। विबुधाधिपतिस्तस्मान्मित्रोऽन्यो राजयक्ष्मनामा च । पृथ्वीधरापवत्सावित्येते ब्रह्मणः परिधौ ।।४७।। आपो नामैशाने कोणे हौताशने च सावित्रः । जय इति च नैर्ऋते रुद्र आनिलेऽभ्यन्तरपदेषु ।।४८।। आपस्तथाप वत्सः पर्जन्योऽग्निर्दितिश्च वर्गोऽयम् । एवं कोणे कोणे पदिकाः स्युः पञ्च सुराः ।।४९।। बाह्या द्विपदाः शेषास्ते विबुधा विंशतिः समाख्याताः । शेषाश्चत्वारोऽन्ये

त्रिपदा दिक्ष्वर्यमाद्यास्ते ।।५०।। पूर्वोत्तरदिङ्मूर्धा पुरुषोऽयमवाङ्मुखोऽस्य शिरसि शिखी । आपोमुखे स्तनेऽस्यार्यमा ह्युरस्यापवत्सश्च ।।५१।। पर्जन्याद्या बाह्या दृक्श्रवणोरःस्थलांसगा देवाः । सत्याद्याः पञ्च भुजे हस्ते सविता ससावित्रः ।।५२।। वितथो बृहत्क्षतयुतः पार्श्वे जठरे स्थितो विवस्वांश्च । ऊरू जानू जंघे स्फिगिति यमाद्यैः परिगृहीताः ।।५३।। एते दक्षिणपार्श्वे स्थानेष्वेवं च वामपार्श्वस्थाः । मेढ्रे शक्रजयन्तौ हृदये ब्रह्मा पितांघ्रिगतः ।।५४।। अष्टाष्टकपदमथवा कृत्वा रेखाश्च कोणगास्तिर्यक् । ब्रह्मा चतुष्पदोऽस्मिन्नर्द्धपदा ब्रह्मकोणस्थाः ।।५५।। अष्टौ च बहिः कोणेष्वर्द्धपदास्तदुभयस्थिताः सार्द्धाः । उक्तेभ्यो ये शेषास्ते द्विपदा विंशतिस्ते च ।।५६।। सम्पाता वंशानां मध्यानि समानि यानि च पदानाम् । मर्माणि तानि विन्द्यान्न परिपीडयेत् प्राज्ञः ।। ५७ ।। तान्यशुचिभाण्डकीलस्तम्भाद्यैः पीडितानि शल्यैश्च । गृहभर्तुस्तत्तुल्ये पीडामङ्गे प्रयच्छन्ति ।।५८।। कण्डूयते यदङ्गं गृहपतिना यत्र वामराहुत्याम् । अशुभं भवेन्निमित्तं विकृतिर्वाग्नेः सशल्यं तत् ।।५९।। धनहानिर्दारुमये पशुपीडारुग्भयानि चास्थिकृते । लोहमये शस्त्रभयं कपालकेशेषु मृत्युः स्यात् ।।६०।। अंगारे स्तेनभयं भस्मानि च विनिर्दिशेत् सदाग्नि-भयम् । शल्यंही मर्मसंस्थं सुवर्णरजतादृतेऽत्यशुभम् ।।६१।। मर्मण्यमर्मगो वा रुणद्धचर्थागमं तुषसमूहः । अपि नागदन्तको मर्मसंस्थितो दोषकृद्भवति ।। ६२ ।। रोमाद्वायुं पितृतो हुताशनं शोषसूत्रमपि वितथात् । मुख्याद्भृशं जयन्ताच्च भृङ्गम-दितेश्च सुग्रीवम् ।।६३।। तत्सम्पाता नव ये तान्यतिमर्माणि सम्प्रदिष्टानि । यश्च पदस्याष्टांशस्तत्प्रोक्तं मर्मपरिमाणम् ।।६४।। पदहस्तसंख्यया सम्मितानि वंशोऽ-ङ्गुलानि विस्तीर्णः । वंशव्यासोऽध्यर्धःशिराप्रमाणं विनिर्दिष्टम् ।।६५।। सुख-मिच्छन् ब्रह्माणं यत्नाद्रक्षेद्गृही गृहान्तस्थम् । उच्छिष्टाद्युपघाताद् गृहपतिरुपतप्यते तस्मिन् ।।६६।। दक्षिणभुजेन हीने वास्तुनरेऽर्थक्षयोऽङ्गनादोषाः । वामेऽर्थधान्य-हानिःशिरसिगुणैर्हीयते सर्वैः।।६७।। स्त्रीदोषाःसुतमरणं प्रेष्यत्वं चापि करणवैकल्ये। अविकलपुरुषे वसता मानार्थयुतानि सौख्यानि ।।६८।। गृहनगरग्रामेषु च सर्वत्रैवं प्रतिष्ठिता देवाः । तेषु च यथानुरूपं वर्णा विप्रादयो वास्याः ।।६९।। वासगृहाणि च विन्द्याद् विप्रादीनामुदग्दिगाद्यानि । विशतां च यथाभवनं भवन्ति तान्येव दक्षिणतः ।।७०।। नवगुणसूत्रविभक्तान्यष्टगुणेनाथवा चतुःषष्टे । द्वाराणि यानि तेषामन-लांदीनां फलोपनयः ।।७१।। अनलभयं स्त्रीजन्म प्रभूतधनता नरेन्द्रवाल्लभ्यम् । क्रोधपरतानृतत्वं क्रौर्यं चौर्यं च पूर्वेण ।।७२।। अल्पसुतत्वं प्रैष्यं नीचत्वं भक्ष्यपान-सुतवृद्धिः । रौद्रं कृतघ्नमधनं सुतवीर्यघ्नं च याम्येन ।।७३।। सुतपीडा रिपुवृद्धिर्न धनसुताप्तिः सुतार्थबलसम्पत् । धनसम्पन्नृपतिभयं धनक्षयो रोग इत्यपरे ।।७४।। वधबन्धौ रिपुवृद्धिर्धनसुतलाभः समस्तगुणसम्पत् । पुत्रधनाप्तिर्वैरं सुतेन दोषाः

स्त्रिया नैःस्वम् ॥७५॥ मार्गतरुकोणकूपस्तम्भभ्रमविद्धमशुभदं द्वारम्। उच्छ्राया-याद्द्विगुणमितां त्यक्त्वा भूमिं न दोषाय ॥७६॥ रथ्याविद्धं द्वारं नाशाय कुमार-दोषदं तरुणा। पंकद्वारे शोको व्ययोऽम्बुनिस्राविणि प्रोक्तः ॥७७॥ कूपेनापस्मारो भवति विनाशश्च देवताविद्धे। स्तंभेन स्त्रीदोषाः कुलनाशो ब्रह्मणोऽभिमुखे ॥७८॥ उन्मादः स्वयमुद्घाटितेऽथ पिहिते स्वयं कुलविनाशः। मानाधिके नृपभयं दस्युभयं व्यसनदं नीचम् ॥७९॥ द्वारं द्वारस्योपरि यत्तन्न शिवाय सङ्कटं यच्च। आव्यात्तं क्षुद्भयदं कुब्जं कुलनाशनं भवति ॥ ८० ॥ पीडाकरमतिपीडितमन्तर्विनतं भवेदभावाय। बाह्यविनते प्रवासो दिग्भ्रान्ते दस्युभिः पीडा ॥८१॥ मूलद्वारं नान्यैर्द्वारैरतिसन्दधीत रूपद्धर्या। घटफलपत्रप्रमथादिभिश्च तन्मङ्गलैश्चिनुयात् ॥८२॥ ऐशान्यादिषु कोणेषु संस्थिता बाह्यतो गृहस्यैताः। चरकि विदारिनामाथ पूतना राक्षसी चेति ॥८३॥ पुरभवनग्रामाणां ये कोणास्तेषु निवसतां दोषाः। श्वपचादयोऽन्त्यजात्यास्तेष्वेव विवृद्धिमायान्ति ॥८४॥ याम्यादिष्वशुभफला जाता-स्तरवः प्रदक्षिणेनैते। उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः ॥८५॥ आसन्नाः कण्टकिनो रिपुभयदाः क्षीरिणोऽर्थनाशाय। फलिनः प्रजाक्षयकरा दारुण्यपि वर्जये-देषाम् ॥८६॥ छिन्द्याद्यदि न तरूंस्तात् तदन्तरे पूजितान्वपेदन्यान्। पुन्नागाशोका-रिष्टबकुलपनसान् शमीशाली ॥८७॥ शस्तौषधिद्रुमलतामधुरा सुगंधा स्निग्धा समानसुषिरा च मही नराणाम्। अप्यध्वनि श्रमविनोदमुपागतानां धत्ते श्रियं किमुत शाश्वतमन्दिरेषु ॥८८॥ सचिवालयेऽर्थनाशो धूर्तगृहे सुतवधः समीपस्थे। उद्वेगो देवकुले चतुष्पथे भवति चाकीर्तिः ॥८९॥ चैत्ये भयं ग्रहकृतं वल्मीकश्वभ्रसं-कुले विपदः। गर्तायां तु पिपासा कूर्माकारे धनविनाशः ॥९०॥ उदगादिप्लवमिष्टं विप्रादीनां प्रदक्षिणेनैवं। विप्रः सर्वत्र वसेदनुवर्णमथेष्टमन्येषाम् ॥९१॥ गृहमध्ये हस्तमितं खात्वा परिपूरितं पुनः श्वभ्रम्। यद्यूनमनिष्टं तत् समे समं धन्यमधिकं यत् ॥९२॥ श्वभ्रमथवाम्बुपूर्णं पदशतमित्वागतस्य यदि नोनम्। तद्धन्यं यच्च भवेत् पलान्यपामाढकं चतुःषष्टिः ॥९३॥ आमे वा मृत्पात्रे श्वभ्रस्थे दीपवर्तिरभ्य-धिकम्। ज्वलति दिशि यस्य शस्ता सा भूमिस्तस्य वर्णस्य ॥९४॥ श्वभ्रोषितं न कुसुमं यस्मिन् प्रम्लायतेऽनुवर्णसमम्। तत्तस्य भवति शुभदं यस्य च यस्मिन्मनो रमते ॥९५॥ सितरक्तपीतकृष्णा विप्रादीनां प्रशस्यते भूमिः। गन्धश्च भवति यस्या घृतरुधिरान्नाद्यमद्यसमः ॥९६॥ कुशयुक्ता शरबहुला दूर्वा काशावृता क्रमेण मही। अनुवर्णं वृद्धिकरी मधुरकषायाम्लकटुका च ॥९७॥ कृष्टां प्ररूढबीजां गोऽध्यूषितां ब्राह्मणैः प्रशस्तां च। गत्वा महीं गृहपातः काले सांवत्सरोद्दिष्टे ॥९८॥ भक्ष्यैर्नानाकारैर्दध्यक्षतसुरभिकुसुमधूपैश्च। दैवतपूजां कृत्वा स्थपतीनभ्यर्च्य विप्रांश्च ॥९९॥ विप्रः स्पृष्ट्वा शीर्षं वक्षश्च क्षत्रियो विशश्चोरू। शूद्रः पादौ

स्पृष्ट्वाकुर्याद्रेखां गृहारम्भे ।।१००।। अंगुष्ठकेन कुर्यान्मिध्यांगुल्याथवा प्रदेशिन्या । कनकमणिरजतमुक्तादधिफलकुसुमाक्षतैश्च शुभम् ।। १०१ ।। शस्त्रेणै शस्त्रमृत्युर्बन्धो लोहेन भस्मनाग्निभयम् । तस्करभयं तृणेन च काष्ठोल्लिखिता च राजभयम् ।१०२।। वक्रा पादालिखिता शस्त्रभयक्लेशदा विरूपा च । चर्माङ्गारास्थिकृता दन्तेन च कर्तुरशिवाय ।।१०३।। वैरमपसव्यलिखिता प्रदक्षिणं सम्पदो विनिर्देश्याः । वाचः परुषा निष्ठीवितं क्षुतं चाशुभं कथितम् ।।१०४।। अर्द्धनिर्चितं कृतं वा प्रविशन् स्थपतिर्गृहे निमित्तानि । अवलोकयेद्गृहपतिः क्व संस्थितः स्पृशति किं चाङ्गम् ।।१०५।। रविदीप्तो यदि शकुनिस्तस्मिन् काले विरौति परुषरवः । संस्पृष्टाङ्गसमानं तस्मिन्देशेऽस्थि निर्देश्यम् ।।१०६।। शकुनसमयेऽथवान्ये हस्त्यश्वश्वादयोनुवाशन्ते । तत्प्रभवमस्थि तस्मिंस्तदङ्गसम्भूतमेवेति ।।१०७।। सूर्यः प्रसार्यमाणे गर्दभरावोऽस्थिशल्यमाचष्टे । श्वशृगाललंघिते वा सूत्रे शल्यं विनिर्देश्यम् ।।१०८।। दिशि शान्तायां शकुनो मधुरविरावी यदा तदा वाच्यः । अर्थस्तस्मिन् स्थाने गृहेश्वराधिष्ठितेऽङ्गे वा ।।१०९।। सूत्रच्छेदे मृत्युः कीले चावाङ्मुखे महान् रोगः । गृहनाथस्थपतीनां स्मृतिलोपे मृत्युरादेश्यः ।।११०।। स्कन्धाच्च्युते शिरोरुक् कुलोपसर्गोऽपवर्जिते कुम्भे । भग्नेऽपि च कर्मिवधश्च्युते कराद्गृहपतेर्मृत्युः ।।१११।। दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत्प्रथमाम् । शेषाः प्रदक्षिणेन स्तम्भाश्चैवं समुत्थाप्याः ।।११२।। छत्रस्रगम्बरयुतः कृतधूपविलेपनः समुत्थाप्यः । स्तम्भस्तथैव कार्यो द्वारोच्छ्रायः प्रयत्नेन ।।११३।। विहगादिभिरवलीनैराकम्पितपतितदुःस्थितैश्च फलम् । शक्रध्वजफलसदृशं तस्मिंश्च शुभं विनिर्दिष्टम् ।। ११४ ।। प्रागुत्तरोन्नते धनसुतक्षयः सुतवधश्च दुर्गन्धे । वक्रे बन्धुविनाशो न सन्ति गर्भाश्च दिङ्मूढे ।।११५।। इच्छेद्यदि गृहवृद्धिं ततः समन्ताद्विवर्धयेत्तुल्यम् ।। एकोद्देशे दोषः प्रागथवाप्युत्तरे कुर्यात् ।।११६।। प्राग्भवति मित्रवैरं मृत्युभयं दक्षिणेन यदि वृद्धिः । अर्थविनाशः पश्चादुदग्विवृद्धौ मनस्तापः ।।११७।। ऐशान्यां देवगृहं महानसं चापि कार्यमाग्नेय्यायम् । नैर्ऋत्यां भाण्डोपस्करोऽर्थधान्यानि मारुत्याम् ।।११८।। प्राच्यादिस्थे सलिले सुतहानिः शिखिभयं रिपुभयं च । स्त्रीकलहः स्त्रीदौष्ट्यं नैस्व्यं वित्तात्मजविवृद्धिः ।। ११९ ।। खगनिलयमग्नसंशुष्कदग्धदेवालयश्मशानस्थान् । क्षीरतरुधवविभीतकनिम्बारणिवर्जितांश्छिद्यात् ।। १२० ।। रात्रौ कृतबलिपूजं प्रदक्षिणं छेदयेद्दिवा वृक्षम् । धन्यमुदक्प्रापतनं न ग्राह्योऽतोऽन्यथापतितः ।।१२१।। छेदो यद्यविकारी ततः शुभं दारु तद्गृहौपयिकम् । पीते तु मण्डले निर्दिशेत्तिरोर्मध्यगां गोधाम् ।।१२२।। मञ्जिष्ठाभे भेको नीले सर्पस्तथारुणे सरटः । मुद्गाभेऽश्मा कपिले तु मूषकोऽम्भश्च खड्गाभे ।।१२३।। धान्यगोगुरुहुताशसुराणां न स्वपेदुपरि नाप्यनुवंशम् । नोत्तरापरशिरा न च नग्नो नैव चार्द्रचरणः श्रियमिच्छन् ।।१२४।।

भूरिपुष्पनिकरं सतोरणं तोयपूर्णकलशोपशोभितम् । धूपगन्धबलिपूजितामरं ब्राह्मणध्वनियुतं विशेद्गृहम् ॥१२५॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां वास्तुविद्या नाम त्रिपञ्चाशत्तमोऽध्यायः॥५३

जो ब्रह्माजीके पाससे मुनि लोगोंके पास आई है पंडित और ज्योतिषी लोगोंके प्रसन्नताके लिये अब वही वास्तुविद्या कही जाती है ॥१॥ शरीरसे पृथ्वी और आकाशका रोकनेवाला कोई एक भूत पूर्वकालमें उत्पन्न हुआ था, वह देवतासे मारा जाकर नीचेको मुखकर पृथ्वीपर गिरा ॥२॥ जिस देवताने उसके जिस स्थानका अधिकार प्राप्त किया था, वही देवता उस स्थानका स्वामी है इसके उपरान्त ब्रह्माजीने उस देवमय शरीर भूतको वास्तु पुरुषरूपसे कल्पित किया ॥३॥ (संसारमें समस्त मनुष्योंके वास्तुगृहके भेद पांच प्रकारके हैं) उनमें पहला उत्तम, पहलेकी अपेक्षा दूसरा अधम और फिर तृतीयादि, सबसे पहिले राजाके घरका परिमाण कहा जाता है, एक शत आठ १०८ हाथ[1] चौडा और १३५ हाथ लम्बा होता है, पांच भेदवाले राजाके घरमें यही उत्तम घर है, द्वितीयादि और चार प्रकारके गृह क्रमसे लम्बाई और चौडाईमें आठ हाथ कम होंगे, यथा, दूसरा लम्बाईमें १२५ हाथ और चौडाईमें सौ हाथ, तीसरा-लम्बाईमें ११५, चौडाईमें ९२ हाथ चौथा;-लम्बाईमें १०५, चौडाईमें ८४ हाथ, पांचवां-लम्बाईमें ९५ और चौडाईमें ७६ हाथका होता है ॥४॥ सेनापतिका उत्तम घर ६४ हाथ चौडा होता है और फिर छः भागयुक्त बिस्तारही उसकी लम्बाई होती है, यथा-पहला, ६४ हाथ चौडा और ७४ हाथ १६ अंगुल लम्बा होता है, दूसरा, ५८ हाथ चौडा, और ६७।१६ लम्बा होता है, तीसरा, ५२-हाथ चौडा और ६० हाथ १६ अंगुल लम्बा. चौथा,-४६ हाथ चौडा ५३ हाथ और १६ अंगुल लम्बा होता है पांचवां,-४० हाथ चौडा और ४६ हाथ १६ अंगुल लम्बा होता है ॥५॥ मंत्रियोंके गृह भी पांच प्रकारके होते हैं, उनमें मुख्यगृह ६० हाथ चौडा होता है. फिर ६० से क्रमानुसार चार २ हाथ कम किये जायँगे. अर्थात् क्रमानुसार ५६।५२।४८।४४ हाथ चौडा हो. चौडाईके साथ चौडाईका आठवां अंश मिलानेसे लम्बाईका परिमाण निरूपित होगा. उसका परिमाण यथा;-पहला ६७।१२, दूसरा ६३, तीसरा ५८।१२, चौथा ५४।०, पांचवां ४९ हाथ १२ अंगुल इसकी लम्बाई और चौडाईसे आधे भागके परिमाणका गृह रानियोंका होना चाहिये, लम्बाई यथा,-पहला ३३।१८, दूसरा ३१।१२, तीसरा २९।६, चौथा २७।०, पांचवां २४।१८॥ चौडाई यथा,-पहला ३०। दूसरा २८। तीसरा २६। चौथा २४ और पांचवां २२ हाथ होता है ॥६॥ युवराजके गृहभी पांच प्रकारके होते हैं, उसमें उत्तम गृह ८० हायका चौडा होता है, दूसरे गृहोंकी चौडाई क्रमानुसार छः छः हाथ कम होगी. चौडाईका तीसरा अंश मिलानेसे उनकी लम्बाईका परिमाण निर्णीत होगा. यथा,-पहला ८० हाथ चौडा, १०६ हाथ १६ अंगुल लम्बा; दूसरा ७४ हाथ चौडा, ९८ हाथ, १६ अंगुल लम्बा, तीसरा ६८ हाथ चौडा ९० हाथ १६ अगुल लम्बा, चौथा ६२ हाथ चौडा, ८२ हाथ १६
६८ हाथ चौडा ९० हाथ १६ अंगुल लम्बा, चौथा ६२ हाथ चौडा, ८२ हाथ १६
अंगुल लम्बा. पांचवां ५६ हाथ चौडा और ७४ हाथ १६ अंगुल लम्बा. इन उत्तमादि

[1] २४ अंगुलका एक हाथ, और ६० व्यंगुलका एक अंगुल होता है।

गृहोंसे आधे परिमाणवाले गृह युवराजके छोटे भ्राताओंके गृह हों, उसके परिमाणकी चौडाई ४०। ३७। ३४। ३१। २८ हाथ और लम्बाईका परिमाण यथा, ५३। ८, ४९। ८, ४५। ८, ४१। ८, ३७।८ हाथ ।।७।। राजा और मंत्री इन दोनोंके गृह में जो अंतर हो वही सामंत और श्रेष्ठ राजपुरुषोंके गृहका परिमाण है, उत्तमके क्रमसे चौडाई यथा,–४८।४४।४०।३६।३२ हाथ और उत्तमके क्रमसे लम्बाई ६७।१२, ६२।०, ५६।१२, ५१।०, ४५।१२ अंगुल है. राजा और युवराजके घरमें जो अंतर होता है, वही अंतर कंचुकी, वेश्या और नाच गाना जाननेवालोंके घरोंका परिमाण है, उत्तमादि क्रमसे उनकी लम्बाई यथा,–२८।८, २६।८, २४।८, २२।८,२०।८ अंगुल है उसी तरह उत्तमादि क्रमसे चौडाई २८, २६, २४, २२, २० हैं ।।८।। समस्त अध्यक्ष और अधिकारी पुरुषोंके गृहका परिमाण कोशगृह और रतिगृहका परिमाण समान है, युवराज और मंत्रीके गृहमें जो अंतर हो वही कर्माध्यक्ष और दूतोंके गृहका परिमाण है. उसके परिमाणमें चौडाई यथा, २०। १८। १६। १४। १२ हाथ. लम्बाई यथा,–३९।४,३५।१६,३२।४, २८।१६, २५।४।।९।। ज्योतिषी, पुरोहित और वैद्योंके उत्तम घरकी चौडाई ४० हाथ हो यह भी पांच प्रकारके हैं, इसी कारण दूसरे क्रमानुसार चार चार हाथ कम होंगे और इनकी छः षड्भागयुक्त चौडाईही इनकी क्रमानुसार लम्बाई हो जायगी. चौडाई यथा,–४०। ३६। ३२। २८। २४ हाथ हो. लम्बाई यथा,–४६।१६, ४२।०, ३७।१६, ३२।१६, २८।०, अंगुल ।।१०।। गृह जितना चौडा हो उतनाही ऊंचा हो तो शुभदायी है. परंतु जिन घरोंमें केवल एक शाला हो उसकी लम्बाई चौडाईसे दुगुनी होनी चाहिये ।।११।। (ब्राह्मण, क्षत्री, वैश्य, शूद्र और चाण्डालादि हीन जातियोंमें किस २ को किस २ प्रकार वास्तुमें अधिकार है और उस वास्तुगृहका परिमाण कितना हो वही अब कहा जाता है) ब्राह्मणादि चार वर्ण और हीनजातिके लिये उत्तम गृहके व्यासकी चौडाई ३२ हाथ होती है इस ३२ संख्यासे तबतक चार घटाने होंगे कि जबतक १६ संख्या न निकलेगी। तवहीं ३२ मेंसे ४ घटानेपर १६ निकलने तक पांच अंक होते हैं, यथा–३२। २८। २४। २०। १६ इन पांच अंकोंमें ही ब्राह्मणजातिके उत्तमादिगृहकी चौडाईका व्यास और पांच प्रकारके गृहमें इस जातिका अधिकार है, ब्राह्मणजातिके दूसरे गृहोंकी चौडाईकी संख्या २८ से १६ बचनेतक ४ अंकमें, क्षत्रिय जातिके गृहका परिमाण और अधिकार कहा गया तीसरे अंकसे वैश्यका, चौथे अंकसे शूद्रका और पांचवेंसे अन्त्यज (चाण्डालादिहीन) जातिका वास्तुमान और उसका अधिकार निर्णय हुआ है, चौडाईके अंक धरे जाते हैं यथा,–

	उत्तम.	मध्योत्तम,	मध्यम.	अधम.	अधमाधम.
ब्राह्मण.	३२	२८	२४	२०	१६
क्षत्री.	२८	२४	२०	१६	०
वैश्य.	२४	२०	१६	०	०
शूद्र.	२०	१६	०	०	०
अन्त्यज.	१६	०	०	०	०

इससे जाना गया कि ब्राह्मणलोग ऐसे पृथु व व्यासयुक्त पांच प्रकारके गृहोंमें अधिकारी हैं, वैश्य तीन प्रकार, शूद्र दो प्रकार और अन्त्यजजातिवाले एक प्रकारके गृहमें

ण्डिलमुपलिप्यास्तीर्यं सिकतयाऽथ कुशैः । भद्रासनकृतशीर्षोपधानपादां न्यसेत्प्रतिमाम् ॥ ७ ॥ प्लक्षाश्वत्थोदुम्बरशिरीषवटसम्भवैः कषायजलैः । मङ्गलसंज्ञिताभिः सर्वौषधिभिः ॥८॥ द्विपवृषभोद्धतपर्वतवल्मीकसरित्समागमतटेषु । पद्मसरस्सु च मृद्भिः सपञ्चगव्यैश्च तीर्थजलैः ॥९॥ पूर्वशिरस्कां स्नातां सुवर्णरत्नाम्बुभिश्च ससुगन्धैः । नानातूर्यनिनादैः पुण्याहैर्वेदनिर्घोषैः ॥१०॥ ऐन्द्र्यां दिशीन्द्रलिङ्गा मन्त्राः प्राग्दक्षिणेऽग्निलिङ्गाश्च । जप्तव्या द्विजमुख्यैः पूज्यास्ते दक्षणाभिश्च ॥ ११ ॥ यो देवः संस्थाप्यस्तन्मन्त्रैश्चानलं द्विजो जुहुयात् । अग्निनिमत्तानि मया प्रोक्तानीन्द्रध्वजोच्छ्राये ॥ १२ ॥ धूमाकुलोऽपसव्यो मुहुर्मुहुर्विस्फुलिङ्गकृन्न शुभः । होतुः स्मृतिलोपो वा प्रसर्पणं वाशुभं प्रोक्तम् ॥१३॥ स्नातामभुक्तवस्त्रां स्वलंकृतां पूजितां कुसुमगन्धैः । प्रतिमां स्वास्तीर्णायां शय्यायां स्थापकः कुर्यात् ॥१४॥ सुप्तां सुनृत्यगीतैर्जागरणैः सम्यगेवमधिवास्य । दैवज्ञसम्प्रदिष्टे काले संस्थापनं कुर्यात् ॥१५॥ अभ्यर्च्य कुसुमवस्त्रानुलेपनैः शंखतूर्यनिर्घोषैः । प्रादक्षिण्येन नयेदायतनस्य प्रयत्नेन ॥१६॥ कृत्वा बलिं प्रभूतं सम्पूज्य ब्राह्मणांश्च सभ्यांश्च । दत्त्वा हिरण्यशकलं विनिक्षिपेत्पिण्डिकाश्वभ्रे ॥ १७ ॥ स्थापकदैवज्ञद्विजसभ्यस्थपतीन् विशेषतोऽभ्यर्च्य । कल्याणानां भार्गा भवतीह परत्र च स्वर्गी ॥१८॥ विष्णोर्भागवतान् मगांश्च सवितुः शम्भोः सभस्मद्विजान्, मातॄणामपि मण्डलक्रमविदो विप्रान्विदुर्ब्रह्मणः । शाक्यान् सर्वहितस्य शान्तमनसो नग्नान् जिनानां विदुर्ये यं देवमुपाश्रिताः स्वविधिना तैस्तस्य कार्या क्रिया ॥१९॥ उदगयने सितपक्षे शिशिरगभस्तौ च जीववर्गस्थे । लग्ने स्थिरे स्थिरांशे सौम्यैर्धीधर्मकेन्द्रगतैः ॥२०॥ पापैरुपचयसंस्थैर्ध्रुवमृदुहरितिष्यवायुदेवेषु । विकुजे दिनेऽनुकूले देवानां स्थापनं शस्तम् ॥२१॥ सामान्यमिदं समासतो लोकांना हितदं मया कृतम् । अधिवासनसंनिवेशने सावित्रे पृथगेव विस्तरात् ॥२२॥

इति श्रीवराहमिहिरकृतौ बृहत्सं० प्रतिष्ठापनं नाम षष्टितमोऽध्यायः ॥६०॥

प्रतिष्ठा करनेवाला विद्वान् पूर्वदिशामें अधिवासन नामक प्रतिमाका संस्कार करनेको मंडप बनावे, वह चारों दिशाओंमें चार तोरणोंसे युक्त हो और वृक्षोंके कोमल पत्रोंसे ढका हो ॥१॥ उस मंडपकी पूर्वदिशामें पुष्पमाला और पताका चित्रवर्णकी लगावे, अग्निकोणमें लाल रंगकी, दक्षिण और नैर्ऋतकोणमें कृष्णवर्ण ॥ २ ॥ पश्चिममें श्वेत, वायव्यकोणमें पांडुर, उत्तरमें चित्रवर्ण और मंडपके ईशानकोणमें शोभाके लिये पीले रंगकी पुष्पमाला और पताका लगानी उचित है ॥३॥ काटकी और मिट्टीकी देवप्रतिमा आयुष, लक्ष्मी, बल और जय देती है. मणिकी बनाई देवप्रतिमा लोगोंका हित करती है, सुवर्णकी प्रतिमा शरीरपुष्टि देती है ॥४॥ चांदीकी कीर्ति करती है, तांबेकी संतानकी वृद्धि करती है. शिला लर्थात् पाषाणकी बनी प्रतिमा अथवा शिवलिंग बहुत भूमिका लाभ करते हैं ॥५॥ वह प्रतिमा जिसके किसी अंगमें कील जैसा खडा रह जाय वह प्रतिमा मुख्य

पुरुषका और वंशका नाश करती है और जिस प्रतिमामें गढा हो वह असाध्य रोग और अनेक प्रकारके उपद्रव करती है ॥६॥ अधिवासन मंडपके बीचमें स्थंडिल बनाय उसको गोबर आदिसे लीपे, उसके ऊपर बालु रेत और बालु रेतके ऊपर कुश बिछाय प्रतिमाको-उसके ऊपर सुला दे. प्रतिमाका शिर भद्रासन (राजाका सिंहासन) के ऊपर रक्खे और प्रतिमाके पांव उपधान तकियाके ऊपर रक्खे ॥७॥ पाकर, पीपर, गूलर, सिरस और बड इन वृक्षोंके पत्तोंका कषायजल कुशाको आदि लेकर मंगल नामवाली जया, पुनर्नवा, विष्णु-क्रांता आदि औषधी ॥८॥ हाथी और वृषकी उदवाडी मृत्तिका, कमलयुक्त सरोवरोंकी मृत्तिका, पंचगव्य सहित तीर्थोंके जल ॥९॥ सुवर्ण और रत्नयुक्त जल इन सबसे प्रतिमा-को स्नान करावे, उसका शिर पूर्वकी ओर करके स्थापन करे उस समय भांति २ के तुरही आदि बाजे बजें, पुण्याहवाचन और वेदध्वनि ब्राह्मण करें ॥१०॥ उत्तम ब्राह्मण पूर्वदिशामें इन्द्रके मंत्र और अग्निकोणमें अग्निके मंत्र जपें, यजमान उन ब्राह्मणोंकी दक्षिणासे पूजा करे ॥११॥ जिस देवताकी प्रतिष्ठा करनी हो उसके मंत्रोंसे ब्राह्मण अग्निमें हवन करे, अग्निके शुभ अशुभ लक्षण हमने इन्द्रध्वजाध्यायमें कहे हैं ॥१२॥ जो हवनके समय अग्नि धूमसे आकुल हो, उसकी ज्वाला बाईं ओर घूमती हो, वारंवार शब्द करे और उसमें चिनगारी उडे तो वह शुभ नहीं होता, हवन करनेवालेकी स्मृतिलुप्त हो जाय (मंत्र आदिका स्मरण न रहे) अथवा उसका प्रसर्पण हो अर्थात् जहां हवन करने पहले बैठा है वहांसे सरक जाय तो भी अशुभ है ॥१३॥ प्रतिमाको स्नान कराये नये वस्त्र धारण करायें, भूषण आदिसे अलंकृत कर, पुष्प और गन्धसे उसका पूजन कर उत्तम भांतिसे बिछी हुई शय्याके ऊपर उस प्रतिमाको प्रतिष्ठा करनेवाला पुरुष स्थापन करे ॥१४॥ सोई हुई उस प्रतिमाका नृत्यगीतसहित जागरणों करके इस प्रकार भलीभांति अधिवासन कर ज्योतिषीके बतलाये हुए मुहुर्तमें उसका स्थापन करे ॥१५॥ उस प्रतिमाको पुष्प, वस्त्र और चंदनादि अनुलेपनोंसे पूजित कर अधिवासन मंडपसे उठाय प्रासादसे प्रदक्षिण-हो यत्नपूर्वक गर्भगृहमें ले जावे उस समय शंख तूर्य आदि बाजे बजाये जावें ॥१६॥ वहां जाय बहुतसा बलि देकर ब्राह्मण और सभ्य अर्थात् उस सभामें स्थित मनुष्योंका वस्त्र दक्षिणा आदिसे पूजन करे पिंडीका (पीठ) के गढेमें सोनेका टुकडा डाल उसके ऊपर प्रतिमाका स्थापन करे ॥१७॥ स्थापक (प्रतिष्ठा करनेवाला), ज्योतिषी, ब्राह्मण, सभ्य (कारीगर) इन सबका विशेष पूजन करे, इस भांति देवप्रतिष्ठा करनेवाला पुरुष इस लोकमें कल्याणोंका भागी होता है और परलोकमें स्वर्गवास पाता है ॥१८॥ विष्णु-की प्रतिष्ठा भागवत (वैष्णव) करें, सूर्यकी प्रतिष्ठा मग (शाकद्वीपके रहनेवाले ब्राह्मण) करे, शिवकी प्रतिष्ठा भस्म धारण करनेवाले ब्राह्मण करे, ब्राह्मी आदि मातृकाओंकी प्रतिष्ठामंडल क्रम अर्थात् उनके पूजनका विधान जाननेवाले ब्राह्मण करें, ब्रह्माकी प्रतिष्ठा वैदिक ब्राह्मण करें, सर्वहित्की अर्थात् बुद्धकी प्रतिष्ठा शांत चित्तवाले शाक्य (रक्तपट) करें, जिनकी प्रतिष्ठा नग्न (दिगम्बरक्षपणक) करें, जो मनुष्य जिस देवताके उत्तम भक्त होवें उस देवताकी प्रतिष्ठा आदि सब क्रिया स्वकल्पोक्त विधानसे करें ॥ १९ ॥ उत्तरायण हो, शुक्ल पक्ष हो, चन्द्रमा बृहस्पतिके षडवर्गमें स्थित हो, स्थिर लग्न और स्थिर नवांश हो, सौम्य ग्रह, पंचम, नवम, लग्न, चतुर्थ सप्तम और दशम स्थानमें हों ॥ २० ॥ पापग्रह तृतीय, षष्ठ दशम और एकादश स्थानमें हों, दोनों उत्तरा, रोहिणी, मृगशिरा, रेवती, चित्रा, अनुराधा, श्रवण,

पुष्य और स्वातीनक्षत्र हों, मंगलके सिवाय और वार हो, प्रतिष्ठा करनेवाला अनुकूल दिन हो तो समयमें देवताका स्थापन शुभ है ॥२१॥ सर्व देव साधारण प्रतिमाप्रतिष्ठाविधान लोगोंको कल्याण देनेवाला जो हमने संक्षेपसे कहा है, सूर्यप्रतिमाका अधिवासन और प्रतिष्ठापनविधान विस्तारपूर्वक अलगही है अथवा सावित्र (सौरशास्त्र) में सब देवताओंका अधिवासन और प्रतिष्ठापन अलग २ विस्तारसे कहा है ॥ २२ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां षष्टितमोऽध्यायः ॥६०॥

अथैकषष्टितमोऽध्यायः

गोलक्षणम्

पराशरः प्राह बृहद्रथाय गोलक्षणं यत्क्रियते ततोऽयम् । मया समासः शुभलक्षणास्ताः सर्वास्तथाप्यागमतोऽभिधास्ये ॥१॥ सास्राविलरूक्षाक्ष्यो मूषकनयनाश्च न शुभदा गावः । प्रचलच्चिपिटविषाणाः करटाः खरसदृशवर्णाः ॥२॥ दशसप्तचतुर्दन्त्यः प्रलम्बमुण्डाना विनतपृष्ठाः । ह्रस्वस्थूलग्रीवा यवमध्या दारितखुराश्च ॥३॥ श्यावातिदीर्घजिह्वा गुल्फैरतितनुभिरतिबृहद्भिर्वा । अतिककुदा कृशदेहा नेष्टा हीनाधिकांग्यश्च ॥४॥ वृषभोऽप्येवं स्थूलातिलम्बवृषणः शिराततक्रोडः । स्थूलशिराचितगण्डस्त्रिस्थानं मेहते यश्च ॥५॥ मार्जाराक्षः कपिलः करटो वा न शुभदो द्विजस्यैव । कृष्णोष्ठतालुजिह्वः श्वशनो यूथस्य घातकरः ॥६॥ स्थूलशकृन्मणिशृङ्गः सितोदरः कृष्णसारवर्णश्च । गृहजातोऽपि त्याज्यो यूथविनाशावहोवृषभः ॥७॥ श्यामकपुष्पचिताङ्गो भस्माऽरुणसन्निभो बिडालाक्षः । विप्राणामपि न शुभं करोति वृषभः परिगृहीतः ॥८॥ ये चोद्धरन्ति पादान् पङ्कादिवयोजिताः कृशग्रीवाः । काचरनयना हीनाश्च पृष्ठतस्ते न भारसहाः ॥९॥ मृदुसंहतताम्रोष्ठास्तनूस्फिजस्ताम्रतालुजिह्वाश्च । तनुह्रस्वोच्चश्रवणाः सुकुक्षयः स्पष्टजंघाश्च ॥१०॥ आताम्रसंहतखुरा व्यूढोरस्का बृहत्ककुदयुक्ताः । स्निग्धश्लक्ष्णतनुत्वग्रोमाणस्ताम्रतनुशृङ्गाः ॥११॥ तनुभूस्पृग्वालधयो रक्तान्तविलोचना महोच्छ्वासाः । सिंहस्कन्धास्तन्वल्पकम्बलाः पूजिताः सुगताः ॥१२॥ वामावर्तैर्वामे दक्षिणपार्श्वे च दक्षिणावर्तैः । शुभदा भवन्त्यनडुहो जंघाभिश्चैणकनिभाभिः ॥१३॥ वैदूर्यमल्लिकाबुद्बुदेक्षणाः स्थूलनेत्रवर्माण. । पार्ष्णिभिरस्फुटिताभिः शस्ताः सर्वेऽपि भारवहाः ॥१४॥ घ्राणोद्देशे सबलिमर्जारमुखः सितश्च दक्षिणतः । कमलोत्पललाक्षाभः सुवालाधिर्वाजितुल्यजवः ॥१५॥ लम्बैर्वृषणैर्मेषोदरश्च संक्षिप्तवंक्षणाक्रोडः । ज्ञेयो भाराध्वसहो जवेऽश्वतुल्यश्च शस्तफलः ॥१५॥ सितवर्णः पिङ्गाक्षस्ताम्रविषाणेक्षणो महावक्त्रः । हंसो नाम शुभफलो यूथस्य विवर्द्धनः प्रोक्तः ॥१७॥

भूस्पृग्वालधिराताम्रविषाणो रक्तदृक् ककुद्मी च । कल्माषश्च स्वामिनमचिरात् कुरुते पतिं लक्ष्म्याः ॥१८॥ यो वा सितैकचरणो यथेष्टवर्णश्च सोऽपिशस्तफलः । मिश्रफलोऽपि ग्राह्यो यदि नैकान्तप्रशस्तोऽस्ति ॥१९॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां गोलक्षणं नामैकषष्टितमोऽध्यायः ॥६१॥

पराशरमुनिने अपने शिष्य वृहद्रथको जो गोलक्षण कहा है, उस ग्रंथसे लेकर हम संक्षेप करते हैं. सबही गौ शुभलक्षण होती हैं तो भी शास्त्रसे उनके शुभ अशुभ लक्षण कहते हैं ॥ १ ॥ जिन गौओंकी आंखें आंसुओंसे भरी हो, गदली हों और रूखी हों वह गौ शुभ नहीं होती, मूषकके समान नेत्रवाली भी शुभ नहीं, जिनके सींग हिलते हों और चपटे हों वह गौ शुभ नहीं. काला और लाल मिला हुआ जिनका रंग हो और गधेके तुल्य जिनका रंग हो, वह गौभी शुभ नहीं होती है ॥२॥ जिनके मुखमें दस, सात या चार दांत हों, जिनका मुख लम्बा और मुंड अर्थात् बिना सींगका हो जिनकी पीठ झुकी हुई हो, जिनकी गरदन छोटी और मोटी हो, जिनका मध्यभाग जौके तुल्य हो अर्थात् बीचसे बहुत मोटा हो, जिनके खुर बहुत फट रहे हों, नाभि श्यामरंगकी और बहुत लम्बी हो, जिनके ढँकने बहुत छोटे अथवा बहुत बड़े हों, जिनका थूही हुत ऊँचा हो, जिनका देह सदा दुबला रहे और जिनका कोई अंग हीन अथवा अधिक हो तो गौ शुभ नहीं होती है ॥३॥४॥ पहले कहे हुए लक्षणोंसे युक्त वृष हो तो ऐसा वहभी शुभ नहीं होता और स्थूल बहुत लम्बे हैं अंड-कोश जिसके, शिराओं करके व्याप्त है क्रोड जिसका, स्थूल शिराओं करके व्याप्त हैं कपोल तीन स्थानोंसे जो मेहन करे अर्थात् जिसके दोनों नेत्रोंसे आंसू टपके और शिश्नसे मूत्र गिरे ॥ ५ ॥ बिडालकेसे जिसके नेत्र हों, जिसका कपिल अथवा करट नीलरक्त रंग हो ऐसा वृष ब्राह्मणको भी शुभ नहीं होता फिर और वर्णोंकी तो बातही क्या है, जिसके ओष्ठ, तालु, जिह्वा काले रंगके हों और जो वृष श्वसन अर्थात डरनेवाला हो वह अपने यूथका नाश करता है ॥ ६ ॥ जिसका गोबर, मणि (लिंगका अग्रभाग) और शृंग स्थूल हों, श्वेतवर्णका पेट हो और शरीरका रंग कृष्ण और श्वेत मिलकर हो ऐसा वृष घरमें उत्पन्न हुआ हो तोभी उसका त्यागही करना चाहिये, बल्कि वहभी यूथका नाश करनेवाला होता है ॥ ७ ॥ जिसके शरीरमें काले फूल पड रहे हों और बिल्लीके समान जिसके नेत्र हों ऐसा वृष ग्रहण किया हुआ ब्राह्मणोंकोभी शुभ नहीं होगा ॥ ८ ॥ भारके नीचे जोडा हुआ बैल ऐसें पैर उठावे जैसे कर्दममें गड़े हुए पैरोंको बडे यत्नसे उखाडते हैं. जिनकी ग्रीवा दुर्बल हो, नेत्र काचरे हों, पीठ छोटी या दबी हुई हो वह बैल भार उठानेमें समर्थ नही होते हैं ॥ ९ ॥ कोमल मिले हुए और तांबेके रंगके जिनके ओष्ठ हों, छोटी स्फिक् (कटिस्थमांसपिंड) हों, तांबेके रंगके तालु और जीभ हों छोटे, पतले और ऊँचे जिनके कान हो सुन्दर पेट हो, सीधा जंघा हो ॥ १० ॥ तांबेके वर्ण और मिले हुए खुर हों छाती दृढ हो, बड़ा ककुद (थूही) हो स्निग्ध (चिकने) कोमल और तनु (पतले) जिनके त्वचा और रोम हों. तांबेके रंगके शरीर और सींग हो ॥ ११ ॥ पतली और भूमिको स्पर्श करनेवाली जिनकी पूंछ हो, जिनके नेत्रोंके अंत लाल हों दीर्घ श्वास लेनेवाले हों, सिंहकेसे जिनके कंधे हो पतला और छोटा जिनका गलकंबल, सुन्दर जिनकी गति हो ऐसे वृषभ अच्छे होते हैं ॥ १२ ॥ जिनके वाम भागमें बाईं ओर घूमें हुए आवर्त (भौरी) और दक्षिणभागमें दाहिनी और घूमें हुए आवर्त और जिनकी जंघा मेंढेकी जंघाओं के समान हों ऐचे बैल शुभ होते हैं ॥ १३ ॥ वैदूर्यमणिके समान

जिनके नेत्र हों, निवारीपुष्पके समान जिनके नेत्र हों, अर्थात् नेत्रोंके बाहर चारों ओर शुक्ल रेखा हों, जल बुद्बुदके समान जिनके नेत्र हों, जिनके नेत्र और शरीर स्थूल हों, खुरके पिछले भाग जिनके फूटे हुए न हों सो सब बैल शुभ होते हैं और भार उठा सकते हैं ।। १४ ।। जिस बैलकी नांकमें बलि पडे. बिलावके तुल्य जिसका मुख हो, दाहिना भाग जिसका श्वेत हो, कमल (नील-कमल) या लाखके समान जिसकी कांति हो. अच्छी पूंछ हो, गमनमें घोडेकासा वेग हो ।। १५ ।। लम्बे वृषण हों, मेंढेकासा पेट हो. वंक्षण (पिछली जंघा और वृषणोंका मध्यभाग) और क्रोड (अगली जंघाओंका मध्यभाग) जिसके संकुचित हों ऐसा बैल भार उठानेमें और मार्ग चलनेमें समर्थ होता है, घोडेके बराबर जिसका वेग हो वह बैल शुभही होता है ।। १६ ।। जिस बैल का श्वेत वर्ण हो, तांबेके रंगके सींग और नेत्र हो, बडा मुख हो उसको हंस कहते हैं वह शुभ होता है और अपने यूथकी वृद्धि करता है ।। १७ ।। जिस बैलकी पूंछ भूमिका छूती हो, तांबेके रंगके जिसके सींग हों, लाल नेत्र हों, ककुद (थूही) करके युक्त हो ऐसा बैल अपने स्वामीको शीघ्रही लक्ष्मीवान् कर देता है ।।१८।। चाहे जिस रंगका बैल हो परन्तु जिसके चारों पैर श्वेत हों वह शुभही होता है. जो केवल शुभ लक्षणोंवाला बैल न मिले तो मिश्र फल अर्थात् जिसमें कोई लक्षण शुभ और कोई अशुभ हों ऐसाही बैल लेवे. परन्तु शुभ लक्षण अधिक होने चाहिये ।। १९ ।।

इति श्रीवराहमिहिराचार्यविरचि० बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पंण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायामेकषष्टितमोऽध्यायः ।।६१।।

अथ द्विषष्टितमोऽध्यायः

श्वानलक्षणम्

पादः पञ्चनखास्त्रयोऽग्रचरणः षड्भिर्नखैर्दक्षिणस्ताम्रोष्ठाग्रनसो मृगेश्वरगतिर्जिघ्रन् भुवं याति च । लांगूलं ससटं दृगृक्षसदृशौ कर्णौच लम्बौ मृदू यस्य स्यात्स करोति पोष्टुरचिरात्पुष्टां श्रियं श्वा गृहे ।।१।। पादे पादे पञ्च पञ्चाग्र पादे वामे यस्याः षण्नखा मल्लिकाक्ष्याः । वक्रं पुच्छं पिङ्गला लम्बकर्णी या सा राष्ट्रं कुक्कुरी पाति पोष्टुः ।।२।।

इति श्रीवराहमिहिरकृतौ बृहत्सं० श्वलक्षणं नाम द्विषष्टितमोऽध्यायः ।।६२।।

जिस कुत्तेके तीन पैरोंमे पांच २ नख हों और आगेके दाहिने पांवमें छः नख हों, ओष्ठ और नासिकाका अग्रभाग तांबेके तुल्य लाल रंग हो, सिंहके तुल्य जिसकी गति हो और भूमिको सूंघता हुआ चले, जिसकी पूंछ बहुत बालोंसे झबरी हो रीछकेसे नेत्र हों, दोनों कान लम्बे और कोमल हों ऐसा कुत्ता अपने पोषण करनेवाले स्वामीके घरमें लक्ष्मीको बढाता है ।। १ ।। जिस कुत्तीके तीन पांवोंमें पांच २ नख हों और अगले बांये पैरमें छः नख हों और जिसके नेत्रों के बाहर मल्लिका पुष्पकीसी श्वेत रेखा हो, पूंछ टेढी हो, पिंगलवर्ण हो और लम्बे कान हों ऐसी कुतिया अपने पोषण करनेवाले राज्यकी रक्षा करती है ।। २ ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य पंडितबलदेवप्रसादमिश्रविरचि० हिन्दीटीकायां द्विषष्टितमोऽध्यायः ।।६२।।

अथ त्रिषष्टितमोध्यायः

कुक्कुटलक्षणम्

कुक्कुटस्त्वृजुतनूरुहाऽङ्गुलिस्ताम्रवक्त्रनखचूलिकः सितः । रौति सुस्वरमुषात्यये च यो वृद्धिदः स नृपराष्ट्रवाजिनाम् ॥१॥ यवग्रीवो यो वा बदरसदृशो वापि विहगो बृहन्मूर्द्धा वर्णैर्भवति बहुभिर्यश्च रुचिरः । स शस्तः संग्रामे मधुमधुपवर्णश्च जयकृन्न शस्तो योऽतोऽन्यः कृशतनुरवः खञ्जचरणः ॥ २ ॥ कुक्कुटी च मृदुचारुभाषिणी स्निग्धमूर्तिरुचिराननेक्षणा । सा ददाति सुचिरं महीक्षितां श्रीयशोविजयवीर्यसम्पदः ॥३॥

इति श्रीवराहमिहिरकृतौ बृ० कुक्कुटलक्षणं नाम त्रिषष्टितमोऽध्यायः ॥६३॥

जिस कुक्कुट (मुर्गा) के पंख और अंगुली सीधी हों, मुख, नख और चोटी जिसकी तांबेके समान लाल रंग हो, श्वेत वर्ण हो. रात्रिकी समाप्तिमें अच्छे स्वरसे बोले ऐसा मुरगा राजाके राज्य और घोडोंकी वृद्धि करता है ॥ १ ॥ जिस कुक्कुटकी गरदन जौके आकारके समान, पके हुए बेरके समान जिसका लाल रंग हो, बडा मस्तक हो, बहुतसे श्वेत, पीत्त, रक्त, क्रृष्ण आदि रंगोंसे युक्त हो और सुन्दर हो ऐसा कुक्कुट युद्धमें शुभ होता है. शहतके तुल्य जिसका रंग अथवा भ्रमरके तुल्य जिसका रंग हो वह कुक्कुटभी युद्धमें जय करता है, इसके सिवाय जो और भांतिका कुक्कुट हो वह शुभ नहीं होता, जिसका शरीर कृश हो, शब्द मंद हो, पैरसे लंगडा हो वह कुक्कुटभी शुभ नहीं होता ॥ २ ॥ जो मुरगी मृदु और सुन्दर शब्द कर, स्निग्ध शरीरवाली, मुख और नेत्र सुन्दर हों ऐसी कुक्कुटी राजाओंको चिरकालतक लक्ष्मी, यश, विजय, बल और सम्पत्ति देती है ॥ ३ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्यपंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां त्रिषष्टितमोऽध्यायः ॥६३॥

अथ चतुःषष्टितमोऽध्यायः

कूर्मलक्षणम्

स्फटिकरजतवर्णो नीलराजीविचित्रः कलशसदृशमूर्तिश्चारुवंशश्च कूर्मः । अरुणसमवपुर्वा सर्षपाकारचित्रः सकलनृपमहत्त्वं मंदिरस्थः करोति ॥१॥ अञ्जनभृङ्गश्यामतनुर्वा बिन्दुविचित्रोऽव्यङ्गशरीरः । सर्पशिरा या स्थूलगलो यः सोऽपि नृपाणां राष्ट्रविवृद्ध्यै ॥२॥ वैदूर्यत्विट् स्थूलकण्ठस्त्रिकोणो गूढच्छिद्रश्चारुवंशश्च शस्तः । क्रीडावाप्यां तोयपूर्णे मणौ वा कार्यः कूर्मो मंगलार्थं नरेन्द्रैः ॥३॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां कूर्मलक्षणं नाम चतुःषष्टितमोऽध्यायः ॥६४॥

जो कछुआ स्फटिक अथवा चांदीके तुल्य शुक्ल वर्ण हो और नीली रेखाओंसे चित्रित हो, कलशके समान जिसका आकार हो, सुन्दर जिसका वंश (पीठकी हड्डी) हो अथवा लाल रंगका कछुआ हो. और सरसोंके बिन्दुओंसे चित्रित हो ऐसा कूर्म घरमें स्थित हो तो सब राजाओंमें बडाई करता है ।। १ ।। अञ्जन या भ्रमरके तुल्य जिस कूर्मका श्याम शरीर हो और बिन्दुओंसे विचित्र हो, सम्पूर्ण अंग पूर्ण हो, सर्पके समान जिसका शिर हो और गला स्थूल हो ऐसा कूर्म राजाओंका राज्य बढ़ानेके लिये होता है ।। २ ।। वैदूर्यमणिके समान जिस कछुएकी कांति हो, कंठ स्थूल हो, त्रिकोण आकार हो, सब छिद्र उसके गुप्त हों और पृष्ठवंश सुंदर हो ऐसे कूर्मको मंगलके लिये राजा अपना क्रीडावापीमें अथवा जलसे भरे बडे मटकेमें रक्खे ।। ३ ।।

इति श्रीवराहमिहिराचायविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य - पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां चतुःषष्टितमोऽध्यायः ।।६४।।

अथ पंचषष्टितमोध्यायः

छागलक्षणम्.

छागशुभाशुभलक्षणमभिधास्ये नवदशाष्टदन्तास्ये । धन्याःस्थाप्या वेश्मनि संत्याज्याः सप्तदन्ता ये ।।१।। दक्षिणपार्श्वे मण्डलमसितं शुक्लस्य शुभफलं भवति ।। ऋष्यनिभकृष्णलोहितवर्णानां श्वेतमपि शुभदम् ।।२।। स्तनवदवलम्बते यः कण्ठेऽजानां मणिः स विज्ञेयः । एकमणिः शुभफलकृद्धन्यतमा द्वित्रिमणयो ये ।।३।। मुण्डाः सर्वे शुभदाः सर्वसिताः सर्वकृष्णदेहाश्च । अर्धासिताः सितार्धा धन्याः कपिलार्धकृष्णाश्च ।।४।। विचरति यूथस्याग्रे प्रथमं चाम्भोऽवगाहते योऽजः । स शुभः सितमूर्धा वा मूर्धनि वा कृत्तिका यस्य ।।५।। सपृषतकण्ठशिरा वा तिलपिष्टनिभश्च ताम्रदृक् शस्तः । कृष्णचरणः सितो वा कृष्णो वा श्वेतचरणो यः ।।६।। यः कृष्णाण्डः श्वेतो मध्ये कृष्णेन भवति पट्टेन । यो वा चरति सशब्दं मन्दं च स शोभनश्छागः ।।७।। ऋष्यशिरोरुहपादो यो वा प्राक् पाण्डुरोऽपरे नीलः । स भवति शुभकृच्छागः श्लोकश्चाप्यत्र गर्गोक्तः ।।८।। कुट्टकः कुटिलश्चैव जटिलो वामनस्तथा । ते चत्वारः श्रियः पुत्रा नालक्ष्मीके वसन्ति वै ।।९।। अथाप्रशस्ताः खरतुल्यनादाः प्रदीप्तपुच्छाः कुनखा विवर्णाः । निकृत्तकर्णा द्विपमस्तकाश्च भवन्ति ये चासिततालुजिह्वाः ।।१०।। वर्णैः प्रशस्तैर्मणिभिश्च युक्ता मुण्डाश्च ये ताम्रविलोचनाश्च । ते पूजिता वेश्मसु मानवानां सौख्यानि कुर्वन्ति यशः श्रियं च ।।११।।

इति श्रीवराहमिहिरकृतौ बृहत्सं० छागलक्षणं नाम पञ्चषष्टितमोऽध्यायः।।६५।।

अब बकरेका शुभ अशुभ लक्षण कहते हैं, जिनके नौ या दश या आठ दांत हों वे छाग शुभ होते हैं और घरमें रखने चाहिये. जिनके सात दांत हों उनको न रक्खे कारण कि वे अशुभ होते हैं ।। १ ।। श्वेत रंगके छागके दाहिने पार्श्वमें काले रंगका मंडल हो तो शुभ होता है. जिस छाग

का रंग ऋष्यमृगके तुल्य नीला, काला अथवा लाल हो तो उसके दक्षिण पार्श्वमें श्वेतमंडल-भी शुभ होता है ॥ २ ॥ छागोंके गलेमें जो स्तनकी भांति लटकता है उसे मणि कहते हैं. जिस छागके एक मणि हो वह शुभ फल करता है और जिसको दो अथवा तीन मणि हों वे छाग तो बहुतही शुभ होते हैं ॥ ३ ॥ विना सींगके सब छाग शुभ होते हैं, जिनका सब शरीर श्वेत हो अथवा सब शरीर कृष्ण हो वे छाग शुभ होते हैं, जो छाग आधे काले और आधे श्वेत हों वे शुभ होते हैं. जो छाग आधे कपिल और आधे कृष्ण हों वे भी शुभ होते हैं ॥४॥ जो छाग अपने यूथके आगे चले और सबसे पहले जलमें घुसे वह शुभ होता है या जिसका शिर श्वेत हो अथवा जिसके शिरमें कृत्तिका नक्षत्रकी भांति टीका हो अर्थात छः बिन्दु हों वह शुभ होता है ऐसे छागका नाम कुट्टक है ॥ ५ ॥ जिसके कंठ और शिरमें दूसरे रंगके बिन्दु हों, तिलपिष्टके समान अर्थात् श्वेत और पीत मिला हुआ जिसका रंग और तांबेके तुल्य जिसके लाल नेत्र हों वह शुभ होता है. जिसके शरीरका रंग श्वेत हो और चारों पैर काले हों अथवा शरीर काला हो और चारों पैर श्वेत हों वह छागभी शुभ होता है, ऐसे छागको कुटिल कहते हैं ॥६॥ जिस छागके शरीरका रंग श्वेत हो काले अंड हों और मध्यभागमें काला पट्टा हो तो अशुभ होता है, जो छाग धीरे २ चरे उसके चरनेके समय शब्द हो वह शुभ होता है. ऐसे छागको जटिल कहते हैं ॥ ७ ॥ ऋष्यमृगके समान नीले जिस छागके शिरके बाल और पांव हों और जो छाग अगले भागमें पांडुर वर्ण हो, पिछले भागमें नीले वर्ण हो वह छाग शुभ होता है, ऐसे छागको वामन कहते हैं, इस अर्थमें गर्ग-मुनिका श्लोक लिखते हैं ॥ ८ ॥ कुट्टक, कुटिल, जटिल और वामन अर्थात् जिनके पहले लक्षण कहे हैं यह चारों छाग लक्ष्मीके पुत्र हैं और लक्ष्मीहीन स्थानोंमें नहीं रहते अर्थात् जहां ऐसे छाग हों वहां लक्ष्मीका निवास होता है ॥९॥ अब अशुभ छाग कहते हैं. जिनका शब्द गायके शब्दके समान हो, जिसकी पूंछ टेढी अथवा बहुत उष्ण हो, बुरे नख हों, शरीरका रंग बुरा हो, कान कटे हों, हाथीकासा मस्तक हो, जिनका तालु और जिह्वा काली हो ऐसे छाग अशुभ होते हैं ॥ १० ॥ जो छाग उत्तम रंग और कंठ मणियों करके युक्त हों, विना सींगोंके हों और जिनके नेत्र लाल हों, वे छाग मनुष्योंके घरमें शुभ होते हैं और सुख, यश और लक्ष्मीको करते है ॥ ११ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां पंचषष्टितमोऽध्यायः ॥६५॥

अथ षट्षष्टितमोऽध्यायः

अश्वलक्षणम्.

दीर्घग्रीवाक्षिकूटस्त्रिकहृदयपृथुस्ताम्रवाल्वोष्ठजिह्वः सूक्ष्मत्वक्केशवालः सुश-फगतिमुखो ह्रस्वकर्णोष्ठपुच्छः। जंघाजानूरुवृत्तः समसितदशनश्चारुसंस्थानरूपो वाजी सर्वांगशुद्धो भवति नरपतेः शत्रुनाशाय नित्यम् ॥१॥ अश्रुपातहनुगण्डहृद्गलप्रोथशंखकटिबस्तिजानुनि। मुष्कनाभिककुदे तथा गुदे सव्यकुक्षिचरणेषु चाशुभाः ॥२॥ ये प्रपाणगलकर्णसंस्थिताः पृष्ठमध्यनयनोपरि स्थिताः। ओष्ठसक्थिभुज-कुक्षिपार्श्वगास्ते ललाटसहिताः सुशोभनाः ॥३॥ तेषां प्रपाण एको ललाटकेशेषु च ध्रुवावर्तः। रन्ध्रोपरन्ध्रमूर्धनि वक्षसि चेति स्मृतौ द्वौ द्वौ ॥४॥ षड्भिर्दन्तै

सिताभैर्भवति हयशिशुस्तैः कषायैर्द्विवर्षः सन्दंशैर्मध्यमान्त्यैः पतितसमुदितैस्त्र्यब्दपञ्चाब्दिकोऽश्वः । सन्दंशानुक्रमेण त्रिकपरिगणिताः कालिकापीतशुक्लाः काचा माक्षीकशंखावटचलनमतो दन्तपातं च विद्धि ॥५॥

इति श्रीवराहमिहिरकृतौ बृहत्सं० अश्वलक्षणं नाम षट्षष्टितमोऽध्यायः ॥६६॥

जिस घोडेकी ग्रीवा और अक्षिकूट अर्थात् नेत्रोंका कोश दीर्घ हो, त्रिक (कटिभाग) और हृदय विस्तीर्ण हो, तालु, ओष्ठ और जीभ तांबेके तुल्य लाल रंगकी हो, शरीरकी त्वचा, मस्तकके केश और पूंछके बाल सूक्ष्म हों, शफ (सुम्म) गति और मुख सुन्दर हो, कान, ओष्ठ और पूंछ यह तीन अंग छोटे हों, यहां पुच्छ शब्द करके पूंछके बीचकी हड्डीका ग्रहण होता है. जंघा, जानु और ऊरु जिसके गोल हों सम (बराबर) और श्वेत दंत हो, जिसका आकार और रूप सुन्दर हो ऐसा घोडा हो और वह सर्वांग शुद्ध हो अर्थात् किसी अंगमें कोई अशुभ आवर्त्त न हो वह घोडा जिस राजाके हो नित्य उसके शत्रुओं का नाश करता है॥१॥ अश्रुपात जहां आंसू गिरे, हनु मुख, गंड (कपोल) हृदय, गाल, प्रोथ (नाभिका अधोभाग), शंख (कनपटी कर्णके समीप), कटि, बस्ति (नाभि लिंगका मध्यभाग), जानु, अंडकोश, नाभि, ककुदा (बाहुके पृष्टभागमें कृकाटिकाके समीप) गुदा, दक्षिणकुक्षी और पैर इनमें भौंरियोंका होना अशुभ है ॥२॥ जो भौंरी प्रधान (ऊपरके ओष्टका तल), कंठ कर्ण, पीठका मध्यभाग, नेत्रोंके ऊपर ध्रुवोंके समीप, ओष्ठ, सक्थि (पिछला भाग), भुज (अगले पैर) वामकुक्षि, पार्श्व और ललाट इन स्थानोंमें हो तो शुभ होता है ॥३॥ घोडोंके शरीरमें दश भौंरी अवश्य होती हैं, उनको ध्रुवावर्त्त कहते हैं. उनमें एक आवर्त प्रपान (ऊपरके ओष्ठका अधोभाग) में और केशोंके नीचे ललाटमें एक आवर्त होता है, रंध्र (कुक्षि और नाभिका मध्यभाग), उपरंध्र (रंध्रसे ऊपर), मस्तक और छाती इन चार स्थानोंमें दो दो आवर्त होते हैं. इस भांति यह दश ध्रुवावर्त हैं ॥ ४ ॥ घोडोंकी दंतपंक्तिमें दो दाढोंके बीचके छः दांत श्वेत वर्ण हों तो एक वर्षका बछेरा होता है. वेही छः दांत कषायरंग (काला और लाल मिला) के हों तो दो वर्षका घोडा होता है. दोनों दंतपंक्तियोंमें बीचके समान दो २ दांत संदंश कहाते हैं, सदंशोंके दोनों ओरका एक २ दांत मध्य और मध्योंके दोनों ओरका एक २ दांत अंत्य कहाता है. संदंश गिरकर फिर जमे हों तो चार वर्षका और अंत्य गिरकर फिर जमे हों तो पांच वर्षका अश्व होता है. संदंशके अनुक्रमसे कालिका आदि रंगों करके तीन २ वर्ष बढते हैं इसका यह तात्पर्य है कि, संदशोंके उपर कालिका (काले बिन्दु) हो तो छः वर्ष, मध्यमोंके ऊपर कालिका हो तो सात वर्ष और अंत्योंके ऊपर कालिका हो तो आठ वर्ष अश्वकी अवस्था जानो. इसी प्रकार संदंशोंपर पीत बिन्दु हो तो नौ वर्ष, मध्योंपर पीत बिन्दु हों तो दश, पर अंत्योंपर पीत बिन्दु हो तो ग्यारह वर्ष जानना चाहिये. संदंश आदिके ऊपर शुक्ल बिन्दु होनेसे क्रमानुसार बारह तेरह और चौदह वर्ष जानो. संदंश आदिके ऊपर काचके रंगके बिन्दु होनेसे पन्द्रह सोलह और सत्रह वर्ष क्रमसे जानो. माक्षीक (शहत) के रंग बिन्दु होनेसे क्रमपूर्वक अठारह उन्नीस और वीस वर्ष जानो. संदंश आदिके ऊपर शंखरंगके बिन्दु होनेसे इक्कीस, बाईस और तेईस वर्ष क्रमसे जानो, संदंश आदिमें छिद्र होनेसे क्रमपूर्वक चौबीस पच्चीस और छब्बीस वर्ष जानो, संदंश आदिके हिलनेसे क्रमपूर्वक सत्ताईस, अठ्ठाईस और उनतीस वर्ष जानो और संदंश आदि दांतोंके गिरनेसे अर्थात् संदंश गिर जाय तो तीस वर्ष, मध्य गिरजाय तो इकतीस वर्ष और

अंत्य गिर जाय तो बत्तीस वर्ष अश्वकी उमर होती है, यह घोडोंका परमायुष बत्तीस वर्ष हैं इस लिये बत्तीस वर्षतक अवस्था जाननेके चिह्न लिखे हैं ॥ ५ ॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां षट्षष्टितमोऽध्यायः ॥६६॥

अथ सप्तषष्टितमोऽध्यायः

गजलक्षणम्

मध्वाभदंन्ता सुविभक्तदेहा न चोपदिग्धाश्च कृशाः क्षमाश्च। गात्रैः समैश्चापसमानवंशा वराहतुल्यैर्जघनैश्च भद्राः ॥१॥ वक्षोऽथ कक्षावलयः श्लथाश्च लम्बोदरस्त्वग्बृहती गलश्च। स्थूला च कुक्षिः सह पेचकेन सैंही च दृङमन्दमतङ्गजस्य ॥२॥ मृगास्तु ह्रस्वाधरवालमेढ्रास्तन्वंघ्रिकण्ठद्विजहस्तकर्णाः। स्थूलेक्षणाश्वेति तथोक्तचिह्नैः सङ्कीर्णनागा व्यतिमिश्रचिह्नाः ॥३॥ पञ्चोन्नतिः सप्त मृगस्य दैर्घ्यमष्टौ च हस्ताः परिणाहमानम्। एकद्विवृद्धावथ मन्दभद्रौ सङ्कीर्णनागोऽनियतप्रमाणः ॥४॥ भद्रस्य वर्णो हरितो मदस्य मन्दस्य हारिद्रकसन्निकाशः। कृष्णो मदश्चाभिहितो मृगस्य सङ्कीर्णनागस्य मदो विमिश्रः ॥५॥ ताम्रोष्ठतालुवदनाः कलविङ्कनेत्राः स्निग्धोन्नताग्रदशनाः पृथुलायतास्याः। चापोन्नतायतनिगूढनिमग्नवंशास्तन्वेकरोमचितकूर्मसमानकुम्भाः ॥ ६ ॥ विस्तीर्णकर्णहनुनाभिललाटगुह्याः कूर्मोन्नतद्विनवविंशतिभिर्नखैश्च। रेखात्रयोपचितवृत्तकराः सुवाला धन्याः सुगन्धिमदपुष्करमारुताश्च ॥७॥ दीर्घाङ्गुलिरक्तपुष्कराः सजलाम्भोदनिनादबृंहिणः। बृहदायतवृत्तकन्धरा धन्या भूमिपतेर्मतङ्गजाः ॥८॥ निर्मदाभ्यधिकहीननखाङ्गान् कुब्जवामनकमेषविषाणाम्। दृश्यकोशफलपुष्करहीनान् श्यावनीलशबलाऽसिततालून् ॥९॥ स्वल्पवक्त्ररुहमत्कुणषण्ढान् हस्तिनीं च गजलक्षणयुक्ताम्। गर्भिणीं च नृपतिः परदेशं प्रापयेदतिविरूपफलास्ते ॥१०॥

इति श्रीवराहमिहिरकृतौबृहत्सं० गजलक्षणं नाम सप्तषष्टितमोऽध्यायः ॥६७॥

चार प्रकारके हाथी होते हैं, भद्र, मंद, मृग और संकीर्ण, अब क्रमसे इनके लक्षण कहते हैं, जिन हाथियोंके दांत शहतके रंग हों, शरीरके सब अंग भलीभांति विभक्त हों, न बहुत मोटा और और न निर्बल जिनका देह हो, क्षम अर्थात् कार्यके योग्य हो, तुल्य अंगोंसे युक्त हो, धनुषके आकार जिनका पृष्ठवंश (पीठकी हड्डी) हो और सूकरके तुल्य जिनके जघन (कटिभाग) अर्थात् तुल्य हो वह हाथी भद्र जातिके होते हैं ॥ १ ॥ मंदजातिके हाथीकी छाती और मध्यभागकी बलि ढीली होती है, पेट लम्बा होता है, चर्म और कंठ स्थूल होता है, कुक्षि और पेचक (पुच्छमूल) भी स्थूल होता है और सिंहके समान दृष्टि होती है, यह मंदका लक्षण है ॥ २ ॥ मृगजातिके हाथियोंके नीचेका ओष्ठ पुच्छके बाल और मेढ्र (लिंग) यह अंग छोटे होते हैं, पैर, कंठ, दांत, शुंड और कर्णभी छोटे होते हैं और नेत्र बडे होते हैं, ये मृगके लक्षण हैं. इन तीन जातिके हाथियोंके

जो चिह्न कहे वे सब चिह्न जिन हाथियोंमें मिलते हों उनको सकीर्ण जातिके हाथी जानना चाहिये ।।३।। मृगजातिके हाथीकी ऊँचाई पांच हाथ, पूंछ मूलसे लेकर मस्तकके कुंभतक लम्बाई सात हाथ और मध्यभागकी मोटाई आठ हाथ होती है, एक हाथ बढानेसे मंदका और दो हाथ बढानेसे भद्रका प्रमाण होता है और नौ हाथ परिणाह मंदजातिके हाथीका होता है और सात हाथ ऊँचाई नौ हाथ लम्बाई और दश हाथ परिणाह भद्रजातिके हाथीका होता है, संकीर्ण जातिके हाथियोंकी ऊँचाई आदिका कुछ नियम नहीं है वे अनियत प्रमाणवाले होते हैं ।४।। भद्रजातिके हाथीका मद हरे रंगका, मंदजातिके हाथीका मद हलदीके समान पीले रंगका और मृगजातिके हाथीका मद काले रंगका होता है, संकीर्ण जातिके हाथीका मद मिश्र वर्ण होता है अर्थात् उनमें कई रंग होते हैं ।। ५ ।। जिन हाथियोंके अधर, तालु और मुख तांबेके समान लाल रंग हों, नेत्र घरों-में रहनेवाली चिडियोंके समान हों, स्निग्ध और ऊँचे अग्रभाग करके युक्त दांत हों, विस्तीर्ण और लम्बा मुख हो धनुषके समान ऊँचा दीर्घ, निगूढ और निमग्न पृष्ठवंश हो, कूर्मके समान कुंभ हो, जिनके कुंभोंके रोमकूपोंमें एक २ सूक्ष्म रोम हों ।। ६ ।। कर्ण, हनु, नाभि, ललाट, गुह्य, लिंग यह अंग विस्तीर्ण हों, कूर्मके समान मध्यसे ऊँचे अठारह अथवा बीस नख हों, खडी तीन रेखाओंसे युक्त और गोल शुंड हो, जिनका मद शुंडसे निकला हुआ सुगन्धयुक्त हो ऐसे हाथी उत्तम होते हैं ।। ७ ।। शुंडके अग्रभागको पुष्कर कहते हैं और पुष्करके आगे अंगुली होती है, जिन हाथियों की अंगुली दीर्घ हो, पुष्कर लाल रंगकी हो, जलसे भरे मेघके गर्जनेकी भांति जिनका बृंहित (हाथीके गलेका शब्द) हो, बडी दीर्घ और गोल जिनकी गरदन हो ऐसे हाथी राजाके लिये शुभ होते हैं ।।८।। जो हाथी कभी मस्त नहीं जिनके नख या अंग हीन अधिक हो अर्थात् नख अठारहसे कम अथवा बीससे अधिक हों, अंग भी शरीरकी बनिस्बत छोटे बडे हों, जो हाथी कुब्ज हों, मेंढोंके सींगोंके समान दांतवाले हों, जिनके अंडकोश देख पडते हों पुष्करसे हीन हो, श्याम रंग, नील रंग चित्रवर्ण और काले रंगका जिनका तालु हो ।। ९ ।। छोटे दांत हों, जो हाथी मत्कुण (मकुना) हों, षंड हो, इन सबको और जो हथिनी हाथीके लक्षणोंसे युक्त हो अर्थात् बडे २ दांत उसके हों मस्त होती हो इत्यादि और जो हथिनी गर्भिणी हो जाय उसको राजा अपने राज्यसे बाहर भेज दे. राज्यमें रहनेसे यह बहुत बुरा फल करते हैं, जिस हाथीकी छाती और जघन संकुचित हो, पीठ ऊंची हो, प्रमाणसे हीन हो और नाभि जिसकी ऊँची हो वह हाथी कुब्ज कहलाता है. लम्बाई और परिणाममें ठीक हो परंतु ऊँचाई बहुतही न्यून हो उस हाथीको वामन कहते हैं, जिसमें पूर्ण लक्षण ठीक २ हों परन्तु दांत न हों वह हाथी मत्कुण (मकुना) कहाता है, चलनेके समय जिस हाथीके पैर मिलते हों उसको षंढ कहते हैं ।। १० ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां सप्तषष्टितमोऽध्यायः ।।६७।।

अथाष्टषष्टितमोऽध्यायः

पुरुषलक्षणम्.

उन्मानमानगतिसंहतिसारवर्णस्नेहस्वरप्रकृतिसत्त्वमनूकमादौ । क्षेत्रं मृजां च विधिवत् कुशलोऽवलोक्य सामुद्रविद्वदति यातमनागतं च ।।१।। अस्वेदनौ मृदुतलौ कमलोदराभौ श्लिष्टांगुली रुचिरताम्रनखौ सुपार्ष्णी । उष्णौ शिराविरहितौ सुनि-

गूढगुल्फौ कूर्मोन्नतौ च चरणौ मनुजेश्वरस्य ॥२॥ शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ संशुष्कौ विरलांगुली च चरणौ दारिद्र्यदुःखप्रदौ । मार्गायोत्कटकौ कषायसदृशौ वंशस्य विच्छित्तिदौ ब्रह्मघ्नौ परिपक्वमृद्द्युतितलौ पीतावगम्यारतौ ॥३॥ प्रविरलतनुरोमवृत्तजङ्घा द्विरदकरप्रतिमैर्वरोरुभिश्च । उपचितसमजानवश्च भूपा धनरहिताः श्वभृगालतुल्यजङ्घाः ॥४॥ रोमैकैकं कूपके पार्थिवानां द्वे द्वे ज्ञेये पण्डितश्रोत्रियाणाम् । त्र्याद्यैर्निःस्वा मानवा दुःखभाजः केशाश्चैव निन्दिता भूजिताश्च ॥५॥ निर्मांसजानुर्म्रियते प्रवासे सौभाग्यमल्पैर्विकटैर्दरिद्राः । स्त्रीनिर्जिताश्चापि भवन्ति निम्नैः राज्यं समांसैश्च महद्भिरायुः ॥६॥ लिङ्गेऽल्पे धनवानपत्यरहितः स्थूले विहीनो धनैर्मेढ्रे वामनते सुतार्थरहितो वक्रेऽन्यथा पुत्रवान् । दारिद्र्यं विनते त्वधोऽल्पतनयो लिङ्गे शिरासन्तते स्थूलग्रन्थियुते सुखी मृदु करोत्यन्तं प्रमेहादिभिः ॥७॥ कोषनिगूढैर्भूपा दीर्घैर्भग्नैश्च वित्तपरिहीनाः । ऋजुवृत्तशेफसो लघुशिरालशिश्नाश्च धनवन्तः ॥८॥ जलमृत्युरेकवृषणो विषमैः स्त्रीलंपटःसमैः क्षितिपः । ह्रस्वायुश्चोद्बद्धैःप्रलम्बवृषणस्य शतमायुः ॥९॥ रक्तैराढ्या मणिभिर्निर्द्रव्याःपाण्डुरैश्च मलिनैश्च । सुखिनः सशब्दमूत्रा निःस्वा निःशब्दधाराश्च ॥१०॥ द्वित्रिचतुर्धाराभिः प्रदक्षिणावर्तवलितमूत्राभिः । पृथ्वीपतयो ज्ञेया विकीर्णमूत्राश्च धनहीनाः ॥११॥ एकैव मूत्रधारा वलिता रूपप्रधानसुतदात्री । स्निग्धोन्नतसममणयो धनवनितारत्नभोक्तारः ॥१२॥ मणिभिश्च मध्यनिम्नैः कन्यापितरो भवन्ति निःस्वाश्च । बहुपशुभाजो मध्योन्नतैश्च नात्युल्बणैर्धनिनः ॥१३॥ परिशुष्कबस्तिशीर्षा धनरहिता दुर्भगाश्च विज्ञेयाः । कुसुमसमगंधशुक्रा विज्ञातव्या महीपालाः ॥१४॥ मधुगन्धे बहुवित्ता मत्स्यसगन्धे बहून्यपत्यानि । तनुशुक्रः स्त्रीजनको मांससगन्धो महाभोगी ॥१५॥ मदिरागन्धे यज्वा क्षारसगन्धे च रेतसि दरिद्रः । शीघ्रं मैथुनगामी दीर्घायुरतोऽन्यथाल्पायुः ॥१६॥ निःस्वोऽतिस्थूलस्फिक् समांसलस्फिक् सुखान्वितो भवति । व्याघ्रान्तोऽध्यर्धस्फिग्मण्डूकस्फिग्नराधिपतिः ॥१७॥ सिंहकटिर्मनुजेन्द्रः कपिकरभकटिर्धनैः परित्यक्तः । समजठरा भोगयुता घटपिठरनिभोदरा निःस्वाः ॥१८॥ अविकलपार्श्वा धनिनो निम्नैर्वक्रैश्च भोगसन्त्यक्ताः । समकुक्षा भोगाढ्या निम्नाभिर्भोगपरिहीनाः ॥ १९ ॥ उन्नतकुक्षाः क्षितिपाः कठिनाः स्युर्मानवा विषमकुक्षाः । सर्पोदरा दरिद्रा भवन्ति बह्वाशिनश्चैव ॥२०॥ परिमण्डलोन्नताभिर्विस्तीर्णाभिश्च नाभिभिः सुखिनः । स्वल्पा त्वदृश्यनिम्ना नाभिः क्लेशावहा भवति ॥२१॥ वलिमध्यगता विषमा शूलाबाधं करोति नैःस्व्यंच । शाठ्यं वामावर्ता करोति मेधां प्रदक्षिणतः ॥२२॥ पार्श्वायता चिरायुषमुपरिष्टाच्चेश्वरं गवाढ्यमधः । शतपत्रकर्णिकाभा नाभिर्मनुजेश्वरं कुरुते ॥२३॥ शस्त्रान्तं स्त्रीभोगिनमाचार्यं बहुसुतं यथासंख्यम् । एकद्वित्रिचतुर्भिर्वलिभिर्विद्यान्नृपं

त्ववलिम् ॥२४॥ विषमवलयो मनुष्या भवन्त्यगम्याभिगामिनः पापाः। ऋजुवलयः सुखभाजः परदारद्वेषिणश्चैव ॥२५॥ मांसलमृदुभिः पार्श्वैः प्रदक्षिणावर्तरोमभिर्भूपाः। विपरीतैर्निर्द्रव्याः सुखपरिहीनाः परप्रेष्याः ॥२६॥ सुभगा भवन्त्यनुद्बद्धचूचुका निर्धना विषमदीर्घैः। पीनोपचितनिमग्नैः क्षितिपतयश्चूचुकैः सुखिनः ॥२७॥ हृदयं समुन्नतं पृथु न वेपनं मांसलं च नृपतीनाम्। अधमानां विपरीतं खररोमचितं शिरालं च ॥२८॥ समवक्षसोऽर्थवन्तः पीनैः शूरास्त्वकिञ्चनास्तनुभिः। विषमं वक्षो येषां ते निःस्वाः शस्त्रनिधनाश्च ॥२९॥ विषमैर्विषमो जत्रुभिरर्थविहीनोऽस्थिसन्धिपरिणद्धैः। उन्नतजत्रुर्भोगी निम्नैर्निःस्वोऽर्थवान् पीनैः ॥३०॥ चिपिटग्रीवो निःस्वः शुष्का शिरा च यस्य वा ग्रीवा। महिषग्रीवः शूरः शस्त्रान्तो वृषसमग्रीवः ॥३१॥ कम्बुग्रीवो राजा प्रलम्बकण्ठः प्रभक्षणो भवति। पृष्ठमभग्नमरोमशमर्थवतामशुभदमतोऽन्यत् ॥३२॥ अस्वेदनपीनोन्नतसुगन्धिसमरोमसंकुलाः कक्षाः। विज्ञातव्या धनिनामतोऽन्यथार्थैर्विहीनानाम् ॥३३॥ निर्मांसौ रोमचितौ भग्नावल्पौ च निर्धनस्यांसौ। विपुलावव्युच्छिन्नौ सुश्लिष्टौ सौख्यवीर्यवताम् ॥३४॥ करिकरसदृशौ वृत्तावाजान्ववलम्बिनौ समौ पीनौ। बाहू पृथिवीशानामधमानां रोमशौ ह्रस्वौ ॥३५॥ हस्ताङ्गुलयो दीर्घाश्चिरायुषामवलिताश्च सुभगानाम्। मेधाविनां च सूक्ष्माश्चिपिटाः परकर्मनिरतानाम् ॥३६॥ स्थूलाभिर्धनरहिता बहिर्नताभिश्च शस्त्रनिर्याणाः। कपिसदृशकरा धनिनो व्याघ्रोपमपाणयः पापाः ॥३७॥ मणिबन्धनैर्निगूढैर्दृढैश्च सुश्लिष्टसन्धिभिर्भूपाः। हीनैर्हस्तच्छेदः श्लथैः सशब्दैश्च निर्द्रव्याः ॥३८॥ पितृवित्तेन विहीना भवन्ति निम्नेन करतलेन नराः। संवृत्तनिम्नैर्धनिनः प्रोत्तानकराश्च दातारः ॥३९॥ विषमैर्विषमा निःस्वाश्चकरतलैरीश्वरास्तु लाक्षाभैः। पीतैरगम्यवनिताभिगामिनो निर्धना रूक्षैः ॥४०॥ तुषसदृशनखाः क्लीबाश्चिपिटैः स्फुटितैश्च वित्तसन्त्यक्ताः। कुनखविवर्णैः परतर्ककाश्च ताम्रैश्च भूपतयः ॥४१॥ अंगुष्ठयवैराढ्याः सुतवन्तोऽङ्गुष्ठमूलगैश्च यवैः। दीर्घांगुलिपर्वाणः सुभगा दीर्घायुषश्चैव ॥४२॥ स्निग्धा निम्ना रेखा धनिनां तद्व्यत्ययेन निःस्वानाम्। विरलांगुलयो निःस्वा धनसञ्चयिनो घनांगुलयः ॥४३॥ तिस्रो रेखा मणिबन्धनोत्थिताः करतलोपगा नृपतेः। मीनयुगाङ्कितपाणिर्नित्यं सत्रप्रदो भवति ॥४४॥ वज्राकारा धनिनां विद्याभाजां तु मीनपुच्छनिभाः। शंखातपत्रशिबिकागजाश्वपद्मोपमा नृपतेः ॥४५॥ कलशमृणालपताकांकुशोपमाभिर्भवन्ति निधिपालाः। दामनिभाभिश्चाढ्याः स्वस्तिकरूपाभिरैश्वर्यम् ॥४६॥ चक्रासिपरशुतोमरशक्तिधनुः कुन्तसन्निभा रेखाः। कुर्वन्ति चमूनाथं यज्वानमुलूखलाकाराः ॥४७॥ मकरध्वजकोष्ठागारसन्निभाभिर्महाधनोपेताः। वेदीनिभेन चैवाग्निहोत्रिणो ब्रह्मतीर्थेन ॥४८॥ वापीदेवकुलाद्यैर्धर्मं कुर्वन्ति च त्रिकोणाभिः। अंगुष्ठमूलरेखाः पुत्राः

स्युर्दारिकाः सूक्ष्माः ।।४९।। रेखाः प्रदेशनीगाः शतायुषां कल्पनीयमूनाभिः । छिन्नाभिर्द्रुमपतनं बहुरेखारेखिणो निःस्वाः ।।५०।। अतिकृशदीर्घैश्चिबकैर्निर्द्रव्या मांसलैर्धनोपेताः । बिम्बोपमैरवक्रैरधरैर्भूपास्तनुभिरस्वाः ।।५१।। ओष्ठैः स्फुटितविखण्डितविवर्णरूक्षैश्च धनपरित्यक्ताः। स्निग्धा घनाश्च दशना सुतीक्ष्णदंष्ट्राः समाश्च शुभाः ।।५२।। जिह्वा रक्ता दीर्घा श्लक्ष्णा सुसमा च भोगिनां ज्ञेया । श्वेता कृष्णा परुषा निर्द्रव्याणां तथा तालु ।।५३।। वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समं च भूपानाम् । विपरीतं क्लेशभुजां महामुखं दुर्भगाणां च ।।५४।। स्त्रीमुखमनपत्यानां शाठ्यवतां मण्डलं परिज्ञेयम् । दीर्घं निर्द्रव्याणां भीरुमुखाः पापकर्माणः ।।५५।। चतुरश्रं धूर्तानां निम्नं वक्त्रं च तनयरहितानाम् । कृपणानामतिह्रस्वं संपूर्णं भोगिनां कान्तम् ।।५६।। अस्फुटिताग्रं स्निग्धं श्मश्रु शुभं मृदु च सन्नतं चैव । रक्तैः परुषैश्चौराः श्मश्रुभिरल्पैश्च विज्ञेयाः ।।५७।। निर्मांसैः कर्णैः पापमृत्यवश्चर्पटैः सुबहुभोगाः । कृपणाश्च ह्रस्वकर्णाः शंकुश्रवणाश्चमूपतयः ।।५८।। रोमशकर्णा दीर्घायुषस्तु धनभागिनो विपुलकर्णाः । क्रूराः शिरावनद्धैर्व्यालम्बैर्मांसलैःसुखिनः ।।५९।। भोगी त्वनिम्नगण्डो मन्त्री सम्पूर्णमांसगण्डो यः । सुखभाक् शुकसमनासश्चिरजीवी शुष्कनासश्च ।। ६० ।। छिन्नानुरूपयागम्यगामिनो दीर्घया तु सौभाग्यम् । आकुञ्चितया चौरःस्त्रीमृत्युः स्याच्चिपिटनासः ।।६१।। धनिनोऽग्रवक्रनासा दक्षिणवक्राः प्रभक्षणाः क्रूराः । ऋज्वी स्वल्पच्छिद्रा सुपुटा नासा सभाग्यानाम् ।।६२।। धनिनां क्षुतं सकृद् द्वित्रिपिण्डितं ह्लादि सानुनादं च। दीर्घायुषां प्रमुक्तं विज्ञेयं सहतं चैव ।।६३।। पद्मदलाभैर्धनिनो रक्तान्तविलोचनाः श्रियोभाजः । मधुपिङ्गलैर्महार्था मार्जारविलोचनाः पापाः ।।६४।। हरिणाक्षा मण्डललोचनाश्च जिह्मैश्च लोचनैश्चौराः । क्रूराः केकरनेत्रा गजसदृशदृशश्चमूपतयः ।।६५।। ऐश्वर्यं गंभीरैर्नीलोत्पलकान्तिभिश्च विद्वांसः । अतिकृष्णतारकाणामक्ष्णामुत्पाटनं भवति ।।६६।। मंत्रित्वं स्थूलदृशां श्यावाक्षाणां च भवति सौभाग्यम् । दीना दृग्निःस्वानां स्निग्धा विपुलार्थभोगवताम् ।।६७।।अभ्युन्नताभिरल्पायुषो विशालोन्नताभिरतिसुखिनः । विषमभ्रुवो दरिद्रा बालेन्दुनतभ्रुवः सधनाः ।।६८।। दीर्घासंसक्ताभिर्धानिनः खण्डाभिरर्थपरिहीनाः । मध्यविनतभ्रुवो ये ते सक्ताः स्त्रीष्वगम्यासु ।।६९।। उन्नतविपुलं शंखैर्धन्या निम्नैः सुतार्थसन्त्यक्ताः । विषमललाटा विधना धनवन्तोऽर्धेन्दुसदृशेन ।।७०।। शुक्तिविशालैराचार्यता शिरासन्ततैरधर्मरता । उन्नतशिराभिराढ्याः स्वस्तिकवत्संस्थिताभिश्च ।।७१।। निम्नललाटा वधबन्धभागिनः क्रूरकर्मनिरताश्च। अभ्युन्नतैश्च भूपाः कृपणाः स्युः संवृत्तललाटाः ।।७२।। रुदितमदीनमनश्रु स्निग्धं च शुभावहं मनुष्याणाम् । रूक्षं दीनं प्रचुराश्रु चैव न शुभप्रदं पुंसाम् ।।७३।। हसितं शुभदमकम्पं सनिमीलितलोचनं च पापस्य । दुष्टस्य हसितमसकृत् सोन्मादस्यासकृ-

त्प्रान्ते ॥७४॥ तिस्रो रेखाः शतजीविनां ललाटायताः स्थिता यदि ताः। चतसृभिरवनीशत्वं नवतिश्चायुः सपञ्चाब्दाः ॥७५॥ विच्छिन्नाभिश्चागम्यगामिनो नवतिरप्यरेखेण। केशान्तोपगताभी रेखाभिरशीतिवर्षायुः ॥७६॥ पञ्चभिरायुः सप्ततिरेकाग्रावस्थिता भरपि षष्टिः। बहुरेखेण शतार्धं चत्वारिंशच्च वक्राभिः ॥७७॥ त्रिंशद्भ्रूलग्नाभिर्विशतिकश्चैव वामवक्राभिः। क्षुद्राभिः स्वल्पायुर्न्यूनाभिश्चान्तरे कल्प्यम् ॥७८॥ परिमण्डलैर्गवाढ्याश्छत्राकारैः शिरोभिरवनीशाः। चिपिटैः पितृमातृघ्नाः करोटिशिरसां चिरान्मृत्युः ॥७९॥ घटमूर्धा ध्यानरुचिर्द्विमस्तकः पापकृद्धनैस्त्यक्तः। निम्नं तु शिरो महतां बहुनिम्नमनर्थदं भवति ॥८०॥ एकैकभवैः स्निग्धैः कृष्णैराकुञ्चितैरभिन्नाग्रैः। मृदुभिर्न चातिबहुभिः केशैः सुखभाग् नरेन्द्रो वा ॥८१॥ बहुमूलविषमकपिला स्थूलस्फुटिताग्रपरुषह्रस्वाश्च। अतिकुटिलाश्चातिघनाश्च मूर्धजा वित्तहीनानाम् ॥८२॥ यद्यद्गात्रं रूक्षं मांसविहीनं शिरावनद्धं च। तत्तदनिष्टं प्रोक्तं विपरीतमतः शुभं सर्वम् ॥८३॥ त्रिषु विपुलो गम्भीरस्त्रिष्वेव षडुन्नतश्चतुर्ह्रस्वः। सप्तसु रक्तो राजा पञ्चसु दीर्घश्च सूक्ष्मश्च ॥८४॥ उरो ललाटं वदनं च पुंसां विस्तीर्णमेतत्त्रितयं प्रशस्तम्। नाभिः स्वरः सत्त्वमिति प्रदिष्टं गम्भीरमेतत्त्रितयं नराणाम् ॥८५॥ वक्षोऽथ कक्षा नखनासिकास्यं कृकाटिका चेति षडुन्नतानि। ह्रस्वानि चत्वारि च लिङ्गपृष्ठं ग्रीवा च जंघे च हितप्रदानि ॥८६॥ नेत्रान्तपादकरताल्वधरोष्ठजिह्वा रक्ता नखाश्च खलु सप्त सुखावहानि। सूक्ष्माणि पञ्च दशनांगुलिपर्वकेशाः साकं त्वचा कररुहाश्च न दुःखितानाम् ॥८७॥ हनुलोचनबाहुनासिकाः स्तनयोरन्तरमत्र पञ्चमम्। इति दीर्घमिदं तु पञ्चकं न भवत्येव नृणामभूभृताम् ॥८८॥ इति क्षेत्रम्। छाया शुभाशुभफलानि निवेदयन्ती लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः। तेजोगुणान् बहिरपि प्रविकाशयन्ती दीपप्रभा स्फटिकरत्नघटस्थितेव ॥ ८९ ॥ स्निग्धद्विजत्वङ्नखरोमकेशच्छाया सुगंधा च महीसमुत्था। तुष्ट्यर्थलाभाभ्युदयान् करोति धर्मस्य चाहन्यहनि प्रवृत्तिम ॥९०॥ स्निग्धा सिताच्छहरिता नयनाभिरामा सौभाग्यमार्दव सुखाभ्युदयान् करोति। सर्वार्थसिद्धिजननी जननीव चाप्या छाया फलं तनुभृतांशुभमादधाति ॥९१॥ चण्डाधृष्या पद्महेमाग्निवर्णा युक्ता तेजोविक्रमैः सप्रतापैः। आग्नेयीति प्राणिनां स्याज्जयाय क्षिप्रं सिद्धि वाञ्छितार्थस्य धत्ते ॥९२॥ मलिनपरुषकृष्णा पापगन्धानिलोत्था जनयति वधबन्धव्याध्यनर्थार्थनाशान्। स्फटिकसदृशरूपा भाग्ययुक्तात्युदारा निधिरिव गगनोत्था श्रेयसां स्वच्छवर्णा ॥ ३॥ छायाः क्रमेण कुजलाग्न्यनिलाम्बरोत्थाः केचिद्वदन्ति दश ताश्च यथानुपूर्व्या। सूर्याब्जनाभपुरुहूतयमोडुपानां तुल्यास्तु लक्षणफलैरिति तत्समासः ॥९४॥ इति मृजा ॥ करिवृषरथौघभेरीमृदङ्गसिंहाब्दनिस्वना भूपाः। गर्दभजर्जररूक्षस्वराश्च

धनसौख्यसन्त्यक्ताः ।।९५।। इति स्वरः ।। सप्त भवन्ति च सारा मेदोमज्जात्व-
गस्थिशुक्राणि । रुधिरं मांसं चेति प्राणभृतां तत्समासफलम् ।।९६।। ताल्वोष्ठदन्त
पालीजिह्वानेत्रान्तपायुकरचरणैः । रक्तैस्तु रक्तसारा बहुसुखवनितार्थपुत्रयुताः
।।९७।। स्निग्धत्वग्वा धनिनो मृदुभिः सुभगा विचक्षणास्तनुभिः । मज्जामेद-
स्साराः सुशरीराः पुत्रवित्तयुक्ताः ।।९८।। स्थूलास्थिरस्थिसारो बलवान् विद्यान्तगः
सुरूपश्च ।। इति सारः ।। बहुगुरुशुक्राः सुभगाविद्वांसो रूपवन्तश्च ।। ९९ ।।
उपचितदेहो विद्वान् धनी सुरूपश्च मांससारो यः । संघात इति च सुश्लिष्टसन्धिता
सुखभुजो ज्ञेयाः ।।१००।। इति संहतिः ।। स्नेहःपञ्चसु लक्ष्यो वाग्जिह्वादन्तनेत्र-
नखसंस्थः । सुतधनसौभाग्ययुताः स्निग्धैस्तैर्निर्धना रूक्षैः ।।१०१।। इति स्नेहः ।।
द्युतिमान्वर्ण स्निग्धः क्षितिपानां मध्यमःसुतार्थवताम् । रूक्षो धनहीनांना शुद्धः
शुभदो न सङ्कीर्णः ।।१०२।। इति वर्णः ।। साध्यमनूकं वक्त्राद्गोवृषशार्दूलसिंहगरुड-
मुखाः । अप्रतिहतप्रतापा जितरिपवो मानवेंद्राश्च ।।१०३।। वानरमहिषवराहा-
जतुल्यवदनाः सुतार्थसुखभाजः । गर्दभकरभप्रतिमैर्मुखैः शरीरैश्च निःस्वसुखाः
।।१०४।। इत्यनूकम् ।। अष्टशतं षण्णवतिः परिमाणं चतुरशीतिरिति पुंसाम् ।
उत्तमसमहीनानामंगुलसंख्यास्वमानेन ।।१०५।। इत्युन्मानम् । भारार्धतनुः सुख-
भाक् तुलितोऽतो दुःखभाग्भवत्यूनः । भारोऽतीवाढ्यानामध्यर्धः सर्वधरणीशः
।।१०६।। विंशतिवर्षा नारी पुरुषः खलु पञ्चविंशतिभिरब्दैः । अर्हति मानोन्मानं
जीवितभागे चतुर्थे वा ।।१०७।। इति मानम् ।। भूजलशिख्यनिलाम्बरः सुरनररक्षः-
पिशाचकतिरश्चाम् । सत्त्वेन भवति पुरुषो लक्षणमेतद्भवत्येषाम् ।।१०८।।
महीस्वभावः शुभपुष्पगन्धः सम्भोगवान् सुश्वसनः स्थिरश्च । तोयस्वभावो बहुतो-
यपायी प्रियाभिभाषी रसभोजनश्च ।।१०९।। अग्निप्रकृत्या चपलोऽतितीक्ष्णश्चण्डः
क्षुधालुर्बहुभोजनश्च । वायोः स्वभावेन चलः कृतश्च क्षिप्रं च कोपस्य वशं प्रयाति
।।११०।। खप्रकृतिर्निपुणो विवृतास्यः शब्दगतेः कुशलः सुषिराङ्गः । त्यागयुतः
पुरुषो मृदुकोपः स्नेहरतश्च भवेत् सुरसत्त्वः ।।१११।। मर्त्यसत्त्वसंयुतो गीतभूषण-
प्रियः । संविभागशीलवान्नित्यमेव मानवः ।।११२।। तीक्ष्णप्रकोपः खलचेष्टितश्च
पापश्च सत्त्वेन निशाचराणाम् । पिशाचसत्त्वश्चपलो मलाक्तो बहुप्रलापी च
समुल्बणाङ्गः ।।११३।। भीरुः क्षुधालुर्बहुभुक् च यः स्याज्ज्ञेयः स सत्त्वेन नरस्तिर-
श्चाम् । एवं नराणां प्रकृतिः प्रदिष्टा यल्लक्षणज्ञाः प्रवदन्ति सत्त्वम् ।। ११४ ।।
इति प्रकृतिः ।। शार्दूलहंससमदद्विपगोपतीनां तुल्या भवन्ति गतिभिः शिखिनां च
भूपाः । येषां च शब्दरहितं स्तिमितं च यातं तेऽपीश्वरा द्रुतपरिप्लुतगा दरिद्राः।।११५।
इति गतिः ।। श्रान्तस्य यानमशनं च बुभुक्षितस्य पानं तृषापरिगतस्य भयेषु रक्षा ।
एतानि यस्य पुरुषस्य भवन्ति काले धन्यं वदन्ति खलु तं नरलक्षणज्ञाः ।।११६।।पुरुष-

लक्षणमुक्तमिदं मया मुनिमतान्यवलोक्य समासतः। इदमधीत्य नरो नृपसम्मतो भवति सर्वजनस्य च वल्लभः। ।११७।।

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां पुरुषलक्षणं नामाष्टषष्टितमोऽध्यायः ।।६८।।

अंगुलात्मक उच्चता, तोल, गमन, संहति (अंगसंधियोंकी सुश्लिष्टता), सार, वर्ण, शब्द, प्रकृति, सत्त्व (एक प्रकारका चित्तका धर्म जिसके होनेसे कभी विषाद और भय नहीं होता) अनूक (पूर्वजन्म), क्षेत्र जो दश प्रकारके पाद आदि आगे कहेंगे, मृजा (पंचमहाभूतमयी शरीरच्छाया) इन सब बातोंकी सामुद्रिकशास्त्रका जाननेवाला चतुर पुरुष पहले देखकर मनुष्यों के व्यतीत और भविष्य शुभ अशुभ फल कह सकता है ।। १ ।। स्वेद (पसीना) से हीन, कोमल तलोंसे युक्त, कमलके मध्य भागके समान कांतिवाले, परस्पर मिली हुई अंगुलियोंसे युक्त, चमकदार और लाल रंगके नखोंसे युक्त, सुन्दर एडियोंवाले, उष्ण (गरम) शिराओंसे रहित (जिनमें नाडी न देख पडे), निगूढ गुल्फ (जिनके टंकने ऊँचे न हों) और कूर्मके समान ऊपरसे ऊँचे ऐसे चरण राजाके होते हैं. जिस पुरुषके चरणोंमें ये लक्षण हों वह राजा होता है ।। २ ।। शूर्प (छाज) के आकार आगेसे चौडे, श्वेतरंगके नखोंसे युक्त, टेढे, नाडियोंसे व्याप्त, सूखे और विरल अंगुलियोंवाले चरण हों तो दरिद्र और दुःख देते हैं. मध्यसे ऊँचे मेंडकके आकार चरण हों तो सदा मार्गमें चलाते हैं. कषाय रंग (थोडेसे लाल) के चरण हों तो वंशका विच्छेद करते अर्थात् जिस पुरुषके कषाय रंगके चरण हों उसका वंश नहीं चलता. परिपक्व (अग्निमें पकी हुई) मृत्तिकाके तुल्य जिसके पादतलोंकी कांति हो वह पुरुष ब्रह्महत्या करता है और पीले रंगके चरणवाला पुरुष अगम्या स्त्रीमें आसक्त होता है ।। ३ ।। विरल और सूक्ष्म रोमोंवाला, गोल हाथीकी शुंडके समान सुन्दर ऊरुवाला, मांसयुक्त और समान जानुवाला यह सब लक्षणोंवाला राजा होता है. श्वान और शृंगालके तुल्य जिनकी जंघा हो वे धनहीन होते हैं ।।४।। जिनकी जंघाओंके रोमकूपोंमें एक २ रोम हो वे राजा होते हैं, जिनके एक रोमकूपमें दो दो रोम हों वे पंडित और श्रोत्रिय होते हैं; जिनके एक २ रोमकूपमें तीन २ चार २ आदि रोम हो वे मनुष्य निर्धन और दुःखी होते हैं. इससे मस्तकके केशोंका भी शुभ अशुभ फल जाने ।। ५ ।। जिसकी जानुपर मांस न हो वह पुरुष प्रवासमें मरता है, छोटे जानुवाला भाग्यवान् होता है. विकट जानुवाले दरिद्री होते हैं. जिनके जानु निम्न (नीच) हों वे पुरुष स्त्रीजित होते हैं, मांसयुक्त जानुवालेको राज्य मिलता है और बडे जानु जिन पुरुषोंके हों वे दीर्घायु होते हैं ।। ६ ।। छोटे लिंगवाला पुरुष धनवान् और संतानहीन होता है. स्थूल लिंगवाला धनहीन होता है. जिसका बाईं ओरको लिंग झुका हो वह पुरुष धन और पुत्रोंसे रहित होता है. दाहिनी ओर लिंग झुका हो तो पुत्रवान् होता है, जिसका लिंग नीचेको बहुत झुका हो वह दरिद्री होता है. नाडियोंसे व्याप्त लिंग हो तो वह पुरुष अल्पपुत्रवाला है अर्थात् उसके थोडे पुत्र होते हैं, स्थूल ग्रंथीसे युक्त जिसका लिंग होता है वह सुखी होता है, मृदु लिंगवाला पुरुष प्रमेह आदि रोगोंसे मरता है ।। ७ ।। कोश (चर्मकी थैलीसी) में जिनके लिंग निगूढ हो वे राजा होते हैं, दीर्घ और टूटे हुए लिंगवाले धनहीन होते हैं, सीधे और गोल व छोटे या नाडियोंसे व्याप्त लिंगवाले पुरुष धनवान् होते हैं ।। ८ ।। एकही वृषणवाला पुरुष जलमें डूबकर मरता है. विषम (छोटे बडे) वृषण हों तो स्त्रीलंपट होता

है, वृषण समान हों तो राजा होता है, ऊपरको खींचे हुए वृषणवाला हो तो अल्पायुष होता है और जिस पुरुषके वृषण लम्बे हों उसका आयुष सौ वर्ष होता है ॥९॥ लिंगके अग्रभागकोमणि कहते हैं, लाल रंगकी मणिवाले पुरुष धनवान् होते हैं, श्वेत और मलिन मणि हो तो धनहीन होते हैं, मूत्र करनेके समय शब्द हों वे पुरुष सुखी होते हैं. शब्दरहित जिनकी मूत्रधारा हो वे निर्धन होते हैं ॥ १० ॥ जिनके मूत्रकी धारा दो, तीन अथवा चार हों और दक्षिणावर्त करके वे धारा मूत्रकी गेरें तो वे पुरुष राजा होते हैं, मूत्र करनेके समय जिसका मूत्र बिखरता हो वे धनहीन होते हैं ॥ ११ ॥ एक धार मूत्रकी हो और वह ललित (वेष्टित) हो तो रूपवान् पुत्र देती है जिन पुरुषोंके मणि स्निग्ध, ऊंचे और समान होंवे पुरुष धन, स्त्री और रत्नोंको भोग करनेवाले होते हैं ॥ १२ ॥ जिनके मणि मध्यभागमें निम्न हो वे कन्याओंके पिता होते हैं अर्थात् उनके घरमें कन्या ही जन्मती हैं और वे पुरुष निर्धनभी होते हैं, जिनके मणि मध्यके ऊँचे हों वे बहुत पशुओंके स्वामी होते हैं. बहुत स्थूल जिनके मणि न हों वे धनी होते हैं ॥ १३ ॥ लिंग और नाभिके अन्तर को बस्ति कहते हैं, जिनके बस्तिका उपरिभाग मांसरहित हो वे पुरुष धनहीन और सब मनुष्यों के अप्रिय होते हैं, पुष्पके समान सुगन्धित वीर्यवाले राजा होते हैं ॥ १४ ॥ शहतके समान गन्ध वीर्यमें हो तो बहुत धनवान् हो, मत्स्योंके समान गन्ध वीर्यमें हो तो बहुत सन्तान हो, थोडा वीर्य हो तो कन्याओंका पिता हो, मांसके समान गन्ध वीर्यमें हों तो महाभोगी हो ॥ १५ ॥ मद्यके समान गन्ध वीर्यमें आती हो तो पुरुष यज्ञ करनेवाला हो, खारके तुल्य गन्ध वीर्यमें आती हो तो पुरुष दरिद्री हो, शीघ्रही जो पुरुष मैथुन करे वह दीर्घायुष होता है और जो पुरुष बहुत काल पर्यन्त मैथुन करे वह अल्पायुष होता है ॥ १६ ॥ जिस पुरुषके स्फिक् (कटिस्थ मांसपिण्ड) अति मोटे हों वह निर्धन होता है, सुन्दर मांसयुक्त स्फिक्वाला सुखी होता है, जिस पुरुषके डचोढे हों उसको व्याघ्र मारता है. मेंडकके समान जिसके स्फिक् हों वह पुरुष राजा होता है ॥१७॥ सिंहके समान कटिवाला राजा होता है वानर अथवा उष्ट्रके समान कटिवाला धनहीन होता है, सम (न ऊंचा और न नीचा) उदरवाला पुरुष भोगी होता है, घडे अथवा हांडीके समान पेट हो तो वे पुरुष निर्धन होते हैं ॥ १८ ॥ कटिके ऊपर चार अंगुल भागको पार्श्व कहते हैं, और उदरके मध्यभागको कक्ष्मा कहते हैं, समपार्श्व होनेसे धनी होता है, निम्न और टेढे पार्श्व हों तो धनहीन होता हैं, जिनकी कक्ष्या सम हो वे पुरुष भोगी होते हैं, निम्न कक्ष्या हो तो भोगसे हीन होते हैं ॥ १९ ॥ उन्नत कक्ष्या हो तो राजा होते हैं, विषम (घाटबाध) जिनकी कक्ष्या हो वह मनुष्य कठोर होते हैं, जिन पुरुषोंका उदर सर्पके उदरकी भांति बहुत लम्बा हो वे पुरुष दरिद्री होते हैं और बहुत भोजन करते हैं ॥ २० ॥ गोल, ऊंची और विस्तीर्ण नाभिवाले सुखी होते हैं, छोटी अदृश्य (न देख पड़े) और अनिम्न अर्थात् गहरी न हो ऐसी नाभि दुःखदायक होती है ॥ २१॥ जिसकी नाभि पेटकी बलिके बीच आवे और विषम हो, वह पुरुष शूलीपर चढाया जाता है और निर्धन भी होता है, वामावर्त जिसकी नाभि हो वह पुरुष शठ होता है. दक्षिणावर्त नाभि हो तो उसकी उत्तम बुद्धि हो. दोनों ओर लम्बी नाभि दीर्घायुष करती है, ऊपरको नाभि दीर्घ हो तो पुरुषको ऐश्वर्ययुक्त करती है नीचेको लम्बी हो तो बहुत भोगोंसे युक्त करती है. कमलकी कर्णिकाके तुल्य नाभि हो तो पुरुषको राजा करती है ॥ २२ ॥ २३ ॥ उदरके मध्यमें जो रेखा हों उनको वलि कहते हैं. जिस पुरुषको एक वलि हो उसकी मृत्यु शस्त्रसे होती है. दो बलि हों तो वह पुरुष बहुत स्त्रियोंसे भोग करनेवाला होता है, तीन बलि हों तो आचार्य (उपदेशकर्त्ता) होता है और चार बलि जिस पुरुषके उदरमें हों उसके बहुत पुत्र होते हैं, जिसका उदर

शतव्यापारशाखाकुलम् । मन्त्रिप्रोक्तनिषेविनां क्षितिभुजामाशङ्किनां सर्वतो दुःखाम्भोनिधिवर्तिनां सुखलवः कान्तासमालिङ्गनम् ।। ३ ।। श्रुतं दृष्टं स्पृष्टं स्मृतमपि नृणां ह्लादजननं न रत्नं स्त्रीभ्योऽन्यत् क्वचिदपि कृतं लोकपतिना । तदर्थं धर्मार्थौ सुतविषयसौख्यानि च ततो गृहे लक्ष्म्यो मान्याः सततमबला मानविभवैः ।। ४ ।। येऽप्यङ्गनानां प्रवदन्ति दोषान् वैराग्यमार्गेण गुणान्विहाय । ते दुर्जना मे मनसो वितर्कः सद्भाववाक्यानि न तानि तेषाम् ।।५।। प्रब्रूत सत्यं कतरोऽङ्गनानां दोषोऽस्ति यो नाचरितो मनुष्यैः । धाष्टर्येन पुम्भिः प्रमदा निरस्ता गुणाधिकास्ता मनुनात्र चोक्तम् ।। ६ ।। सोमस्तासामदाच्छौचं गन्धर्वाः शिक्षितां गिरम् । अग्निश्च सर्वभक्षित्वं तस्मान्निष्कसमाः स्त्रियः ।। ७ ।। ब्राह्मणाः पादतो मेध्या गावो मेध्यास्तु पृष्ठतः । अजाश्वा मुखतो मेध्या स्त्रियो मेध्यास्तु सर्वतः ।। ८ ।। स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित् । मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति ।। ९ ।। जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति समन्ततः ।। १० ।। जाया वा स्याज्जनित्री वा सम्भवः स्त्रीकृतो नृणाम् । हे कृतघ्नास्तयोर्निन्दां कुर्वतां वः कुतः सुखम् ।।११।। दम्पत्योर्व्युत्क्रमे दोषः समः शास्त्रे प्रतिष्ठितः । नरा न तमवेक्षन्ते तेनात्र वरमङ्गनाः ।। १२ ।। बहिर्लोम्ना तु षण्मासान् वेष्टितः खरचर्मणा । दारातिक्रमणे भिक्षां देहीत्युक्त्वा विशुद्धयति ।। १३ ।। न शतेनापि वर्षाणामपैति मदनाशयः । तत्राशक्त्या निवर्तन्ते नरा धैर्येण योषितः ।।१४।। अहो धाष्टर्यमसाधूनां निन्दतामनघाः स्त्रियः । मुष्णतामिव चौराणां तिष्ठ चौरेति जल्पताम् ।। १५ ।। पुरुषश्चाटुलानि कामिनीनां कुरुते यानि रहो न तानि पश्चात् । सुकृतज्ञतयाङ्गना गतासूनवगूह्य प्रविशन्ति सप्तजिह्वम् ।। १६ ।। स्त्रीरत्नभोगोऽस्ति नरस्य यस्य निःस्वोऽपि स्वं प्रत्यवनीश्वरोऽसौ । राज्यस्य सारोऽशनमङ्गनाश्च तृष्णानलोद्दीपनदारुशेषम् ।। १७ ।। कामिनीं प्रथमयौवनान्वितां मन्दवल्गुमृदुपीडितस्वनाम् । उत्स्तनीं समवलम्ब्य या रतिः सा न धातृभवनेऽस्ति मे मतिः ।। १८ ।। तत्र देवमुनिसिद्धचारणैर्मान्यमानपितृसेव्यसेवनात् । ब्रूत धातृभवनेऽस्ति किं सुखं यद्रहः समवलम्ब्य न स्त्रियम् ।। १९ ।। आब्रह्मकीटान्तमिदं निबद्धं पुंस्त्री प्रयोगेण जगत्समस्तम् । व्रीडात्र का यत्र चतुर्मुखत्वमीशोऽपि लोभाद्गमितो युवत्याः ।। २० ।।

इति श्रीवराहमिहिरकृतौ बृहत्संहितायामन्तःपुरचिन्तायां
स्त्रीप्रशंसा नाम चतुःसप्ततितमोऽध्यायः ।। ७४ ।।

राजा संपूर्ण पृथ्वीको जीत ले परंतु उसमें अपनी राजधानीका नगरही सार है. उस नगरमें अपना गृहसार, गृहमें अपने रहनेका एक मुख्य स्थान सार, उस स्थानमें शय्या सार और उस शय्याके रत्नोंसे भूषित स्त्री सार है, राज्य सुखमें इतनाही सार

है और सब पदार्थ सारहीन हैं ॥१॥ रत्नोंको स्त्री भूषित करती है. रत्नकांतिसे स्त्रियें, भूषित नहीं होतीं, कारण कि, स्त्री विना रत्न भी हो तो भी चित्तको हर लेती है और रत्न स्त्रियोंके अंगका संग किये विना चित्त नहीं हर सकते ॥२॥ हर्ष, शोक आदिके आकारको छिपाते हुए, शत्रुबल जीतनेके अर्थ उठते हुए, किये न किये सैंकडों व्यवहारोंकी शाखाओंसे व्याकुल, राजतंत्रका चिंतवन करते हुए, मंत्रियोंकी कही नीतिपर चलते हुए पुत्र स्त्री आदिसे भी शंकित रहते हुए, दुःखसमुद्रमें डूबे हुए, राजाओंके अर्थ स्त्रीका आलिंगन करना ही थोडा सा सुख है ॥३॥ विधाताने स्त्रियोंके सिवाय और कहीं कोई ऐसा रत्न निर्माण नहीं किया जिसके सुनने, स्पर्श करने, देखने या स्मरण करनेसेही चित्तमें आह्लाद हो जाय, धर्म और अर्थका सेवन स्त्रीकेही लिये करते हैं, पुत्रोंका और विषयसुखोंका लाभ स्त्रीसेही होता है. स्त्री घरकी लक्ष्मी है, इसलिये मान और ऐश्वर्यसे सब समय स्त्रियोंका सत्कार करना उचित है ॥४॥ यह हमारे मतका निश्चय है कि जो पुरुष स्त्रियोंके गुणोंको छोड वैराग्य मार्ग द्वारा उनके दोष कहते हैं वे पुरुष दुष्ट हैं इसी कारण उन दुष्टोंके वे वचन भी प्रामाणिक नहीं ॥५॥ आप विरक्त हैं तो आपही सत्य कहें कि, स्त्रियोंमें ऐसा कौनसा दोष है जो पुरुषने पहलेही न किया हो (सब दोष पहले पुरुषोंने किये पीछे स्त्रियोंने पुरुषोंसे सीखे) पुरुषोंने धृष्टतासे स्त्रियोंको जीत लिया, वास्तवमें पुरुषोंसे स्त्रियोंमें अधिक गुण हैं. धर्मशास्त्रके मुख्य आचार्य मनुने भी इस विषयमें यह कहा है ॥६॥ चंद्रमा ने शुद्धता, गंधर्वोंने शिक्षित वचन दिये और अग्निने सर्वभक्षित्व स्त्रियोंको दिया है, इसलिये स्त्री सुवर्ण तुल्य हैं ॥७॥ ब्राह्मणोंके पैर, गौओंकी पीठ और बकरे व घोडोंका मुख पवित्र है और स्त्रियोंके सब अंगही पवित्र हैं ॥८॥ स्त्रियोंके समान कोई दूसरा पदार्थ पवित्र नहीं है, वह कभी दूषित नहीं हो सकती हैं, क्योंकि महीने महीने उनका ऋतु होता है जो कि उनके सब पाप हर लेता है ॥९॥ विना आदर की हुई कुलस्त्री जिन घरोंको शाप देती है वे घर मानो कृत्यासे हत हुए चारों ओरसे नाशको प्राप्त होते हैं ॥१०॥ भार्या हो या माता हो पुरुषोंकी उत्पत्ति स्त्रियोंसेही होती है अर्थात् भार्यासे पुत्ररूप करके उत्पन्न और मातासे साक्षात् आप उत्पन्न होता है, हे कृतघ्न पुरुषो! भार्या और माताकी निन्दा करनेसे तुम्हारा भला कहांसे होगा ॥ ११ ॥ स्त्रीपुरुषोंको परस्पर पुरुषोंको परस्त्रीसंगमें और स्त्रीको परपुरुषके संगमें तुल्यही दोष धर्मशास्त्रमें कहा है; परंतु पुरुष परस्त्रीसंगमें कुछ दोष नहीं देखते और स्त्री परपुरुषमें दोष देखती है, इसलिये पुरुषोंसे स्त्रियां उत्तम हैं ॥ १२ ॥ जो पुरुष अपनी भार्याको छोड दूसरी स्त्रीका संग करे वे पुरुष बाहर की ओरसे रोमों-वाले गर्दभका चमडा ओढकर छः महीनेतक (भिक्षांदेहि) यह कहे अर्थात् भीख मांगता फिरे तब शुद्ध होता है ॥ १३ ॥ सौ वर्ष बीतनेपर भी पुरुषोंकी कामवासना नहीं छूटती परंतु शरीरकी शक्ति घट जानेसे पुरुष निवृत्त होते और स्त्री धैर्यसे निवृत्त होती है ॥१४॥ देखो! निर्दोष स्त्रियोंकी निंदा करते हुए दुष्टोंकी दुष्टता ऐसी है जैसे चोरी करते हुए चोर और किसी पुरुष (घरके स्वामी आदि) को कहते हो कि अरे चोर ! खडा हो यह सब धर्मशास्त्रके वाक्य हैं ॥१५॥ पुरुष कामातुर होकर एकांतमें स्त्रियोंको जो मीठे २ वचन बोलता है तैसे वचन मनसे नहीं बोलता और स्त्री अपनी कृतज्ञतासे मृतपतिको आलिंगन कर अग्निमें प्रवेश करती है ॥१६॥ उत्तम स्त्रीको भोगनेवाला निर्धन भी

राजा है, क्योंकि राज्यका सार भोजन और उत्तम स्त्री यह दोही हैं और सब हाथी, घोडे, रत्न, सुवर्णादि सामग्री तृष्णा रूप अग्निको प्रज्वलित करनेको काष्ठ हैं ॥१७॥ हमारी तो यह बुद्धि है कि नये यौवनवाली, मंद, सुंदर, कोमल और स्तब्ध शब्द करती हुई, ऊंचे स्तनोंवाली कामिनीको आलिंगन करनेसे जो सुख होता है, सो सुख ब्रह्मलोक-में भी नहीं ॥१८॥ ब्रह्मलोकमें देवता, मुनि सिद्ध और चारण मान्योंका मान और सेव्योंका सेवन करते हैं, इससे बढकर और ब्रह्मलोकमें ऐसा कौनसा सुख है, स्त्रीको एकांतमें आलिंगन करनेसे न प्राप्त हो ॥ १९ ॥ ब्रह्मासे लेकर कीडे मकोडेतक सब जगत् स्त्री-पुरुषकी प्रयोगसे बंधा है, इसमें क्या लज्जा, जहां जगत्प्रभु महादेवजी भी स्त्रीको देखनेके लोभसे [1]चतुर्मुख हो गये ॥२०॥

इति श्रीवराहमिहिराचार्यविरचि० बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य पंडितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां चतुःसप्ततितमोऽध्यायः ॥७४॥

अथ पंचसप्ततितमोऽध्यायः
सौभाग्यकरणम्

जात्यं मनोभवसुखं सुभगस्य सर्वमाभासमात्रमितरस्य मनोवियोगात् । चित्तेन भावयति दूरगतापि यं स्त्री गर्भं बिभर्ति सदृशं पुरुषस्य तस्य ॥ १ ॥ भंक्त्वा काण्डं पादपस्योप्तमुर्व्यां बीजं वास्यां नान्यतामेति यद्वत् । एवं ह्यात्मा जायते स्त्रीषु भूयः कश्चित्तस्मिन् क्षेत्रयोगाद्विशेषः ॥ २ ॥ आत्मा सहैति मनसा मन इन्द्रियेण स्वार्थेन चेन्द्रियमिति क्रम एष शीघ्रः । योगोऽयमेव मनसः किमगम्यमस्ति यस्मिन्मनो व्रजति तत्र गतोऽयमात्मा ॥ ३ ॥ आत्मायमात्मनि गतो हृदयेऽतिसूक्ष्मो ग्राह्योऽचलेन मनसा सतताभियोगात् । यो यं विचिन्तयति याति स तन्मयत्वं यस्मादतः सुभगेव गता युवत्यः ॥ ४ ॥ दाक्षिण्यमेकं सुभगत्वहेतुर्विद्वेषणं तद्विपरीतचेष्टा । मन्त्रौष-धाद्यैः कुहकप्रयोगैर्भवन्ति दोषा बहवो न शर्म ॥ ५ ॥ वाल्लभ्यमायाति विहाय मानं दौर्भाग्यमापादयतेऽभिमानः । कृच्छ्रेण संसाधयतेऽभिमानी कार्यां यत्नेन वदन् प्रियाणि ॥ ६ ॥ तेजो न तद्यत्प्रियसाहसत्वं वाक्यं न चानिष्टमसत्प्रणीतम् । कार्यस्य गत्वान्तमनुद्धता ये तेजस्विनस्ते न विकत्थना ये ॥ ७ ॥ यः सार्वजन्यं सुभग-त्वमिच्छेद्गुणान् स सर्वस्य वदेत्परोक्षे । प्राप्नोति दोषानसतोऽप्यनेकान् परस्य यो दोषकथां करोति ॥ ८ ॥ सर्वापकारानुगतस्य लोकः सर्वोपकारानुगतो नरस्य । कृत्वोपकारं द्विषतां विपत्सु या कीर्तिरल्पेन न सा शुभेन ॥ ९ ॥ तृणैरिवाग्निः

---

१ दृष्टांत है कि, एक समय पार्वतीको अंकमें लिये महादेवजी कैलासमें विराजमान थे, उस समय तिलोत्तमा नाम अप्सरा महादेवजीकी प्रदक्षिणा करने लगी तब पार्वतीके भयसे महादेवजी चारों ओर मुख फेरकर तो उसका मुख न देख सके परंतु जिधर वह जाती उसी ओर नया मुख उत्पन्न करते गये इस प्रकार महादेवजीके चार मुख हुये.

सुतरां विवृद्धिमाच्छाद्यमानोऽपि गुणोऽभ्युपैति । स केवलं दुर्जनभावमेति हन्तुं गुणान् वाञ्छति यः परस्य ॥ १० ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां सौभाग्यकरणं नाम पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

सुभग पुरुषको सब कामदेवका सुख श्रेष्ठ है और स्त्रीका चित्त अनुरक्त न होनेसे दुर्भग पुरुषको रतिमें सुखका आभास मात्र होता है, वास्तविक सुख नहीं होता रतिके समय दूर स्थित भी स्त्री चित्तसे जिस पुरुषका ध्यान करे, उसीके सदृश गर्भ धारण करती है ॥१॥ जिस वृक्षका कलम अथवा बीज भूमिमें बोये वही वृक्ष जमता है दूसरा वृक्ष नहीं इसी प्रकार स्त्रियोंमेंभी फिरभी संतानरूपसे आत्माही उत्पन्न होता है, केवल क्षेत्रके योगसे कुछ विशेष होता है, जैसा किसी क्षेत्रमें वृक्षादि उत्तम होते, किसीमें सामान्य होते हैं ऐसेही स्त्रियोंमेंभी जानना योग्य है ॥२॥ आत्मा मनके साथ और मन इन्द्रियके साथ जाता है और इन्द्रियां अपने विषय शब्द आदिके साथ जाती हैं, यह आत्माके जानेका शीघ्र क्रम और यही योग है. मनको कोई स्थान अगम्य नहीं और जहां मन जाय वहां यह आत्मा चला जाता है ॥३॥ अतिसूक्ष्मरूप यह जीवात्मा हृदयमें परमात्माके बीच स्थित है, निरन्तर अभ्याससे निश्चल चित्तसे उसका ग्रहण करना चाहिये, जो जिसका चिन्तन करे वह तन्मय हो जाते हैं, इसलिये स्त्रीभी सुभग पुरुषकाही चिन्तन करती है ॥४॥ स्त्रियोंके चित्तके अनुकूल आचरण सौभाग्यका मुख्य हेतु है अर्थात् दाक्षिण्यसे पुरुष सुभग होता है और स्त्रियोंके चित्तमें विपरीत आचरण करनेपर विद्वेषण होता है अर्थात् वह पुरुष दुर्भग हो जाता है, वशीकरण आदिके लिये मंत्र औषध और भी इन्द्रजालादि कुहक प्रयोग करनेसे अनेक दोषही उत्पन्न होते हैं, भला नहीं होता अर्थात् स्त्रीवशीकरण-का मुख्य उपाय दाक्षिण्य है, मंत्र, औषध आदि नहीं ॥५॥ अहंकार को छोडनेसे मनुष्य सबका प्रिय हो जाता है, अहंकारसे पुरुष सबको अप्रिय होता है, अभिमानी पुरुष अपने कार्य कष्टसे साधता और मीठा बोलनेवाला पुरुष सहजमें कार्य सिद्ध कर लेता है ॥६॥ विना विचारे करनेमें प्रीति तेज नहीं है और दुष्टोंके कहे दुर्वचन भी श्रेष्ठ नहीं जो पुरुष कार्यको समाप्त करकेभी अभिमान न करे वे तेजस्वी होते हैं. वाचाल पुरुष तेजस्वी नहीं होते ॥७॥ सबका प्यारा होना चाहनेवाला पुरुष परोक्षमें सबकी स्तुति करे, जो पराई निन्दा करते हैं उनके ऊपर अकारण ही अनेक दोष मनुष्य लगा देते हैं ॥८॥ सबके ऊपर उपकार करनेमें जो पुरुष तत्पर है उसके ऊपर सब मनुष्य भी उपकार करते हैं, शत्रुके ऊपर विपत्तिकालमें उपकार करनेसे जो कीर्ति होती है वह थोडे पुण्यका फल नहीं है अर्थात् किसी बडे पुण्यसे ही ऐसा योग आ पडता है ॥९॥ दुष्ट मनुष्य चाहे जितने सज्जनोंके गुणोंको छिपावे परंतु उनके गुण तृणोंसे ढके हुए अग्निकी भांति वृद्धि-कोही प्राप्त होते हैं. जो पराये गुणोंको मिटाया चाहता है वही केवल दुर्जनताको प्राप्त हो जाता है और गुण किसीके मिटाये नहीं मिट सकते ॥१०॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबाद वास्तव्य-पंण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां पंचसप्ततितमोऽध्यायः ॥७५॥

अथ षट्सप्ततितमोऽध्यायः

कान्दर्पिकम्

रक्तेऽधिके स्त्री पुरुषस्तु शुक्रे नपुंसकं शोणितशुक्रसाम्ये। यस्मादतः शुक्रविवृद्धिदानि निषेवितव्यानि रसायनानि ॥ १ ॥ हर्म्यपृष्ठमुडुनाथरश्मयः सोत्पलं मधु मदालसा प्रिया। वल्लकी स्मरकथो रहः स्रजो वर्ग एष मदनस्य वागुरा ॥ २ ॥ माक्षिकधातुमधुपारदलोहचूर्णपथ्याशिलाजतुविडङ्गघृतानि योऽद्यात्। सैकानि विंशतिरहानि जरान्वितोऽपि सोऽशीतिकोऽपि रमयत्यबलां युवेव ॥ ३ ॥ क्षीरं शृतं यः कपिकच्छुमूलैः पिबेत् क्षयं स्त्रीषु न सोऽभ्युपैति। माषान् पयःसर्पिषि वा विपक्वान् षड्ग्रासमात्रांश्च पयोऽनुपानान् ॥ ४ ॥ विदारिकायाः स्वरसेन चूर्णं मुहुर्मुहुर्भावितशोषितं च। शृतेन दुग्धेन सशर्करेण पिबेत्स यस्य प्रमदाः प्रभूताः ॥ ५ ॥ धात्रीफलानां स्वरसेन चूर्णं सुभावितक्षौद्रसिताज्ययुक्तम्। लीढ्वान पीत्वा च पयोऽग्निशक्त्या कामं निकामं पुरुषो निषेवेत् ॥ ६ ॥ क्षीरेण बस्ताण्डयुजा शृतेन संप्लाव्य कामी बहुशस्तिलान् यः। सुशोषितानत्ति पिबेत्पयश्च तस्याग्रतः किं चटकः करोति ॥ ७ ॥ माषसूपसहितेन सर्पिषा षष्टिकौदनमदन्ति ये नराः। क्षीरमप्यनु पिबन्ति तासु ते शर्वरीषु मदनेन शेरते ॥८॥ तिलाश्वगन्धाकपिकच्छुमूलैर्विदारिकाषष्टिकपिष्टयोगः। आजेन पिष्टः पयसा घृतेन पक्त्वा भवेच्छष्कुलिकातिवृष्या ॥ ९ ॥ क्षीरेण वा गोक्षुरकोपयोगं विदारिकाकन्दकभक्षणं वा। कुर्वन्न सीदेद्यदि जीर्यतेऽस्य मन्दाग्निता चेदिदमत्र चूर्णम् ॥ १० ॥ साजमोदलवणा हरीतकी शृङ्गवेरसहिता च पिप्पली। मद्यतक्रतरलोष्णवारिभिश्चूर्णपानमुदराग्निदीपनम् ॥ ११ ॥ अत्यम्लतिक्तलवणानि कटूनि वात्ति क्षारातिशाकबहुलानि न भोजनानि। दृक्छुक्रवीर्यरहितः स करोत्यनेकान् व्याजान् जरन्निव युवाप्यबलामवाप्य ॥ १२ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायामन्तःपुरचिन्तायां कान्दर्पिकं नाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

गर्भधारणके समय स्त्रीका रज अधिक हो तो कन्या, पुरुषका वीर्य अधिक हो तो पुत्र और दोनों तुल्य हो तो नपुंसक उत्पन्न होता है, इस कारण वीर्यके बढानेवाले रसायन सेवन करने चाहिये ॥१॥ महलकी छत्त, चंद्रमाके किरण, नीलोत्पलसहित मद्य अर्थात् मदसे भरे पानपात्रमें नील कमल रक्खा हो, मद करके आलस्ययुक्ता प्राणप्रिया, वीणा, कामदेवकी चर्चा, एकांत, पुष्पमाला यह सब सामग्री कामदेवके बांधनेकी रस्सी है ॥२॥ सोनामक्खी, शहत, पारा, लोहचून, शिलाजीत, वायबिडंग और घृतको जो पुरुष (सब वस्तुओंको समभाग ले चूर्ण कर शहत व घृतमें मिलाय गोली कर उन गोलियोंको)

इक्कीस दिन खाय तो अस्सी वर्षका वृद्ध भी तरुण पुरुषकी भांति स्त्रीसे रमण करता है ।।३।। कौंचकी जडके साथ औटाकर दूधको पीनेवाला पुरुष स्त्रीसंग करनेमें क्षीण नहीं होता या दूधसे निकले घृतमें उडदोंको पकावे, पीछे छः ग्रास उन उडदोंको भक्षण करके ऊपरसे दूध पीवे तो स्त्रीसंग करनेसे क्षीण नहीं होवे ।।४।। विदारीकंदके चूर्णके विदारीकंदकेही रसकी वारंवार भावना देखकर सुखाता जाय. उस चूर्णको भक्षण कर व ऊपरसे औटाया हुआ दूध मिश्री डालकर पीना चाहिये जिस पुरुषके बहुत स्त्री हों ।।५।। आमलेके चूर्णमें आमलेके रसकी वार २ भावना देकर सुखावे फिर उस चूर्णमें शहत और मिश्री मिलाकर चाटे व ऊपरसे अपनी अग्निके अनुसार जितना पच सके उतना दूध पीवे तो बहुत मैथुन कर सकता है ।।६।। बकरेके अंडेको दूधमें डाल औटावे, पीछे उस दूधकी तिलोंमें बहुत वार भावना देवे और सुखावे जो कामी पुरुष उन तिलोंको भक्षण कर ऊपरसे दूध पीवे उसके आगे चिडाभी क्या कर सकता है ।।७।। जिन रातोंमें घृतसे युक्त उडदकी दालके साथ सट्ठीके चावलोंका भात खाकर जो पुरुष पीछे दूध पीते हैं, वे उन रात्रियोंमें कामदेवके साथ शयन करते अर्थात् रात्रिभर उनको कामोद्दीपन होता है और बहुत स्त्रीसंग करते हैं ।।८।। तिल, असगंध, कौंचकी जड विदारीकंद इन सबको बराबर ले चूर्ण कर सबके समान साठीके चावलोंका आटा मिलावे पीछे उसको बकरीके दूधमें उसनकर पूरी बनाय बकरीके घृतमें पक्व करे वह पूरी अति वृष्य होती है ।।९।। गोखरूका चूर्ण खाकर दूध पिये या विदारीकंदका चूर्ण भक्षण कर दूध पिये तो स्त्रीसंगसे क्षीण न हो परंतु यह चूर्ण न पच जावे तो मन्दाग्नि हो अर्थात् चूर्ण न पच सके तो पहले इस चूर्णका सेवन करे जो कहते हैं ।। १० ।। अजवायन, लवण, हरड, सोंठ, पीपल इनको सम भाग लेकर चूर्ण करे पीछे उस चूर्णको मद्य, तक्र (छांछ) कांजी अथवा गरम जलके अनुपानसे लेवे यह चूर्ण जठराग्निको दीपन करता है ।।११।। जो पुरुष बहुत खट्टे, बहुत तिक्त, बहुत लवणसे युक्त अथवा बहुत कटु लाल मिरच आदिसे युक्त भोजन करे और बहुत क्षार अथवा बहुत शाक करके युक्त भोजन करे वह पुरुष दृष्टि, वीर्य और वलसे हीन होकर स्त्रीसंगके समय वृद्धकी भाँति अनेक ब्याज (बहाने) करता है, वह स्त्रीके कामका नहीं रहता ।।१२।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य पण्डितबलदेवप्रसाद मिश्रविरचितायां हिन्दीटीकायां षट्सप्ततितमोऽध्यायः ।।७६।।

अथ सप्तसप्ततितमोऽध्यायः

गन्धयुक्तिः

स्रग्गन्धधूपाम्बरभूषणाद्यं न शोभते शुक्लशिरोरुहस्य । यस्मादतो मूर्द्धराग सेवां कुर्याद्यथैवाञ्जनभूषणानाम् ।। १ ।। लौहे पात्रे तण्डुलान् कोद्रवाणां शुक्ले पक्वांल्लोहचूर्णेन साकम् । पिष्टान् सूक्ष्मं मूर्ध्नि शुक्लाम्लकेशे दत्त्वा तिष्ठेद्वेष्टयित्वार्द्रपत्रैः ।।२।। याते द्वितीये प्रहरे विहाय दद्याच्छिरस्यामलकप्रलेपम् । सञ्छाद्य पत्रैः प्रहरद्वयेन प्रक्षालितं कार्ष्ण्यमुपैति शीर्षम् ।। ३ ।। पश्चाच्छिरःस्नानसुगन्ध-

तैलैर्लोहाम्लगन्धं शिरसोऽपनीय । हृद्यैश्च गन्धैर्विविधैश्च धूपैरन्तः पुरे राज्यसुखं निषेवेत् ॥ ४ ॥ त्वक्कुष्ठरेणुनलिकास्पृक्कारसतगरवालकैस्तुल्यैः । केसरपत्रविमिश्रैर्नरपतियोग्यं शिरः स्नानम् ॥ ५ ॥ मञ्जिष्ठया व्याघ्रनखेन शुक्त्या त्वचा सकुष्ठेन रसेन चूर्णः । तैलेन युक्तोऽर्कमयूखतप्तः करोति तच्चम्पकगन्धि तैलम् ॥ ६ ॥ तुल्यैः पत्रतुरुष्कवालतगरैर्गंन्धः स्मरोद्दीपनः सव्यामो बकुलोऽयमेव कटुकाहिंगुप्रधूपान्वितः । कुष्ठेनोत्पलगन्धिकः समलयः पूर्वो भवेच्चम्पको जातीत्वक्सहितोऽतिमुक्तक इति ज्ञेयः सकुस्तुम्बुरुः ॥ ७ ॥ शतकुन्दुरुकौ पादेनार्धेन नखतुरुष्कौ च । मलयप्रियंगुभागौ गन्धो धूप्यो गुडनखेन ॥ ८ ॥ गुग्गुलुवालकलाक्षामुस्तानखशर्कराः क्रमाद्धूपः । अन्यो मांसीवालकतुरुष्कनखचन्दनैः पिण्डः ॥ ९ ॥ हरीतकीशंखघनद्रवाम्बुभिर्गुडोत्पलैः शैलकमुस्तकान्वितैः । नवान्तपादादिविवर्धितैः क्रमाद् भवन्ति धूपा बहवो मनोहराः ॥ १० ॥ भागैश्चतुर्भिः सितशैलमुस्ताः श्रीसर्जभागौ नखगुग्गुलूच । कर्पूरबोधो मधुपिण्डितोऽयं कोपच्छदो नाम नरेन्द्रधूपः ॥ ११ ॥ त्वगुशीरपत्रभागैः सूक्ष्मैलार्धेन संयुतैश्चूर्णः । पटवासः प्रवरोऽयं मृगकर्पूरप्रबोधेन ॥ १२ ॥ घनवालकशैलेयककर्चूरोशीरनागपुष्पाणि । व्याघ्रनखस्पृक्कागुरुदमनकनखतगरधान्यानि ॥ १३ ॥ कर्पूरचोरमलयैः स्वेच्छापरिवर्तितैश्चतुर्भिरतः । एकद्वित्रिचतुर्भिभागैर्गन्धार्णवो भवति ॥ १४ ॥ अत्युल्बणगन्धत्वादेकांशो नित्यमेव धान्यानाम । कर्पूरस्य तदूनो नैतौ द्वित्र्यादिभिर्देयौ ॥ १५ ॥ श्रीसर्जगुडनखैस्ते धूपयितव्याः क्रमान्न पिण्डस्थैः । बोधः कस्तूरिकया देयाः कर्पूरसंयुतया ॥ १६ ॥ अत्र सहस्रचतुष्टयमन्यानि च सप्ततिसहस्राणि । लक्षं शतानि सप्त विंशतियुक्तानि गन्धानाम् ॥ १७ ॥ एकैकमेकभागं द्वित्रिचतुर्भागिकैर्युतं द्रव्यैः । षड्गन्धकरं तद्वत् द्वित्रिचतुर्भागिकं कुरुते ॥ १८ ॥ द्रव्यचतुष्टययोगाद्गन्धचतुर्विंशतिर्यथैकस्य । एवं शेषाणाभपि षण्णवतिः सर्वपिण्डोऽत्र ॥ १९ ॥ षोडशके द्रव्यगणे चतुर्विकल्पेन भिद्यमानानाम् । अष्टादश जायन्ते शतानि सहितानि विंशत्या ॥ २० ॥ षण्णवतिभेदभिन्नश्चतुर्विकल्पो गणो यतस्तस्मात् । षण्णवतिगुणः कार्यः सा संख्या भवति गन्धानाम् ॥ २१ ॥ पूर्वेण पूर्वेण गतेन युक्तं स्थानं विनान्त्यं प्रवदन्ति संख्यान् । इच्छाविकल्पैः क्रमशोऽभिनीय नीते निवृत्तिः पुनरन्यनीतिः ॥ २२ ॥ द्वित्रीन्द्रियाष्टभागैरगुरुः पत्रं तुरुष्कशैलेयौ । विषयाष्टपक्षदहनाः प्रियंगुमुस्तारसाः केशः ॥ २३ ॥ स्पृक्कात्वक्तगराणां मांस्याश्च कृतैकसप्तषड्भागाः । सप्तर्तुवेदचन्द्रैर्मलयनखश्रीककुन्दुरुकाः ॥ २४ ॥ षोडशके कच्छपुटे यथा तथा मिश्रितैश्चतुर्द्रव्यैः । येऽत्राष्टादश भागास्तेऽस्मिन् गन्धादयो योगाः ॥ २५ ॥ नखतगरतुरुष्कयुता जातीकर्पूरमृगकृतोद्बोधाः । गुडनखधूप्या गन्धाः कर्तव्याः सर्वतोभद्राः ॥ २६ ॥ जातीफलमृगकर्पूरबोधितैः ससहकार-

मधुसिक्तैः । बहवोऽत्र पारिजातश्चतुर्भिरिच्छापरिगृहीतैः ॥ २७ ॥ सर्जरसश्रीवासकसमन्विता येऽत्र धूपयोगास्तैः । श्रीसर्जरसवियुक्तैः स्नानानि सवालकत्वग्भिः ॥ २८ ॥ रोध्रोशीरनतागुरुमुस्ताप्रियंगुवनपथ्याः । नवकोष्ठात्कच्छपुटाद् द्रव्यत्रितयं समुद्धृत्य ॥ २९ ॥ चन्दनतुरुष्कभागौ शुक्रार्धं पादिका तु शतपुष्पा । कुटुहिंगुलगुडधूप्याः केसरगन्धाश्चतुरशीतिः ॥ ३० ॥ सप्ताहं गोमूत्रे हरीतकीचूर्णसंयुते क्षिप्त्वा । गन्धोदके च भूयो विनिक्षिपेद्दन्तकाष्ठानि ॥ ३१ ॥ एलात्वक्पत्राञ्जनमधुमरिचैर्नागपुष्पकुष्ठैश्च । गन्धाम्भः कर्तव्यं कञ्चित्कालं स्थितान्यस्मिन् ॥ ३२ ॥ जातीफलपत्रैलाकर्पूरैः कृतयमैकशिखिभागैः । अवचूर्णितानि भानोर्मरीचिभिः शोषणीयानि ॥ ३३ ॥ वर्णप्रसादं वदनस्य कांतिं वैशद्यमास्यस्य सुगन्धितां च । संवेवितुः श्रोत्रसुखां च वाचं कुर्वन्ति काष्ठान्यसकृद्भवानाम् ॥ ३४ ॥ कामं प्रदीपयति रूपमभिव्यनक्ति सौभाग्यमावहति वक्त्रसुगन्धितां च । ऊर्जं करोति कफजांश्च निहन्ति रोगांस्ताम्बूलमेवमपरांश्च गुणान् करोति ॥ ३५ ॥ युक्तेन चूर्णेन करोति रागं रागक्षयं पूगफलातिरिक्तम् चूर्णाधिकं वक्त्रविगन्धकारि पत्राधिकं साधु करोति गन्धम् ॥ ३६ ॥ पत्राधिकं निशि हितं सफलं दिवा च प्रोक्तान्यथाकरणमस्य विडम्बनैव । कक्वोलपूगलवलीफलपारिजातैरामोदितं मदमदामुदितं करोति ॥ ३७ ॥

इति श्रीवराहमिहिरकृतौ बृहत्संहितायामन्तः पुरचिन्तायां गन्धयुक्तिर्नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

श्वेत केशोंवाले पुरुषको माला, गंध (अतर आदि), धूप, वस्त्र, भूषणादि नहीं शोभित होते, इससे आंखोंमें अंजन डालने और भूषण पहरनेमें यत्न करनेकी भांति केश रंगनेका भी यत्न करना चाहिये ॥१॥ लोहके पात्रमें सिर्केके बीच कोदोंके चावल रांधे, फिर उन चावलोंमें लोहचून मिलाय बहुत सूक्ष्म पीसकर रक्खे पश्चात् केशोंको सिर्केसे खट्टे कर उनपर पहले पीसकर रक्खा हुआ लेप करे और ऊपर अंडादिके हरे पत्ते लपेटकर बैठे ॥२॥ दो पहर बीतनेके उपरान्त इस लेपको धोय आमलोंका लेप कर पत्तोंसे लपेटे, फिर दो पहर बैठा रहे पीछे शिरको धोवे तो कृष्णवर्णके केश हो जाते हैं। केश काले होनेके पीछे शिरःस्नान, सुगंध तेल, मनोहर गंध और भांति २ धूपोंकरके शिरसे लोहे और सिर्केका दुर्गन्ध दूर करके अंतःपुरमें जाय अपनी रानियोंके साथ राजा राज्य सुखका सेवन करे ॥४॥ दालचीनी, कूठ, रेणुका, नलिका, स्पृक्का, बोल, तगर नेत्रवाला, नागकेशर, गंधपत्र इनको सम भाग ले पीसकर शिरमें लगाय शिर धोवे यह राजाओंके योग्य शिरःस्नान कहा है ॥५॥ मंजीठ, व्याघ्रनख, शक्ति, दालचीनी, कूठ और बोल इन सबको बराबर लेकर चूर्ण कर मीठे तेलमें डाल, धूपमें तपावे तो उस तेलमें चंपेकी पुष्पोंकी गंध हो जाती है ॥६॥ पत्र, सिह्लक, नेत्रवाला और तगरको सम भाग मिलावे तो कामदेवको उद्दीपन करनेवाला गंध होता है. इस गंधमें व्याम (गंधद्रव्यविशेष) मिलावे और

कटुका (गुग्गुल) का धूप देवे तो मौलसिरीपुष्पके समान गंधवाला गंधद्रव्य बनता है; इसमें कूठ मिलानेसे नील कमलके तुल्य गंध हो जाती है, श्वेत चंदन मिलानेसे चंपेके तुल्य गंध होती है, इसमें जायफल, दालचीनी और धनिया मिला दे तो अतिमुक्तक-पुष्पके समान गंध हो जाती है ॥७॥ सौफ, कुंदरक (देवदारु, वृक्षका निर्यास) यह दोनों एक चतुर्थांश नख और सिल्लक यह दोनों अर्ध अर्थात् दो चतुर्थांश, श्वेत चंदन और गंधप्रियंगु यह दोनों एक चतुर्थांश, लेकर गंधद्रव्य बनावे और इसको गुडका व नखका धूप दे ॥८॥ गूगल नेत्रवाला, लाख, मोथा, नख और खांड इन सबको बराबर लेकर धूप बनावे. बालछड, नेत्रवाला, सिल्लक, नख और चंदन सम भाग लेनेसे दूसरा पिंड धूप बनता है, ॥९॥ हरड, शंख, नख, द्रव (बोल), नेत्रवाला, गुड, कूठ शैलक, मोथा इन नौ द्रव्योंको एक पादसे लेकर नौ तक बढावे, जैसे हरड एक भाग, शंख दो भाग, नख तीन भाग, इत्यादि एक और गुड कूठको पाद आदि बढानेसे दूसरा शैलक और मोथेकी पादवृद्धिसे तीसरा या हरड एक भाग शंख दो भाग यह एक धूप हुआ, इसमें नखके तीन भाग मिलानेसे दूसरा धूप बोलके चार भाग मिलानेसे तीसरा धूप ऐसेही बहुतसे मनोहर धूप बन जाते हैं ॥१०॥ खांड शैलेय और मोथा इनसे चौगुना श्रीवास और सर्ज (राल) दो भाग, नख और गुग्गुल दो भाग इनको पीसकर कर्पूरका बोध देवे अर्थात् कर्पूरके चूर्णसे उसको सुगंधित करे, फिर शहत मिलाय पिंड कर लेवे, यह कोपच्छदनाम धूप राजाओंके योग्य होता है ॥११॥ दालचीनी, खश, गंधपत्र इनके तीन भाग और सबसे आधी छोटी इलायची लेकर सबका चूर्ण कर और कस्तूरी व कपूरका बोध दे, यह उत्तम पटवास अर्थात् वस्त्रोंको सुगंधित करनेवाला चूर्ण बनता है ॥१२॥ मोथा, नेत्रवाला, शैलेयक, कचूर, खस, नागकेसरके फूल, व्याघ्रनख, स्पृक्का और अगुरु, दमनक, नख, तगर, धनियां ॥१३॥ कपूर, चोर और श्वेत चंदन यह सोलह गंधद्रव्य हैं इनमेंसे चाहे जौनसे चार द्रव्य लेकर उनके एक, दो, तीन और चार भाग अदल बदल कर लेनेसे गंधार्णव होता है ॥१४॥ धनियोंमें अति उत्कटगंध होता है इस कारण धनियोंका नित्य एकही भाग लेना चाहिये और कपूर भी बहुत उत्कटगंध होता है इसलिये एक भागसेभी कम लेना उचित है, इन दोनोंके कभी दो, तीन भाग न लेवे, नहीं तो सब द्रव्योंके गंधको दबा लेते हैं ॥१५॥ सब गंधद्रव्योंको श्रीवास, राल, गुड और नखका धूप दे परंतु इन चारोंका अलग २ धूप दे सबको मिलाकर न देवे, पीछेसे कर्पूर और कस्तूरिका बोध दे ॥१६॥ इन गंधद्रव्योंसे एक लाख चौहत्तर हजार सात, सौ वीस प्रकारके गंध बनते हैं ॥१७॥ एक द्रव्यका एक २ भाग और अन्य द्रव्योंके दो, तीन और चार भाग ले तो छः प्रकारके गंध होते हैं. इसी भांति उस द्रव्यके क्रमसे दो, तीन और चार भाग ले और अन्य द्रव्योंके आदि दो भाग मिलावे तो छः गंध होते हैं ॥ १८ ॥ चार द्रव्योंके मेलसे एकद्रव्यके चौवीस भेद होंगे, यह सब मिलकर छियानवें भेद होते हैं ॥१९॥ सोलह प्रकारके जो गंधद्रव्य कहे उनसे चार २ द्रव्य लेकर भेद करे तो एक हजार आठ सौ चौवीस गंध होते हैं ॥२०॥ चार द्रव्यके गंधसे छियानवें भेद कह आये हैं और एक हजार आठ सौ वीस भेद चार २ द्रव्यके मिलानसे होते हैं इसलिये छियानवेंसे अठारह सौ बीसको गुण दे तो पूर्वोक्त गंधसंख्या १७४७२० सिद्ध हुई ॥२१॥ गंधोंके भेद जाननेके लिये गणितका प्रकार और प्रस्तार दोनों कहते हैं,

सब जितने द्रव्य हों उनकी संख्यातक एकसे लेकर नीचेसे ऊपरको खडी पंक्ति लिख पीछे नीचेके एकको अपने ऊपरके दोमें जोडे तो हुए तीन, फिर इन तीनको अपने ऊपरके तीनमें जोडे हुए छः, उनको अपने ऊपरके चारमें जोडे हुए दश, इस प्रकार सबका संकलन करता आवे, अंतकी संख्याको छोड दे पीछे इस संकलित पंक्तिका संकलन कर अंत्य संख्या छोड देवे इस भांति उतनी पंक्तियोंमें संकलन करता जाय जितने २ द्रव्य लेकर भेद जानना चाहता है तो पिछली पंक्तिके ऊपर अंत्यकी संख्याको छोड जो संख्या होगी वही भेदसंख्या जानो ॥ २२ ॥ अगर, पत्र (गंधपत्र), तुरुष्क (सिह्लक), शैलेय इन चारोंके दो, तीन, पांच और आठ भाग लेवे, प्रियंगु, मोथा, रस, (बाले), केश हीबेर इनके पांच, दो, आठ और तीन भाग ॥२३॥ स्पृक्का, त्वक्, तगर, मांसी इनके चार, एक, सात और छः भाग, श्वेत चंदन, नख, श्रीवास, कुंदरू इनके सात, छः, चार और एक भाग ले ॥२४॥ इन सोलह द्रव्योंके कच्छपुटमें जैसा नीचे लिखा है जिन २ भागोंका योग अठारह हो उन २ चार द्रव्योंके उतने २ भाग लेकर अनेक प्रकार गंधयोग बनते हैं ॥२५॥ पीछे उन गंधोंको नख, तगर, सिह्लकसे युक्त करे जाती (जायफल), कर्पूर, कस्तूरीसे उनका उद्बोधन करे और, गुड व नखकी धूप देदे. कच्छपुटमें सब ओर जोडनेसे योग अठारह होते हैं इसलिये इन गंधोंको सर्वतोभद्र कहते हैं ॥२६॥ इसी कच्छपुटमें चाहे जौनसे चार द्रव्य लेकर जायफल, कस्तूरी और कपूरसे सुवासित करे और सहकार (बहुत सुगंधयुक्त आम्र का रस और शहतमें उनको भिगोवे तो पारिजातफूलसमान गंधवाले अनेक गंध बनते हैं, यह सब मुखवास हैं अर्थात् इन पारिजातगंधोंसे मुख सुगंधयुक्त होता है ॥२७॥ पहले कच्छपुटमें जितने गंध कहे उनमें सर्ज रस (राल) और श्रीवासके मिलानेसे अनेक प्रकारके धूप बनते हैं और उनसे श्रीवास और सर्जरस न मिलावे और नेत्रवाला, दालचीनी मिला देवे तो स्नानके योग्य चूर्ण बनते हैं अर्थात् उनको शिर आदि में लगाय स्नान करे ॥२८॥ लोध, खस, तगर, अगुरु, मोथा, पत्र, प्रियंगु, वन (परिपेलव नाम गंध द्रव्य), हरड इन नौ द्रव्योंके कच्छपुटसे चाहे जो तीन द्रव्य लेकर गंध बनावे ॥२९॥ उनमें एक भाग चंदन, एक भाग सिह्लक आधा भाग नख और एक भागका चतुर्थांश सौंफ मिलाकर गुग्गुल और गुडका धूप उनको देवे तो यह बकुलपुष्पके तुल्य गंधवाले चौरासी गंधद्रव्य बनते हैं, नौ द्रव्योंसे तीन २ द्रव्य लेकर गंध बनाते तो चौरासी भेद होते हैं; यह पूर्वोक्त रीतसे प्रस्तार करके देख लेना चाहिये ॥३०॥ दाँतोनको लेकर हरडे चूर्णयुक्त गोमूत्रमें, सात दिन भिगोकर पीछे उनको गंधोदकमें डाले ॥३१॥ इलायची, त्वक् पत्र, अंजन, शहत, काली मिरच, नागकेसर और कूठ इन सबको सम भाग लेकर गंधजल बनावे, उस गंधजलमें कुछ समय उन दंतकाष्ठों को भिगोय रक्खे ॥३२॥ पीछे जायफल चार भाग, पत्र दो भाग, इलायची एक भाग और कपूर तीन भाग लेकर इनका सूक्ष्म चूर्ण कर उन दंतकाष्ठोंसे ऊपर मसल दे, पीछे उनको धूपमें सुखाकर रक्खे ॥३३॥ पहले जो दंतकाष्ठ सिद्ध किये उनको सेवन करनेवाले पुरुषके शरीरका रंग उत्तम होता है, मुखकी कांति उत्तम होती है, भीतरसे मुख निर्मल व सुगंधयुक्त होता है, और उस पुरुषकी वाणी मीठी हो जाती है कि, जिसके सुननेसे सुख होता है ॥३४॥ पान कामदेवको दीप्त करनेवाला है, रूपको उत्पन्न करता, सौभाग्यको करता, मुखको सुगंधयुक्त करता, बल करता, कफके रोगोंको हरता है, पान खानेसे

और जो पहले दंतकाष्ठके गुण कहे वे भी होते हैं ॥३५॥ पानमें ठीक चूना लगनेसे (न बहुत हो और न थोडा) तो राग (रंग) करता है, सुपारी अधिक हो तो रोगका क्षय होता है, चूना अधिक होनेसे मुखमें दुर्गन्ध करता है और पान अधिक हो तो मुखमें उत्तम गंध करता है ॥३६॥ रात्रिको पान खाय तो सुपारी थोडी डाले और पान अधिक रक्खे, दिनमें खाय तो सुपारी अधिक डाले और पान थोडा रक्खे तो उत्तम होता है, इससे विपरीत रीतिसे पान खाया तो पान खाना विडंबना है. कक्कोल, सुपारी, लवलीफल और पारिजातसे तांबूल खानेवाले पुरुषको मदके हर्ष करके पान खाना प्रसन्न करता है ॥३७॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायां सप्तसप्ततिमोऽध्यायः ॥७७॥

अथाष्टसप्ततितमोऽध्यायः

स्त्रीपुरुषसमायोगः

शस्त्रेण वेणीविनिगूहितेन विदूरथं स्वा महिषी जघान । विषप्रदिग्धेन च नूपुरेण देवी विरक्ता किल काशिराजम् ॥ १ ॥ एवं विरक्ता जनयन्ति दोषान् प्राणच्छिदोऽन्यैरनुकीर्तितैः किम् । रक्ता विरक्ताः पुरुषैरतोऽर्थात् परीक्षितव्याः प्रमदाः प्रयत्नात् ॥२॥ स्नेहं मनोभवकृतं कथयन्ति भावा नाभीभजस्तनविभूषणदर्शनानि । वस्त्राभिसंयमनकेशविमोक्षणानि भ्रूक्षेपकम्पितकटाक्षनिरीक्षणानि ॥ ३ ॥ उच्चैः ष्ठीवनमुत्कटप्रहसितं शय्यासनोत्सर्पणं गात्रास्फोटनजृम्भणानि सुलभद्रव्याल्पसम्प्रार्थना । बालालिङ्गनचुम्बनान्यभिमुखे सख्याः समालोकनं दृक्पातश्च पराङ्मुखे गुणकथा कर्णस्य कण्डूयनम् ॥ ४ ॥ दर्मां च विद्याद्रनुरक्तचेष्टां प्रियाणि वक्ति स्वधनं ददाति । विलोक्य संहृष्यति वीतरोषा प्रमार्ष्टि दोषान् गुणकीर्तनेन ॥ ५ ॥ तन्मित्रपूजा तदरिद्विषत्वं कृतस्मृतिः प्रोषितदौर्मनस्यम् । स्तनौष्ठदानान्युपगूहनं च स्वेदोऽथ चुम्बाप्रथमाभियोगः ॥ ६ ॥ विरक्तचेष्टा भृकुटीमुखत्वं पराङ्मुखत्वं कृतविस्मृतिश्च । असम्भ्रमो दुष्परितोषता च तद्द्विष्टमैत्री परुषं च वाक्यम् ॥ ७ ॥ स्पृष्ट्वाथवालोक्य धुनोति गात्रं करोति गर्वं न रुणद्धि यान्तम् । चुम्बाविरामे वदनं प्रमार्ष्टि पश्चात्समुत्तिष्ठति पूर्वसुप्ता ॥ ८ ॥ भिक्षुणिका प्रव्रजिता धात्री कुमारिका रजिका । मालाकारी दुष्टाङ्गना सखी नापिती दूत्यः ॥९॥ (कुलजनविनाशहेतुर्दूत्यो यस्मादतः प्रयत्नेन । ताभ्यः स्त्रियोऽभिरक्ष्या वंशयशोमानवृद्ध्यर्थम् ॥ १० ॥ रात्रीविहारजागररोगव्यपदेशपरगृहेक्षणिकाः । व्यवसनोत्सवाश्च सङ्केतहेतवस्तेषु [1]रक्ष्याश्च ॥ ११ ॥ आदौ नेच्छति नोज्झति स्मरकथां व्रीडाविमिश्रा-

---

१ "लेख्यप्रस्थापनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः । दूतीसम्प्रेषणैर्नार्याः भावाभिव्यक्तिरिष्यते ॥" साहित्यदर्पण तीसरा परिच्छेद ॥ अर्थ-चिट्ठी भेजना, श्रेष्ठ स्नेहदिखाना मृदुवचन कहना अथवा दूतीके भेजनेसेही स्त्रियां अपने अभिप्रायको प्रगट करती हैं.

लसा मध्ये ह्रीपरिवर्जिताभ्युपरमे लज्जाविनम्रानना । भावैर्नैकविधैः करोत्यभिनयं भूयश्च या सादरा बुद्ध्वा पुम्प्रकृतिं च यानुचरति ग्लानेतरैश्चेष्टितैः ॥१२॥ स्त्रीणां गुणा यौवनरूपवेषदाक्षिण्यविज्ञानविलासपूर्वाः । स्त्रीरत्नसंज्ञा च गुणान्वितासु स्त्रीव्याधयोऽन्याश्चतुरस्य पुंसः ॥१३॥ न ग्राम्यवर्णैर्मलदिग्धकाया निन्द्याङ्गसम्बन्धिकथां च कुर्यात् । न चान्यकार्यस्मरणं रहःस्था मनो हि मूलं हरदग्धमूर्तेः ॥ १४ ॥ श्वासं मनुष्येण समं त्यजन्ती बाहूपधानस्तनदानदक्षा । सुगन्धकेशासुसमीपरागा सुप्तेऽनुसुप्ता प्रथमं विबुद्धा ॥ १५ ॥ दुष्टस्वभावाः परिवर्जनीया विमर्दकालेषु च न क्षमा याः । यासामसृग्वासितनीलपीतमाताम्रवर्णं च न ताः प्रशस्ताः ॥ १६ ॥ या स्वप्नशीला बहुरक्तपित्ता प्रवाहिनी वातकफातिरिक्ता । महाशना स्वेदयुताङ्गदुष्टा या ह्रस्वकेशी पलितान्विता च ॥ १७ ॥ मांसानि यस्याश्च चलन्ति नार्या महोदरा खिक्खिमिनी च या स्यात् । स्त्रीलक्षणे याः कथितास्च पापास्ताभिर्न कुर्यात्सह कामधर्मम् ॥ १८ ॥ शशशोणितसङ्काशं लाक्षारससन्निकाशमथवा यत् । प्रक्षालितं विरज्यति यच्चासृक्तद्भवेच्छुद्धम् ॥ १९ ॥ यच्छब्दवेदनावर्जितं त्र्यहात्सन्निवर्तते रक्तम् । तत् पुरुषसम्प्रयोगादविचारं गर्भतां याति ॥ २० ॥ न दिनत्रयं निषेवेत् स्नानं माल्यानुलेपनं च स्त्री । स्नायाच्चतुर्थदिवसे शास्त्रोक्तेनोपदेशेन ॥ २१ ॥ पुष्यस्नानौषधयो याः कथितास्ताभिरम्बुमिश्राभिः । स्नायात्तथात्र मन्त्रः स एव यस्तत्र निर्दिष्टः ॥ २२ ॥ युग्मासु किल मनुष्या निशासु नार्यो भवन्ति विषमासु । दीर्घायुषः सुरूपाः सुखिनश्च विकृष्टयुग्मासु ॥ २३ ॥ पक्षिणपार्श्वे पुरुषो वामे नारी यमावुभसंस्थौ । यदुदरमध्योपगतं नपुंसकं तन्निबोद्धव्यम् ॥ २४ ॥ केन्द्रत्रिकोणेषु शुभस्थितेषु लग्ने शशाङ्के च शुभैः समेते । पापैस्त्रिलाभारिगतैश्च यायात् पुञ्जन्मयोगेषु च संम्प्रयोगम् ॥ २५ ॥ न नखदशनविक्षतानि कुर्यादृतुसमये पुरुषः स्त्रियाः कथञ्चित् । ऋतुरपि दश षट् च वासराणि प्रथमनिशात्रितयं न तत्र गम्यम् ॥ २६ ॥

इति श्रीवराहमि० बृहत्सं० पुंस्त्रीसमायोगो नामाष्टसप्ततितमोऽध्यायः ॥७८ ॥

विदूरथराजाकी रानीने अपनी चोटीमें विनिगूहित (छिपाये हुए) शस्त्रसे अपने पतिको मार डाला था और काशीराजकी रानीने विरक्त होकर विष मिले हुए नूपुरसे अपने स्वामीका नाश किया ॥१॥ विरक्त स्त्रियें इस प्रकार प्राण नाश करनेवाले दोष उठा खडे करती हैं, फिर और दोषके कथन करनेकी क्या आवश्यकता है, इस कारण अतियत्नके साथ पुरुषोंको स्त्रियोंके विरक्त या अविरक्तपनकी परीक्षा करनी चाहिये ॥२॥ अनुरक्तके समस्त भाव कामदेवसे उत्पन्न हुआ स्नेह प्रकट करते हैं. स्त्रियें नाभि, भुज, छातियें और गहने दिखाती हैं, वस्त्र पहिरना, केश बांधना, बालोंका खोल देना, भौं चढाना, कम्पित कटाक्षसे देखना यह समस्त चिह्न प्रकाशित किया करती हैं ॥३॥ ऊंचे स्वरसे खखारना, ठट्ठा मारकर हंसना, शय्या और आसनके निकट जाना, अंगोंका तोडना,

जँभाई लेना, थोडीसी सुलभ वस्तुका मांगना, सन्मुखके बैठे हुए बालकका चिपटाना और चूमना, सखीके सामने प्यारेको देखना, सखी दूसरी ओरको मुख करे तो प्यारेकी ओर कनखियोंसे देखना प्यारेके गुणोंका बखान करना, कान खुजाना यह सब अनुरक्तके चिह्न हैं ॥४॥ अनुरक्त स्त्री प्यारे वचन कहती हैं, अपना धन देती हैं, देखनेसे हर्षित होती हैं और क्रोधहीन होकर सब दोषोंको गुण कहकर भली भांति छिपाती हैं ॥५॥ पतिके मित्रोंकी पूजा करना, पतिके शत्रुसे द्वेष करना, पतिकी याद करना, पतिके परदेश जानेपर मनमें दुःख पाना, आलिंगन आदिके लिये स्तन और पानके लिये अधरका दान करना, पहली वार स्वामीके मिलनेसे पसीनेका आ जाना, अपने आपही पहले पतिका मुख चूमना यह अनुरागिणी स्त्रियोंकी चेष्टा हैं ॥६॥ भ्रुकुटीका चढाना, मुख फेर लेना, प्यारेको भूल जाना, अनादर करना, असंतोषित रहना, जो स्वामीका शत्रु हो उसके साथ मित्रता करना, कठोर वचन कहना ॥७॥ पतिको छूकर या देखकर शरीरको कम्पायमान करना, गर्व करना (अर्थात् ऐसी बातोंको करना कि तुम हो क्या, मेरी समान कोई सुंदर नहीं है), चलते हुए स्वामीको न बिठलाना, पतिके चूम लेनेपर मुंहको पोंछ डालना, स्वामीके सोनेसे पहले सोना और पीछे उठना यह सब चेष्टा विरक्त [1]स्त्रीकी हैं, ॥८॥ भिखारिन, सन्यासिन, दासी, धाई, धोबन, मालन, दुष्टाङ्गना; (कानी, खुतरी आदि लक्षणयुक्त स्त्री), सखी और नायन यह दूती होती हैं ॥९॥ कुलके मनुष्योंका नाश करनेके लिये यह दूतियां कारण हैं. इस कारण यत्नके साथ वंश, यश और मान बढानेके लिये इन दूतियोंके पंजेसे स्त्रियोंको बचाना चाहिये ॥ १० ॥ रात्रिके समय गृहके बाहर जाना या जागनेके लिये रोगका मिस करना (तबियतके अच्छे न होनेका बहाना करना), पराये घरका देखना विपत्ति और व्याह आदि उत्सवोंमें जाना यह समस्त समय स्त्रियोंके संकेतके हैं, इस कारण इसमें भी स्त्रियोंकी रक्षा करनी चाहिये ॥११॥ आगे जो लाजसे मिले हुए आलस्यसे युक्त हो, सुरतकी बात नहीं करती और उसको छोड भी नहीं सकती, रतिके बीचमें लाजको छोड देती है, रतिके समाप्त हो जानेपर लाजसे नीचा मुख कर लेती है. जो स्त्री आदरके साथ अनेक प्रकारकी रतिक्रियाका खेल करती है और पुरुषका स्वभाव जानकर ग्लानियुक्त चेष्टाके साथ आचरण करती है अर्थात् स्वामीके दुःखित होनेसे दुःखी और सुखयुक्त होनेसे सुखी होती है. ऐसीही स्त्रीके साथ रति करना उचित है ॥१२॥ यौवन (जवानी), रूप, वेष, चतुराई, विज्ञान और विलासादि समस्त गुणोंके होनेसे स्त्रियोंकी रत्न संज्ञा होती है अर्थात् वह रत्नही समझी जाती हैं और चतुर पुरुष के लिये इससे विपरीत गुणवाली स्त्रियां व्याधिकी समान हो जाती हैं ॥१३॥ गंवारी बोली बोलनेवाली या अंगोंके मलीन रखनेवाली स्त्रीके साथ निन्दनीय अंगोंके सम्बंधकी (गुदादिकी बातचीत करना उचित नहीं और एकान्त स्थानमें बैठी हुई स्त्री जो और किसी कार्यको सोच रही हो उसके साथ भी स्मरकथा (रतिकी बातचीत) का कहना उचित नहीं, क्योंकि मनही कामदेवका मूल है ॥१४॥ जो स्त्री पुरुषके साथ बराबर श्वास छोडते

१–३८४ प्रकारके नायिकाभेदोंमें जो बालिका, मध्या, प्रगल्भा और वाराङ्गनादि भेदसे अनुरक्ता विरक्ताके लक्षण ह, सो सब साहित्यदर्पणके तीसरे परिच्छेदके १५४ व १५५ सूत्रमें देखने चाहिये ॥

२ अपनी बांहके तकियेपर पतिका मस्तक रखकर स्तनोंसे छातीको पीडित करनेवाली, केशोंको सुगन्धित रखनेवाली सदा निकट रहकर जो सुंदर अनुराग करे, स्वामीके सोजानेपर सोनेवाली और स्वामीके जागनेसे पहले जागनेवाली ही अनुरागिणी है ॥१५॥ रतिके समय विमर्द्दको न सहनेवाली, दुष्टस्वभावसे युक्त स्त्रीका त्यागनाही ठीक है. जिन स्त्रियोंके ऋतुका रुधिर काला, नीला, पीला व कुछेक लाल रंगका होता है, वह भी श्रेष्ठ नहीं है ॥१६॥ बहुत सोनेवाली, बहुत रक्त (या) पित्तवाली, जिसके शरीरमें वात कफ अधिक होय, प्रवाहिणी (ऋतुके समय जिसके बहुत रुधिर निकले), बहुत भोजन करनेवाली जिसका शरीर सदा पसीनेसे युक्त रहे, छोटे केशवाली, श्वेत केशवाली, दूषित अंगवाली ॥१७॥ जिस स्त्रीके शरीरका मांस ढीला हो जो मिनमिनी और बडे पेटवाली हो और स्त्रियोंके लक्षण जिनके अच्छे न हों तिनके साथ कामधर्म न करे ॥१८॥ जिस स्त्रीके ऋतुका रुधिर खरगोश (खरहा) के रुधिरके समान या लाखके रंगके समान रंगवाला हो, जिसका दाग धोनेसे छुट जाय सो शुभ होता है ॥१९॥ जो रुधिर शब्द और पीडाहीन होकर तीन दिनके पीछे बिलकुल बंद हो जाय, सो रुधिर पुरुष समागम होनेके हेतुसे निश्चयही गर्भताको प्राप्त होता है ॥२०॥ ऋतुकालमें तीन दिनतक स्नान माला और अनुलेपनका व्यवहार करना स्त्रीको नहीं चाहिये. फिर चौथे दिन शास्त्रमें कहे हुए उपदेशके अनुसार स्नान करना उचित है ॥२१॥ पुष्यस्नानके अध्यायमें जिन औषधियोंका वर्णन कर आये हैं. उन सबके जलसे स्नान करे और जो मंत्र वहांपर कहे हैं, उन्हींका पढना आवश्यकीय है ॥२२॥ ऋतुसे युग्म (छठी आदि सम) रात्रियोंमें पुरुषका संयोग होनेसे पुत्र और विषमें (पांचवीं, सातवीं आदि) रात्रियोंमें पुरुषका संयोग होनेसे कन्या उत्पन्न होती है और विकृष्टयुग्मा (आठवीं, दशवीं आदि दूसरी सम (रात्रियोंमें पुरुषका संग होनेसे बडी आयुवाले, रूपवान् और सुखी पुत्रोंका जन्म होता है ॥२३॥ स्त्रीके दक्षिणपार्श्वमें गर्भ हो तो पुरुष, वाम पार्श्वमें हो तो कन्या, दोनों ओर हो तो दो गर्भ और जो गर्भ उदरके बीचमें हो तिसको नपुंसक जानना चाहिये ॥२४॥ केन्द्र या त्रिकोणमें शुभ ग्रह हों, लग्न और चंद्रमा शुभग्रहोंसे युक्त हो पापग्रह तीसरे, ग्यारहवें और छठे घरमें हों उस समय स्त्रीका संग करना चाहिये ॥२५॥ ऋतुकालमें पुरुषको किंचित् भी नख या दांतोंसे स्त्रियोंके अंगोंको क्षत नहीं करना चाहिये, सोलह दिनतक ऋतु रहती है, तिनमें पहली तीन रातोंमें ही ऋतुमती स्त्रीके साथ गमन न करे ॥२६॥

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य पंण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायामष्टसप्ततितमोऽध्यायः ॥७८॥

अथैकोनाशीतितिमोऽध्यायः

शय्यासनलक्षणम्

सर्वस्य सर्वकालं यस्मादुपयोगमेति शास्त्रमिदम् । राज्ञां विशेषतोऽतः शयनासनलक्षणं वक्ष्ये ॥१॥ असनस्यन्दनचन्दनहरिद्रसुरदारुदिन्दुकीशालाः । काश्मर्यञ्जनपद्मकशाका वा शिशपा च शुभाः ॥ २ ॥ अशनिजलानिलहस्तिप्रपातिता

मधुविहङ्गकृतनिलयाः । चैत्यश्मशानपथिजोर्ध्वशुष्कवल्लीनिबद्धाश्च ॥ ३ ॥ कण्टकिनो वा ये स्युर्महानदीसङ्गमोद्भवा ये च । सुरभवनजाश्च न शुभा ये चापरयाम्यदिक्पतिताः ॥ ४ ॥ प्रतिषिद्धवृक्षनिर्मितशयनासनसेवनात् कुलविनाशः । व्याधिभयव्ययकलहा भवन्त्यनर्थाश्च नैकविधाः ॥ ५ ॥ पूर्वं च्छिन्नं यदि वा दारु भवेत्तत्परीक्ष्यमारम्भे । यद्यारोहेत्तस्मिन् कुमारकः पुत्रपशुदं तत् ॥ ६ ॥ सितकुसुममत्तवारणदध्यक्षतपूर्णकुम्भरत्नानि । मंगल्यान्यन्यानि च दृष्ट्वारम्भे शुभं ज्ञेयम् ॥ ७ ॥ कर्मांगुलं यवाष्टकमुदरासक्तं तुषैः परित्यक्तम् । अगुलशतं नृपाणां महती शय्या जयाय कृता ॥ ८ ॥ नवतिः सैव षडूना द्वादशहीना त्रिषट्कहीना च । नृपपुत्रमन्त्रिबलपतिपुरोधसां स्युर्यथासंख्यम् ॥ ९ ॥ अर्धगतोऽष्टांशोनं विष्कम्भो विश्वकर्मणा प्रोक्तः । आयामत्र्यंशसमः पादोच्छ्रायः सकुक्षिशिराः ॥१०॥यः सर्वः श्रीपर्ण्याः पर्यंको निर्मितः स धनदाता असनकृतो रोगहरस्तिन्दुकसारेण वित्तकरः ॥११॥ यः केवलशिंशपया विनिर्मितो बहुविधं स वृद्धिकरः । चन्दनमयो रिपुघ्नो धर्मयशोदीर्घजीवितकृत् ॥१२॥ यः पद्मकपर्यंकः स दीर्घमायुः श्रियं श्रुतं वित्तम् । कुरुते शालेन कृतः कल्याणं शाकरचितश्च ॥१३॥ केवलचन्दनरचितं काञ्चनगुप्तं विचित्ररत्नयुतम् । अध्यासन् पर्यङ्कं विबुधैरपि पूज्यते नृपतिः ॥ १४ ॥ अन्येन समायुक्ता न तिन्दुका शिंशपा च शुभफलदा न श्रीपर्णी न च देवदारुवृक्षो न चाप्यसनः ॥ १५ ॥ शुभदौ तु शाकशालौ परस्परं संयुतौ पृथक् चैव । तद्वत्पृथक् प्रशस्तौ सहितौ च हरिद्रककदम्बौ ॥ १६ ॥ सर्वः स्यन्दनरचितो न शुभः प्राणान् हिनस्ति चाम्बकृतः । असनोऽन्यदारुसहितः क्षिप्रं दोषान् करोति बहून् ॥ १७ ॥ अम्बस्यन्दनचन्दनवृक्षाणां स्यन्दनाच्छुभाः पादाः । फलतरुणा शयनासनमिष्टफलं भवति सर्वेण ॥ १८ ॥ गजदन्तः सर्वेषां प्रोक्ततरूणां प्रशस्यते योगे । कार्योऽलङ्कारविधिर्गजदन्तेन प्रशस्तेन ॥१९॥ दन्तस्य मूलपरिधिं द्विरायतं प्रोज्झ्य कल्पयेच्छेषम् । अधिकमनूपचराणां न्यूनं गिरिचारिणां किञ्चित् ॥ २० ॥ श्रीवत्सवर्धमानच्छत्रध्वजचामरानुरूपेषु । छेदे दृष्टेष्वारोग्यविजयधनवृद्धिसौख्यानि ॥ २१ ॥ प्रहरणसदृशेषु जयो नद्यावर्ते प्रनष्टदेशाप्तिः । लोष्टे तु लब्धपूर्वस्य भवति देशस्य सम्प्राप्तिः ॥ २२ ॥ स्त्रीरूपे स्वविनाशो भृङ्गारेऽभ्युत्थिते सुतोत्पत्तिः । कुम्भेन निधिप्राप्तिर्यात्राविघ्नं च दण्डेन ॥ २३ ॥ कृकलासकपिभुजङ्गेष्वसुभिक्षव्याधयो रिपुवशत्वम् । गृध्रोलूकध्वांक्षश्येनाकारेषु जनमरकः ॥ २४ ॥ पाशेऽथवा कबन्धे नृपभृत्युजर्ननविपत् सुते रक्ते । कृष्णे श्यावे रूक्षे दुर्गन्धे चाशुभं भवति ॥ २५ ॥ शुक्लः समः सुगन्धिः स्निग्धश्च शुभावहो भवेच्छेदः । अशुभशुभच्छेदा ये शयनेष्वपि ते तथा फलदाः ॥ २६ ॥ ईषायोगे दारु प्रदक्षिणाग्रं प्रशस्तमाचायः । अपसव्यैकदिगग्रे भवति भयं भूतसञ्ज-

नितम् ।। २७ ।। एकेनावाक्छिरसा भवति हि पादेन पादवैकल्यम् । द्वाभ्यां न जीर्यतेऽन्नं त्रिचतुर्भिः क्लेशवधबन्धाः ।। २८ ।। सुषिरेऽथवा विवर्णे ग्रन्थौ पादस्य शीर्षगे व्याधिः । पादे कुम्भौ यश्च ग्रन्थौ तस्मिन्नुदररोगः ।। २९ ।। कुम्भाधस्ताज्जंघा तत्र कृतो जंघयोः करोति भयम् । तस्याश्चाधारोऽधः क्षयकृद्द्रव्यस्य तत्र कृतः ।। ३० ।। खुरदेशे यो ग्रन्थिः खुरिणां पीडाकरः स निर्दिष्टः । ईषाशीर्षण्योश्च त्रिभागसंस्थो भवेन्न शुभः ।। ३१ ।। निष्कुटमथ कोलाक्षं सूकरनयनं च वत्सनाभं च । कालकमन्यधुन्धुकमिति कथितश्छिद्रसंक्षेपः ।। ३२ ।। घटवत्सुषिरं मध्ये सङ्कटमास्ये च निष्कुटं छिद्रम् । निष्पावमाषमात्रं नीलं छिद्रं च कोलाक्षम् ।। ३३ ।। सूकरनयनं विषमं विवर्णमध्यर्द्धपर्वदीर्घं च । वामावर्तं भिन्नं पर्वमितं वत्सनाभाख्यम् ।। ३४ ।। कालकसंज्ञं कृष्णं धुन्धुकमिति यद्भवेद्विनिर्भिन्नम् । दारुसवर्णं छिद्रं न तथा पापं समुद्दिष्टम् ।। ३५ ।। निष्कुटसंज्ञे द्रव्यक्षयस्तु कोलेक्षणे कुलध्वंसः । शस्त्रभयं सूकरके रोगभयं वत्सनाभाख्ये ।। ३६ ।। कालकधुन्धुकसंज्ञं कीटैर्विद्धं च न शुभदं छिद्रम् । सर्वं ग्रन्थिप्रचुरं सर्वत्र न शोभनं दारु ।। ३७ ।। एकद्रुमेण धन्यं वृक्षद्वयनिर्मितं च धन्यतरम् । त्रिभिरात्मजवृद्धिकरं चतुर्भिरथो यशश्चाग्रम् ।। ३८ ।। पञ्चवनस्पतिरचिते पञ्चत्वं याति तत्र यः शेते । षट्सप्ताष्टतरूणां कष्ठैर्घटिते कुल विनाशः ।। ३९ ।।

इति श्रीवराहिमि० बृहत्सं० शय्यासनलक्षणं नामैकोनाशीतितमोऽध्यायः ।। ७९ ।।

जिस करके सर्वकालमें सबको उपयोगी होनेवाला यह शास्त्र तिसके उद्देश्यका जतानेवाला है, इसी कारण इसमें राजाओंके शय्यासनलक्षण कहे जायंगे ।।१।। असन, स्यंदन, हरिद्रा (हलदुआ), देवदारु, तिन्दुकी, शाल, काश्मरी, अंजन, पद्मक शाक या शीसमके वृक्षका काठ आसन और चौकीके लिये शुभदायी है ।।२।। जो वृक्ष बिजली, जल, वायु या हाथी करके गिरा दिये गये हों, जिनमें मधुमक्खियोंके छत्ते या पक्षियोंके घोंसले हों, जो चैत्य श्मशान और मार्गमें उत्पन्न हुए हों; जिनके ऊपर सूखी बेल लिपटी हुई हो ।।३।। जिन वृक्षोंमें कांटे हों, जो वृक्ष महानदीके संगमस्थानमें या देवमंदिरमें उत्पन्न हुए हों, जो वृक्ष काटे जानेपर पश्चिम और दक्षिण दिशाकी ओरको गिर गये हों ऐसे वृक्ष शय्या और आसनके लिये शुभदायी नहीं हैं ।।४।। वर्जनीय वृक्षके बने हुए आसन या शयनका व्यवहार करनेसे कुलका नाश हो जाता है, इससे व्याधिभय खर्च और क्लेशादि अनेक प्रकारके अनर्थ होते हैं ।। ५ ।। जो पहलेका कटा हुआ वृक्ष पडा हो तो आरंभमें (गढनेके समय) तिसकी परीक्षा करनी चाहिये, जो उस पर कोई कुमार (लडका) चढे तो वह काठ पुत्र और पशुका देनेवाला होगा ।।६।। शय्या आसन बनानेके आरंभमें सफेद फूल, मतवाला हाथी, दही अक्षत भरा हुआ घडा, रत्न और दूसरे मंगलद्रव्योंका देखना शुभकारी होगा ।।८।। तुषहीन आठ जौका पेट मिलाकर बराबर रखनेसे एक अंगुल होगा, इसका नाम कर्मांगुल है ऐसे शत अंगुलकी लम्बी शय्या राजाओंके जयका कारण होती है ।।८।। राजपुत्र, मंत्री, सेनापति और पुरोहितोंकी शय्या क्रमानुसार

नब्बे, चौरासी, अठत्तर और बहत्तर अंगुल लम्बी बनानी चाहिये ॥९॥ शय्याका लम्बाईके आधेमें उसका आठवां अंश घटा देनेसे जो बचे वह शय्याकी चौडाई हुई. दीर्घताके एक तृतीयांशकी तुल्य कुक्षि और शिरके साथ पादोच्छ्राय अर्थात् ऊंचाई होगी. यह विश्वकर्माने कहा है. ॥१०॥ श्रीपर्णी या तिन्दुकसारके बने हुए समस्त पलंग धनदान करते हैं और असन वृक्षके काठका बना हुआ पलंग रोगको हरता है ॥११॥ केवल शीशमके काठका बना हुआ पलंग अनेक भांतिकी वृद्धि करता है. चन्दनका पलंग शत्रुनाशक होनेके सिवाय धर्म, यश, और बडे आयुको देता है ॥१२॥ पद्मका बना हुआ पलंग दीर्घायु, श्री, श्रुत और वित्त देता है, शाल या सागूका बना हुआ पलंग कल्याणकारी होता है ॥१३॥ केवल चन्दनके बने, सुवर्णसे मढे और विचित्र रत्नोंसे जडे पलंगपर सोनेवाले राजाका देवता लोगभी पूजन करते हैं ॥१४॥ तिन्दुकी, शीशम, श्रीपर्णी, देवदारु और असन वृक्षके काठमें दूसरा काठ न मिलाकर पलंग बनावे तो वह पलंग या चौकी शुभदायक है ॥१५॥ सागू और शालाष्ठका परस्पर मिलना या अलग रहना भी शुभदायी है, वैसेही हरिद्रक और कदम्बकाठका मिलना या अलग रहना भी अच्छा और शुभदायी है ॥१६॥ स्यन्दन-वृक्षके काठके बने सब प्रकारके पलंग ही शुभदायी नहीं हैं, अंबवृक्षके काठका पलंग प्राण लेता है, असनमें दूसरे काठको मिलाया जाय तो वह शीघ्र बहुतसे दोष उत्पन्न करता है ॥१७॥ अम्ब, स्यन्दन और चन्दन इन तीनों वृक्षोंके काठसे बने पलंगोंके पाये स्यन्दनवृक्षके काठसे बनें तो शुभ होते हैं और बाकी सब प्रकारके फलवाले वृक्षोंके काठ करके शय्या और आसन बनें तो इष्टफलकी प्राप्ती होती है ॥१८॥ ऊपर कहे हुए सब प्रकारके वृक्षोंके साथ हाथी दांतका संयोग श्रेष्ठ होता है, श्रेष्ठ हाथी दांत करके तिसकी अलंकार विधिका करना उचित है ॥१९॥ गजदन्तके मूलमें जितने अंगुलकी परिधि हों तिससे दूने अंगुल मूलकी ओरसे छोडकर शेषभागसे समस्त रचना करे परंतु अनूपचर (जलप्रायदेशचर) हाथियोंके लिये कुछ अधिक और पर्वतचारी हाथियोंके विषयमें कुछ कम छोडना चाहिये ॥२०॥ हाथी दांतमें काटनेके समय श्रीवत्स, वर्द्धमान (मिट्टीका सिकोरा) छत्र, ध्वज और चमरके समान चिह्न दिखाई देनेसे आरोग्य, विजय, धनकी वृद्धि और सुख होते हैं ॥२१॥ शस्त्राकार चिह्न होनेसे जय, नद्यावर्त जैसा नदीमें चारों तरफसे किसी २ जगह जल घूमता रहता है उस आकारका चिह्न होनेसे नष्ट हुए देशकी प्राप्ति और ढेलेके आकारका चिह्न होनेसे पहले प्राप्त हुए देशकोही सम्प्राप्ति होती है ॥२२॥ स्त्रीरूपचिह्न होनेसे अपना नाश, भृङ्गार (झारी) के समान चिह्न उठे तो पुत्रकी उत्पत्ति होती है. घडेका चिह्न होनेसे रत्नकी प्राप्ति और दंडका चिह्न होनेसे यात्रामें विघ्न होता है ॥२३॥ गिरगट, वानर या सर्पके समान चिह्न होनेसे दुर्भिक्ष, व्याधि और रिपुवशत्व होता है. गिद्ध उल्लू, काक और बाजके समान चिह्न होनेसे मनुष्यों में मरी पडती है ॥२४॥ हाथी दांतके काटनेपर पाश या कबन्धका चिह्न निकले तो राजाकी मृत्यु, रुधिर निकलनेसे मनुष्योंपर विपत्ति और काला श्याव (काला पीला मिला हुआ), रूखा और दुर्गन्धयुक्त होनेसे अशुभकारी होता है ॥ २५ ॥ दांतका छिद्र बराबर, शुक्ल, सुगन्धित वा स्निग्ध हो तो शुभकारी होता है, यह आसनके लिये जानो. आसनके पक्षमें जो शुभकारी और अशुभकारी छेद कहे सो शय्याके विषयमें भी फलदायी हैं ॥ २६ ॥ ईषा[1]योगमें प्रदक्षिणा श्रेष्ठ

---

१ पलंगके दोनों ओरकी दो पट्टी और दो तरफके दो सेरुओंको ईषा कहते हैं.

है यह आचार्यलोगोंने व्यवस्था की है और तिससे विपरीत काष्ठोंका योग होना या शिर पाद काष्ठोंके अग्रका एकही दिशामें हों तो ऐसे पलंगपर सोनेवालेको भूतसे उत्पन्न हुआ भय होता है ।। २७ ।। शय्या वा आसनका एक पाया अधोमुख हो (काठके मूलकी ओर पायेका अग्र बनाया जाय काठके अग्रकी ओर पायेका मूल) तो पादोंकी विकलता, दो पाये अधोमुख हों तो उसपर सोनेवालेको अन्न नहीं पचता, तीन और चार पाये अधोमुख हों तो क्लेश, वध और बन्धन होता है ।। २८ ।। पायेका शिर छिद्रयुक्त अथवा बुरे रंगकी गांठसे युक्त हो तो व्याधि होती है. पायेके कुंभमें गांठ होनेसे उदररोग होता है ।। २९ ।। कुम्भके नीचेवाले काष्ठभागको जंघा कहते हैं, इससे बनाया या जो पलंगमें लगाया जाय तो सोनेवालेकी जंघाओंमें भय उत्पन्न करता है. जंघाके बीचले भागको आधार कहते हैं इस आधारमें गांठ होनेसे धनका क्षय होता है ।। ३० ।। पायेके खुरमें जो गांठ हो तो खुरवाले जीवोंकी पीडाका कारण कहा है. ईषा और शीर्षदेश (सिर-हानेका सेरुआ) के तिहाई भागपर गांठ हो तो शुभ नहीं होता ।। ३१ ।। निष्कुट, कोलाक्ष, शूकर-नयन, वत्सनाभ, कालक और धुन्धुक संक्षेपसे यह छिद्रोंके नाम कहे गये ।। ३२ ।। छेदके बीचमें घडेके समान चौडा और तंगमुखका आकार हो तो वह निष्कुट नामक छिद्र है और मटर या उर्दके बराबर और नीले रंगका छेद कोलाक्ष कहाता है ।। ३३ ।। विषम, विवर्ण और डेढ पोरुआ लम्बा छेद शूकरनयन, एक पोरुआ लम्बा वामावर्त छिद्र वत्सनाभ नामसे प्रसिद्ध है ।। ३४ ।। काले रंगका छेद कालक नामसे विख्यात है और जो विशेषतासे निर्भिन्न हो वह धुन्धुकनामवाला कहाता है. परन्तु काठके समान रंगवाले छेदसे भली भांति अशुभ उदय नहीं होता ।। ३५ ।। निष्कुट नामवाला छेद होनेसे धनका नाश कोलेक्षण (सूकरके नेत्रके आकार) से कुलध्वंस, शूकरके सरीखे छिद्रसे शस्त्रभय और वत्सनाभ नामक छेदते रोगमय होता है, और घुना हुआ कालक व धुन्धुक नामवाला छेद भी शुभदायी नहीं होता, जिसमें गांठें बहुतसी हों ऐसा सब प्रकारका काठ सर्वत्रही शुभदायी नहीं होता ।। ३६ ।। ३७ ।। एक वृक्षके काठका बना हुआ पलंग धन्य अर्थात् अच्छा है. दो वृक्षोंके काठका बना हुआ पलंग धन्यतर अर्थात् बहुतही अच्छा है. तीन वृक्षोंके काठका बना हुआ पलंग पुत्रोंको बढानेवाला है. चार वृक्षोंका बना हुआ पलंग उत्तम अर्थ यशको देनेवाला है ।। ३८ ।। पांच वृक्षोंके काठसे बने हुए पलंगपर जो मनुष्य सोता है उसकी इतिश्री हो जाती है. और छः सात या आठ वृक्षोंके काठसे बने हुए पलंग पर शयन करनेसे कुलका नाश हो जाता है ।। ३९ ।।

इति श्रीवराहमिहिराचार्यविरचितायां बृहत्संहितायां पश्चिमोत्तरदेशीयमुरादाबादवास्तव्य-पण्डितबलदेवप्रसादमिश्रविरचितायां हिन्दीटीकायामेकोनाशीतितमोऽध्यायः ।।७९।।

अशीतितमोऽध्याय

वज्रपरीक्षा.

रत्नेन सुभेन शुभं भवति नृपाणामनिष्टमशुभेन । यस्मादतः परीक्ष्यं दैवं-रत्नाश्रितं तज्ज्ञैः ।। १ ।। द्विपहयवनितादीनांस्वगुण विशेषेण रत्नशब्दोऽति। इह तूपलरत्नानामधिकारोवज्रपूर्वाणाम् ।।२।। रत्नानि बलाहैत्याद्दधीचितोऽन्ये वदन्ति जातानि । केचिद्भुवः स्वभावाद्वैचित्र्यं प्राहुरुपलानाम् ।। ३ ।। वज्रेन्द्रनीलम-

रक्तकर्केतनपद्मरागरुधिराख्याः। वैदूर्यपुलकविमलकराजमणिस्फटिकशशिकान्ताः ॥ ४ ॥ सौगन्धिकगोमेदशंखमहानीलपुष्परागाख्याः। ब्रह्ममणिज्योतीरससस्यकमुक्ताप्रवालानि ॥ ५ ॥ वेणातटे विशुद्धं शिरीषकुसुमोपमं च कौशलकम्। सौराष्ट्रकमाताम्रं कृष्णं सौर्पारकं वज्रम् ॥ ६ ॥ ईषत्ताम्रं हिमवति मतङ्गजं वल्लपुष्पसङ्काशम्। आपीतं च कलिङ्गे श्यामं पौण्ड्रेषु सम्भूतम् ॥ ७ ॥ ऐन्द्रं षडस्रि शुक्लं याम्यं सर्पास्यरूपमसितं च। कदलीकाण्डनिकाशं वैष्णवमिति सर्वमंस्थानम् ॥ ८ ॥ वारुणमबलागुह्योपमं भवेत् कर्णिकारपुष्पनिभम्। शृङ्गाटकसंस्थानं व्याघ्राक्षि निभं च हौतभुजम् ॥ ९ ॥ वायव्यं च यवोपममशोककुसुमप्रभं समुद्दिष्टम्। स्रोतः खनिः प्रकीर्णकमित्याकरसम्भवस्त्रिविधः ॥ १० ॥ रक्तं पीतं च शुभं राजन्यानां सितं द्विजातीनाम्। शरीषं वैश्यानां शुद्राणां शस्यतेऽसिनिभम् ॥ ११ ॥ सितसर्षपाष्टकं तण्डुलो भवेत्तण्डुलैस्तु शत्या तुलितस्य द्वे लक्षे मूल्यं द्विद्वचनिते चैतत् ॥ १२ ॥ पादत्र्यंशार्धोनं त्रिभागपञ्चांशषोडशांशाश्च। भागश्च पञ्चविंशः शतिकः साहस्त्रिकश्चेति ॥ १३ ॥ सर्वद्रव्याभेद्यं लध्वम्भसि तरति रश्मिवत् स्निग्धम्। तडिदनलशक्रचापोपमं च वज्रं हितायोक्तम् ॥ १४ ॥ काकपदमक्षिकाकेशधातुयुक्तानि शर्करविद्धम्। द्विगुणास्रि दिग्धकलुषत्रस्तविशीर्णानि न शुभानि ॥ १५ ॥ यानि च बुदबुददलिताग्रचिपिटवासीफलप्रदीर्घाणि। सर्वेषां चैतेषां मूल्याद्भागोऽष्टमो हानिः ॥ १६ ॥ वज्रं ते किञ्चिदपि धारयितव्यमेके पुत्रार्थिनीभिरबलाभिरुशन्ति तज्ज्ञाः। शृङ्गाटकत्रिपुटधान्यकवत्स्थितं यच्छ्रोणीनिभं च शुभदं तनयार्थिनीनाम् ॥ १७ ॥ स्वजनविभव जीवितक्षयं जनयति वज्रमनिष्टलक्षणम्। अशनिविषभयारिनाशनं शुभमुरुभोगकरं च भूभृताम् ॥ १८ ॥

इति श्रीवराहमि० बृहत्सं० वज्रपरीक्षा नामाशीतितमोऽध्यायः ॥ ८० ॥

शुभ रत्न धारण करनेसे राजाओंका कल्याण होता है, अशुभ रत्न धारण करनेसे अशुभ होता है, इसी कारण रत्न जाननेवाले पंडितों करके रत्नाश्रित दैवकी परीक्षा करना चाहिये ॥१॥ हाथी, अश्व, वनिता आदि समस्त पदार्थोंमें ही अपने २ गुण विशेषसे रत्न शब्द प्रयोग होता तो है (जैसे गजरत्न, अश्वरत्न, रमणीरत्न इत्यादि) परन्तु यहांपर रत्नशब्दसे हीरकादि पाषाणरत्नोंकाही अधिकार है ॥२॥ किसीका मत है कि बलनामक दैत्यसेही रत्नोंकी उत्पत्ति है, कोई कहते हैं कि दधीचमुनिकी अस्थिसे रत्न उत्पन्न हुए हैं, कोई कहते हैं कि मिट्टीके स्वभावसेही समस्त रत्नोंमें विचित्रता पैदा हुई है ॥ ३ ॥ वज्र (हीरा), इन्द्रनील (नीलम) मरकत (पन्ना), करकेनत, लाल, रुधिर, वैदूर्य, पुलक, विमलक, राजमणि, स्फटिकचन्द्रकान्त ॥ ४ ॥ सौगन्धिक, गोमेदक, शंख, महानील, पुष्पराग, ब्रह्ममणि, ज्योतीरस, शस्यक, मोती, मूंगा इन सबको रत्न कहते हैं ॥ ५ ॥ वेणानदीके किनारे, परही शुद्ध हीरा उत्पन्न होता है, शिरीष फूलके समान हीरा कोशलदेशमें उत्पन्न होता है, कुछेक लाल रंगका हीरा सुराष्ट्र (सूरत)

